जितेंद्रियं जितक्रोधं जिताहारं जितप्रियं ॥ २ ॥

तपस्विनं जितामित्रं ब्रह्मण्यं ब्राह्मणप्रियं ।
तपोवनगतं सौम्यं संध्योपासनतत्परं ॥ ३ ॥ ° ५ ॥

तमेवंगुणसंपन्नं नारीणामुत्तमा वधूः ।
मैत्रेयी च महाभागा गार्गी च ब्रह्मविद्वरा ॥ ६ ॥

सभामध्यगता त्वेवमृषीणामुग्रतेजसां ।
प्रणम्य दंडवद्भूमौ गार्ग्येतद्वाक्यमब्रवीत् ॥ ७ ॥

भगवन् सर्वशास्त्रज्ञ सर्वभूतहिते रत ।
योगतत्त्वं मम ब्रूहि सांगोपांगं विधानतः ॥ ८ ॥

एवं पृष्टः स भगवान्सभामध्ये स्त्रिया तदा ।
ऋषीनालोक्य नेत्राभ्यां वाक्यमेतदभाषत ॥ ९ ॥

उत्तिष्ठोत्तिष्ठ भद्रं ते गार्गि ब्रह्मविदां वरे ।
वक्ष्यामि योग्यसर्वस्वं ब्रह्मणा कीर्तितं पुरा ॥ १० ॥ °

The first *adhyāya* ends fol. 5: इति याज्ञवल्क्यगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे याज्ञवल्क्यगार्गीसंवादे प्रथमो ऽध्याय: ।

The MS. ends: इति श्रीयाज्ञवल्क्यगीतासूपनिषत्सु द्वादशो ऽध्याय: ॥ [H. T. Colebrooke.]

## 2435.

**818.** Foll. 48; size 16 in. by 5 in.; written in a clear, modern Bengalī hand; seven lines in a page.

*Yogi-Yājñavalkīya*, a treatise in twelve *adhyāyas*, after the manner of the *Purāṇas* or *Māhātmyas*, on various subjects connected with devotion.

It begins:

मिथिलास्थं महात्मानं सर्वयोगीश्वरेश्वरं ।
भगवन्तं याज्ञवल्क्यं मुनिसिंहैः समावृतं ॥ १ ॥

जनकाद्यैर्नृपवरैः शिष्यैश्चान्यैर्मुमुक्षुभिः ।
योगसिद्धैस्तथान्यैश्च संयुक्तं ब्रह्मवादिभिः ॥ २ ॥

सुखासीनं मुनिवरं ध्यानयोगपरायणं ।
सर्वसंशयच्छेत्तारं ब्रह्मकल्पं महामतिं ॥ ३ ॥

तं पृच्छन्ति महात्मानमृषयः संशितव्रताः ।
संसारतारणार्थाय गुह्यं ब्रह्म सनातनं ॥ ४ ॥

भगवन् सर्वयोगीश हृदि नः संशयो महान् ।
यः सारः सर्ववेदानां वेदाङ्गानां तथैव च ॥ ५ ॥

सिद्धान्तानां च सर्वेषां स्मृतीनां च महामते ।
चतुर्दशानां विद्यानां यस्तु सारः प्रकीर्तितः ॥ ६ ॥

आत्मज्ञानं परं यच्च यत् श्रुत्वामृतमश्नुते ।
तदाचक्ष्व महाभाग सर्वयोगविदां वर ॥ ७ ॥

ओँकारो(*r.* °र) व्याहृतीश्चैव गायत्री(*r.* °त्रीं) च शिरस्तथा ।
प्राणायामं तथा ध्यानं सन्ध्योपासनमेव च ॥ ८ ॥

मार्जनाचमने स्नानं तथैवान्तर्जलं विभो ।
गायत्र्याश्चैव माहात्म्यं जपयज्ञक्रियास्तथा ॥ ९ ॥ ° २० ॥

एतत् श्रुत्वा तु वचनं मुनीनां भावितात्मनां ।
तथा राजर्षीणां च सशिष्याणां तथैव च ॥ २१ ॥

ब्राह्मणानां हितार्थाय सर्वयोगविदां वरः ।
आविष्कर्तुमनाः प्रश्नं विस्तरेण महामतिः ॥ २२ ॥

DR.RUPNATHJI( DR.RUPAK NATH )

भगवान् याज्ञवल्क्यस्तु प्रत्युवाच मुनींस्तथा ।
श्रूयतां संप्रवक्ष्यामि यत्सारं ज्ञानमुत्तमं ॥ २३ ॥

इति योगी(*r.* °गि)याज्ञवल्क्ये प्रथमो ऽध्यायः (45½ *ślokas*) fol. 4.

इति योगियाज्ञवल्क्ये ओँकारनिर्णयो नाम द्वितीयो ऽध्यायः (161 *śl.*) fol. 12*b*.

इति योगियाज्ञवल्क्ये व्याहृतिनिर्णयस्तृतीयो ऽध्यायः (31 *śl.*) fol. 14.

इति योगियाज्ञवल्क्ये गायत्रीनिर्णयो नाम चतुर्थो ऽध्यायः (93 *śl.*) fol. 19.

इति योगियाज्ञवल्कीये सन्ध्योपासननिर्णयः पञ्चमो ऽध्यायः (30 *śl.*) fol. 21.

इति योगीयाज्ञवल्क्ये षष्ठो ऽध्यायः (on स्नान 131 *śl.*) fol. 27*b*.

इति योगीयाज्ञवल्क्ये सन्ध्योपासननिर्णयः(!) सप्तमो ऽध्यायः (69 *śl.*) fol. 30*b*.

इति योगियाज्ञवल्क्ये प्राणायामप्रत्याहारनिरोधो नामाष्टमो ऽध्यायः (53 *śl.*) fol. 33*b*.

इति योगीयाज्ञवल्क्ये आत्मनिर्णयो नाम नवमो ऽध्यायः (180½ *śl.*) fol. 43.

इति योगीयाज्ञवल्क्ये उपस्थानविधिनिर्णयो नाम दशमो ऽध्यायः (17 *śl.*) fol. 43*b*.

इति योगीयाज्ञवल्कीये एकादशो ऽध्यायः (on योग 91 *śl.*) fol. 48*b*.

इति संचिन्त्य मनुना योगाचार्येण धीमता ।
याज्ञवल्कीये विप्राणां त्रयीमार्ग(:) प्रदर्शितः ॥ १ ॥
येन गच्छन्ति विद्वांसः सत्पथा ब्रह्मणो ऽन्तिकं ।
असत्पथेन विप्रस्य गमनं हि न विद्यते ॥ २ ॥
वेदान्तानां तु सर्वेषां या निष्ठा समुदाहृता ।
तपस्या यादृशी चैव मुनिना संप्रदर्शिता ॥ ३ ॥
ओँकारस्य तु गायत्र्या व्याहृतेः शिरसस्तथा ।
स्नानस्य चैव सन्ध्ययोः प्राणायामस्य चैव हि ॥ ४ ॥
प्रत्याहारस्य ध्यानस्य मार्जनान्तर्जलस्य च ।
उपस्थानस्य ज्ञानस्य आत्मज्ञानस्य यो विधिः ॥ ५ ॥
विद्याविद्याविचारं च त्रैविद्यात्र विशंसनं ।
तत्सर्वं मुनिना प्रोक्ता(*r.* °क्तं) विप्राणां हितकाम्यया ॥ ६ ॥
य इदं धारयेद्विप्रः अधीते(!) शृणुयाच्च यः ।
उपास्ते यत्तयं(यत्नयं?) प्रोक्तं सो ऽमृतत्वाय कल्पते ॥ ७ ॥

इति योगी(*r.* °गि)याज्ञवल्कीये द्वादशो ऽध्यायः समाप्तः ॥

[H. T. COLEBROOKE.]

## 2436.

**1725d.** Foll. 14; size 8 in. by 3½ in.; fairly written in Devanāgarī, about 1750 A.D.; eleven lines in a page.

*Svayambodha*, on the knowledge of one's own self as a means of emancipation; by an unknown author.

It begins:

प्रणम्य शिरसा देवं वामदेवः कृतांजलिः ।
जीवन्मुक्तिपदोपायं कथयस्वेति पृच्छति ॥ १ ॥

ईश्वर उवाच ॥ परं ज्ञानमहं वच्मि येन तत्त्वं प्रकाशते ।
येन विच्छिद्यते सर्वमाशापाशादिबंधनं ॥ २ ॥

आधारादिषु चक्रेषु सुषुम्नादिषु नाडिषु ।
प्राणादिषु समीरेषु परं तत्त्वं न तिष्ठति ॥ ३ ॥ ° ८५ ॥

इति श्रीअमनस्के कल्पखंडे राजयोगो नाम प्रथमो ऽध्यायः ॥ fol. 6*b*.

वामदेव उवाच ॥ भगवन्देव देवेश परमानंदसुंदर ।
त्वत्प्रसादान्मया लब्धः पूर्वयोगः सविस्तरः ॥ १ ॥ °११५ ॥

एतत्परावरविदो वदंति तपस्विनो ज्ञानसमाधियुक्ताः ।
अनादिविज्ञानमजं पुराणं सो ऽहं परं ब्रह्म जगत्समस्तं
[॥ ११६ ॥

इति श्रीईश्वरप्रोक्तः स्वयंबोधः संपूर्णः ॥ लिखितं विश्वनाथेन स्वयंबोधस्य पुस्तकं । श्रीरामप्रीतये ऊर्जे रामो रक्षतु मां सदा ॥

[H. T. COLEBROOKE.]

## 2437.

**1245a.** Foll. 86 (the first of which is wanting); size 10¾ in. by 4½ in.; well written, in Devanāgarī, about 1650 A.D.; eight lines in a page.

*Vishṇu-naivedyāmṛita*, a *Vedānta* treatise in *paurāṇik* form, in two chapters (*prakaraṇa*), by *Santoshānanda*, disciple of *Haripādānanda* (?).

The MS. begins in the sixth *śloka*: हेतुतामेति स्वां मायामवलंब्य सः ॥ ६ ॥

Ch. I. consists of 372, II. of 403 verses.

DR.RUPNATHJI(DR.RUPAK NATH)

Ch. II. (paged separately) begins:

सत्रात्रमूर्त्तेर्जनकं परेशं वक्ष्ये त्रिमूर्त्त्यैक्यमनादिरूपं ।
स्रष्टा सुराणामखिलार्त्तिहंता तातं प्रणम्यादिसुखाप्तिदं च [॥ १ ॥

भगिन्युवाच ॥

सच्चिदानंदरूपाय निर्गुणाय परात्मने ।
ज्ञानगम्यस्वगम्याय ब्रह्मपुच्छस्वरूपिणे ॥ २ ॥
तस्मै निवेदयेच्चात्रमित्युक्तं सगुणे ऽपि च ।
साकारे चैकमूर्त्तित्वं न जानामि कदाचन ॥ ३ ॥
उक्तं साकारदेवस्य मूर्त्तित्वं त्रिविधं शुभं ।
एकैकलक्षणेनैव साकारो ऽयं विराजते ॥ ४ ॥
सर्वैश्वर्यं तु साकारे वद मे त्वं विवेकतः ।

बंधुरुवाच ॥

सदेवासीत्परं ब्रह्म निराभासं परं पदं ॥ ५ ॥

Colophon: इति श्रीवेदांतगर्भविष्णुनैवेद्यामृतविधाने बंधुभगिनीसंवादे श्रीमत्परमहंसपरिव्राजकाचार्यहरिपादानंदशिष्यसंतोषानंदांतर्यामिणा विरचितं सोत्र(*r.* सत्रात्र?)मूर्त्तिसहदत्तात्रेयमाहात्म्यकथनरूपं द्वितीयप्रकरणं समाप्तं ॥

[H. T. COLEBROOKE.]

## 2438.

**2667b.** Foll. 26; size 11 in. by $5\frac{1}{8}$ in.; 12 or 13 lines in a page; large writing, from the end of the 17th century.

*Advaitāmṛita*, a metrical treatise on asceticism and the knowledge of *ātman* according to the *Vedānta*, in five sections called *kavala*, by *Jagannātha Sarasvatī*, pupil of *Harihara Sarasvatī*. This tract represents the views of the *Karmandin*, a certain sect of *bhikshus* (*Pāṇini*, iv., 3, iii.). It has a legendary introduction, the teaching is put into the mouth of a *bhikshu* who has the significant name *Vivekāśrama*. See Hall's Index, p. 141, no. ccxxxi.

It begins:

हरिहरसरस्वती यद्गुरुरोघ्नः परमहंसानां ।
स जगन्नाथपदोत्तरसरस्वतीशब्दसंवेद्यः * ॥ १ ॥
कर्मंदिकंठालंकारं सारं वेदांतवारिधेः ।
रचयत्यमलं ग्रंथमद्वैतामृत ज्ञकं ॥ २ ॥

* This MS. has °शब्दपदसंवेद्यः which spoils the metre.

श्रामीद्यतिवरः कश्चिद्विवेकाश्रमसंज्ञकः ।
यत्प्रसादेन बहवो मुक्तिमार्गमुपागताः ॥ ३ ॥
स स्वोचितं मठं लोके क्वचिन्नापि विचारयन् ।
नावाप तं मनो यत्र यतेस्तस्य प्रसीदति ॥ ४ ॥
नवांकांकांकनंदत्रिगजसंख्या † विलोकिताः ।
मठास्तेन जगत्यस्मिंस्तेषु लेभे स्थितिं न सः ॥ ५ ॥
एवं गिरिवरारण्यसरित्सागरवापिकाः ।
पश्यता किल तेनैक्षि पांचजन्याभिधो मठः ॥ ६ ॥
द्विस्थूणः कामगो रम्यो नवद्वारविभूषितः ।
स्वोचिताचारनिर्वृत्तियोग्यस्तीर्थपदाश्रयः ‡ ॥ ७ ॥
सर्वलोकोपभोगाप्तिपरितोषायसंयुतः § ।
बहुजन्मसमभ्यस्तैरवाप्यः सुकृतोच्चयैः ॥ ८ ॥
जगन्मंगलमूर्तिश्रीरामचंद्रार्चनोचितः ।
यस्मिन्नधिष्ठिते चित्तं पंडितस्य प्रसीदति ॥ ९ ॥
बहुना किमिहोक्तेन पाताले भुवि वा दिवि ।
निवासयोग्यो नान्योऽस्ति मठः संन्यासिनां सतां ॥ १० ॥
स विवेकाश्रमो भिक्षुर्दिक्षु चंक्रमणार्दितः ।
स्वोचितं तं मठं वीक्ष्य तत्र निष्ठामुपागतः ॥ ११ ॥
क्षामे विवेकाश्रमनाम्नि तत्र यतीश्वरे लब्धपदे कथंचित ।
उपाजगामाथ शनैर्हसंती काप्यंगनानंगविलासभूमिः॥१२॥

After long deliberation the *bhikshu* asks the female her name; she answers:

चित्तवृत्तिरहं भद्र ज्येष्ठास्मि भगिनी तव ।
त्वं पुनर्मां न जानासि यदापन्नोऽसि सांप्रतं ॥ ४४ ॥
ये ये मठास्त्वया त्यक्ता यश्चेदानीमुपाश्रितः ।
तान्सर्वान्पालयंतीं मां विद्धि तस्याधिदेवतां ॥ ४५ ॥
वांछामि विषयान्सर्वान् शब्दादीन् हृदयंगमान् ।
तदुपस्थापकं तत्तत् कर्मापीछामि शोभनं ॥ ४६ ॥
न कर्मत्यागमिछामि तत्फलत्यागमेव || वा ।
यदपेक्ष्य¶ भवान् मूढः कर्मंदित्वमुपाश्रित(:) ॥ ४७ ॥
त्यक्त्वा वित्तैषणां पुत्रैषणां लोकैषणामपि ।
भिक्षा कार्या प्रतिगृहमितीदं साहसं महत् ॥ ४८ ॥

† The number meant by this curious compound is ८३९९९९९, as is indicated in a marginal note.

‡ The reading of the second copy; this MS. has स्वोचिताधारसंवृत्ति°.

§ The second copy has संभृतः.

|| The second copy has न फल°.

¶ The second copy has यपेक्षति.



DR.RUPNATHJI( DR.RUPAK NATH )

The *bhikshu* repudiates her recommendation of a life given to sensual pleasure, and instructs her in the doctrine of *ātman*. The end is the conversion of *Cittavṛitti*:

इति प्रबोधिता चित्तवृत्तिस्तेनात्र योगिना ।
विरक्ता विषयेभ्यः सा ब्रह्मात्मैक्यमुपाददे * ॥ १६६ ॥
प्राप्तस्यैवानंदवार्धेस्तदाप्तिस्त्यक्तस्यैव क्लेशवार्द्धेस्तदाभूत् ।
त्यागो यस्मिंस्तत्त्वमस्यादिवाक्यैर्जाता काले तादृशी चित्त-
[वृत्तिः ॥ १६७ ॥
स हरिहरसरस्वतीयतींद्रद्युमणिकराभिहतान्तांधकारः ।
जयति परमहंसयोगिवर्यो नरहरिसंज्ञचिदात्मसक्तचित्तः [॥ १६८ ॥
जिताहारो जितक्रोधो जगन्नाथसरस्वती ।
येनायं † रचितो ग्रंथो ह्यद्वैतामृतसंज्ञकः ‡ ॥ १६९ ॥
एतस्य कवलान्पंचास्वाद्य सादरतां गताः ।
अमृतत्वं प्रयांत्याशु विबुधा यतिसत्तमाः ॥ १७० ॥

इति श्रीपरमहंसपरिव्राजकाचार्यहरिहरसरस्वतीप्रियशिष्य-जगन्नाथसरस्वतीविरचितेऽद्वैतामृते पंचमः कवलः ॥ ६५० (viz. *ślokas*).

In this copy the first *kavala* has 100 *ślokas*, the second 157, the third 48, the fourth 105, the fifth 170. [H. T. Colebrooke.]

## 2439.

**2401b.** Foll. 46 (१-४९, fol. २१ of the original numbering is lost); size 8 in. by 3⅝ in.; 8 or 9 lines in a page; good old writing.

*Advaitāmṛita*, a second copy.

Colophon: इति श्रीपरमहंस° पंचमः कवलः समाप्तः ॥ इति अद्वैतामृतप्रकरणं संपूर्णं ॥

काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी ।
राजा भवतु धर्मिष्ठो ब्राह्मणा(:) संतु निर्भयाः ॥

संवत् १९३० वर्षे ऽधिकमासे एकादश्यां भौमे लिखितं व्यासेश्वरेण ।

* The second copy has °ददौ.

† The second copy has तेनायं.

‡ The reading of the second copy; the present copy has °ग्रंथो अद्वैत°.

सर्वे च सुखिन(*sic*!) सुखिनः संतु सर्वे संतु निरामयाः ।
सर्वे ५ (*sic*!) भद्राणि पश्यंतु मा कश्चिद्दुःखमाप्नुयात् ॥
[Gaikawar.]

## 2440.

**2610b.** Foll. 32; size 10¼ in. by 4¾ in.; eleven lines in a page; fair writing.

*Vṛittidīpikā*, a philosophical dissertation on the meaning and use of words, by *Śrīkṛishṇa Bhaṭṭa*, son of *Raghunātha Bhaṭṭa*, who was the son of *Govardhana*, from the *Maunin kula*. In Aufrecht's Cat. Cat., p. 198, the author is called *Jayakṛishṇa Maunin*. For a fuller account of the contents of this work, see Rāj. Mitra's Not., vi., p. 53, no. 2027.

It begins:

ध्यात्वा व्यासं गुरुं नत्वा माधवेन्द्रं सरस्वतीम् ।
मौनी(*r.* °नि)श्रीकृष्णभट्टेन तन्यते वृत्तिदीपिका ॥ १ ॥

इह सकलजनाभिलषितमोक्षमुख्योपायात्मतत्त्वज्ञानस्य तत्त्व-मस्यादिमहावाक्यार्थबोधजन्यत्वाच्छाब्दबोधे च वृत्तिग्रहजन्योप-स्थितेर्हेतुत्वाद्वृत्तिर्निरूप्यते सा च त्रिविधा शक्तिर्लक्षणा व्यञ्जना च ।

Colophon: इति श्रीमन्मौनिकुलतिलकायमानगोवर्द्धन-भट्टात्मजरघुनाथभट्टसुतश्रीकृष्णभट्टविरचिता वृत्तिदीपिका समाप्ता ॥ [Gaikawar.]

## 2441.

**578.** Foll. 86; size 10¾ in. by 4 in.; fair Devanāgarī writing of 1793 A.D., by three different hands; ten lines in a page.

*Sarvadarśanasaṃgraha*, by *Mādhavācārya*. See Hall's Index, p. 161, no. ccciv. It was published in the Bibl. Indica, 1859, and translated into English by Cowell and Gough in the *Pandit*.

It begins:

नित्यज्ञानाश्रयं वंदे निःश्रेयसनिधिं शिवं ।
येनैव जातं ब्रह्मादि तेनैवेदं सवार्तृकं(*r.* सकर्तृकं) ॥
[H. T. Colebrooke.]

DR.RUPNATHJI( DR.RUPAK NATH )

## 2442.

**2678a.** Foll. 14; 8vo. size, 8 in. by 6 in.; good small, modern Telugu writing; 26–32 lines in a page.

*Sarvasiddhāntasaṃgraha*, an elementary review of the philosophical systems (wrongly) ascribed to *Śaṅkarācārya*.

It begins:

वादिभिर्दर्शनैः सर्वैर्दृश्यते यस्त्वनेकवत् ।
वेदान्तवेद्यं तं रुद्रमेकरूपमुपास्महे ॥ १ ॥

अङ्गोपाङ्गोपवेदाः स्युर्वेदस्यैवोपकारकाः ।
धर्मार्थकाममोक्षाणामाश्रयस्य चतुर्दश ॥ २ ॥

वेदाङ्गानि षडेतानि शिक्षा व्याकरणं तथा ।
निरुक्तं ज्योतिषं कल्पश्छन्दोविचितिरित्यपि ॥ ३ ॥

मीमांसा न्यायशास्त्रं च पुराणं स्मृतिरित्यपि ।
चत्वार्येतान्युपाङ्गानि वहिरङ्गानि तानि वै ॥ ४ ॥

आयुर्वेदो ऽर्थवेदश्च धनुर्वेदस्तथैव च ।
गान्धर्ववेद इत्येवमुपवेदाश्चतुर्विधाः ॥ ५ ॥

शिक्षा शिक्षयति व्यक्तं वेदोच्चारणलक्षणं ।
व्यक्ति(*r.* वक्ति) व्याकरणं तस्य संहितापदलक्षणं ॥ ६ ॥

वक्ति तस्य निरुक्तं तु पदनिर्वचनं स्फुटं ।
ज्योतिःशास्त्रं वदत्यत्र कालं वैदिककर्मणां ॥ ७ ॥

क्रमं कर्मप्रयोगाणां कल्पस्तत्र प्रचक्षते(!) ।
मन्त्राक्षराणां संख्योक्ता छन्दोविचितिरेतया ॥ ८ ॥ °

25 *ślokas* of introduction. Then follows the account of the several systems, viz.—

1. *Lokāyatikapaksha*:

लोकायतिकपक्षे तु तत्त्वं भूतचतुष्टयं ।
पृथिव्यापस्तथा तेजो वायुरित्येव नापरः ॥

प्रत्यक्षगम्यमेवास्ति नास्त्यदृष्टमदृष्टतः ।
अदृष्टवादिभिश्चापि नादृष्टं दृष्टमुच्यते ॥ ° 15 *ślokas*.

2. *Ārhatapaksha*:

लोकायतिकपक्षो ऽयमाक्षेप्यः सर्ववादिनां ।
स्वपक्षेणाक्षिपत्येष तत्पक्षं क्षपणो ऽधुना ॥

अग्नेरौष्ण्यमपां शैत्यं कोकिले मधुरस्वरः ।
इत्याद्येकप्रकारः स्यात् स्वभावो नापरः क्वचित् ॥ °
[16 *ślokas*.

3. *Mādhyamikapaksha*, 17 *ślokas*; 4. *Yogācāryapaksha*, 9 *ślokas*; *Sautrāntikamatam*, 7 *ślokas*; 5. *Bauddhapaksha*, 37 *ślokas*; 6. *Vaiśeshikapaksha*, 40 *ślokas*; 7. *Nayyāyikapaksha* (*r. Naiyāy°*), 44 *ślokas*; 8. *Prābhākarapaksha*, 13 *ślokas*; 9. *Bhāṭṭapaksha*, 40 *ślokas*; 10. *Kapilavāsudevapaksha*, 40 *ślokas*; 11. *Patañjalipaksha*, 68 *ślokas*; 12. *Vedavyāsoktabhāratapaksha*, 64 *ślokas*; 13. *Vedāntapaksha*, 104 *ślokas*. It ends:

उक्तो ऽवधूतमार्गश्च कृष्णेनैवोद्धवं प्रति ।
श्रीभागवतसंज्ञे तु पुराणे दृश्यते हि सः ॥

सर्वदर्शनसिद्धान्तान् वेदान्तोक्तानिमान्क्रमात् ।
श्रुत्वार्थविन्तु संक्षिप्तांस्तत्त्ववित्पण्डितो भवेत् ॥

इति श्रीशंकराचार्यविरचिते सर्वसिद्धान्तसंग्रहे वेदान्तपक्ष एवायं यस्मिन्पक्षाः प्रतिष्ठिताः । सर्वसिद्धान्तसंग्रहः समाप्तः ॥

[MACK. COLL.]

## 2443.

**1341.** Foll. 114; size 12 in. by 4½ in.; foll. 1–84 eleven lines, foll. 85–114 twelve lines in a page; fair modern writing.

*Khaṇḍanakhaṇḍakhādya*, a critical treatise on the different philosophical systems, in four *paricchedas*, by *Śrīharsha*.

See Hall's Index, p. 160, no. ccciii.; Aufrecht's Oxford Cat., p. 246, no. 620. It begins: अविकल्पविषय एकः °

The first chapter, or *pramāṇatadābhāsakhaṇḍanam*, ends fol. 73*b*; the second, or *nigrahāṇirukti*, fol. 80*a*; the third, or *sarvanāmārthāṇirukti*, fol. 81*b*.

Colophon at the end: इति श्रीहर्षकृतानिर्वचनीयसर्वस्वे खण्डनखाद्ये(*sic!*) संकीर्णपरिच्छेदः समाप्तः ॥

The *Khaṇḍanakhaṇḍakhādya* has been printed at Calcutta in Saṃvat 1905, with *Śaṅkara Miśra's vyākhyā*, and an *upavritti* by *Mohana Lāla* at Kāśī in Saṃvat 1944, = 1888 A.D. (from the *Pandit*, N.S., vol. vi.–xiii.).

[H. T. COLEBROOKE.]



DR.RUPNATHJI( DR.RUPAK NATH )

## 2444, 2445.

**60.** Foll. 301; size 10¼ in. by 4¼ in.; eight lines in a page. Large fair writing.

**61.** Foll. 299 (paged ३०२–६९५); size 10¾ in. by 4¼ in. Foll. 1–250 eight lines (in the same writing as vol. i.), foll. 251–299 ten lines in a page. This last portion is in a modern handwriting.

*Khaṇḍanakhaṇḍakhādyaṭīkā*, a commentary on the *Khaṇḍanakhaṇḍakhādya*, incomplete and without any title. All leaves bear the marginal mark षं० टी०, in the last modern portion खं० टी०. It is neither *Śaṅkara Miśra's* nor *Vardhamāna's* commentary.

It begins:

यो विश्वो कारवाच्यः(*r.* विश्वाकार०) सकलविपयभुक्
[भ्रान्तितत्कारणाभ्यां
वद्धः संस्कारमात्रप्रविरचिततनुस्तैजसश्चेत्युवाच्यः
[(*r.* ०श्चैत्यवाच्यः?) ।
प्राज्ञो ज्ञानैकवद्धः सुरनरसकलानन्दभुङ्क्षारेक्षे(?)
वाक्यार्थो यस्तुरीयो विगलितसकलः सो ऽहमेवास्मि
[भूमा ॥ १ ॥

After seven more couplets in this style the commentary begins:

ग्रन्थारम्भे शिष्टाचारपरं पराप्राप्तकर्तव्यभावं(*r.* ०भावं?) परदेवतास्तुतिनमस्कारलक्षणं मङ्गलं विधातुमधिकारिप्रयोजनसंबन्धाभिधेयप्रतिपादनाय चाह अविकल्पेति ॥

There are several leaves wanting after fol. 62 in vol. ii.

[H. T. COLEBROOKE.]

## 2446.

**957c.** Foll. 28; size 10¼ in. by 4 in.; good clear Devanāgarī writing of 1750 A.D., nine lines in a page.

*Vidvanmodataraṅgiṇī*, a metrical review of philosophical and religious systems, in eight *taraṅgas*, by *Rāmadeva Ciramjīva*, son of *Rāghavendra*, and grandson of *Kāśīnātha*.

Beg. तमोगुणविनाशिनी सकलकालमुद्योतिनी ०

Printed at Calcutta in 1872.

Cf. Weber's Berl. Cat., no. 543; Aufrecht's Cat. Bodl., no. 629. [H. T. COLEBROOKE.]

## 2447.

**56c.** Foll. 31; size 10¼ in. by 5¼ in.; legibly written, in Devanāgarī, about 1700 A.D., ten lines in a page.

The same work, *taraṅgas* i.-vii.

[H. T. COLEBROOKE.]

## 2448.

**2374.** Foll. 97; size 10⅝ in. by 4¾ in. good clear Devanāgarī writing; ten lines in a page.

*Sarvasiddhāntaleśasaṃgraha*, a dissertation, in four chapters, on the tenets of the different schools of the *Vedānta*, by *Appayya Dīkshita*, son of *Raṅgarāja Dīkshita*.

See Hall's Index, p. 153, no. cclxxiii.; Weber's Berlin Cat., p. 184, no. 632; Rāj. Mitra's Notices, vol. iv., p. 91, no. 1496, and p. 147, no. 1573.

It begins:

अधिगतभिदापूर्वाचार्यानुपेत्य सहस्रधा
सरिदिव महीभेदान्संप्राप्य शौरिपदोद्गता ।
जयति भगवत्पादश्रीमन्मुखांबुजनिर्गता
जननहरिणी सूक्तिर्ब्रह्माद्वयैकपरायणा ॥ १ ॥
प्राचीनैर्व्यवहारसिद्धविपयेष्वात्मैक्यसिद्धौ परं
सन्नह्यद्भिरनादरात्सरणयो नानाविधा दर्शिताः ।
तन्मूलानिह संग्रहेण कतिचित्सिद्धांतभेदान्धियः
शुद्ध्यै संकलयामि तातचरणव्याख्यावचःख्यापितान् ॥२॥
तेषूपपादनापेक्षान्यक्षान्प्रायो यथामति ।
युक्त्योपपादयन्नेव लिखाम्यनतिविस्तरं ॥ ३ ॥

तत्र तावदात्मा वा(ऽ)रे द्रष्टव्य इत्यधीतसांगस्वाध्यायस्य ०

It ends:

विद्वद्गुरोर्विहितविश्वजिदध्वरस्य
श्रीसर्वतोमुखमहाव्रतयाजिसूनोः ।

DR.RUPNATHJI( DR.RUPAK NATH )

श्रीरंगराजमखिनः श्रितचंद्रमौलिर्
अस्त्यप्प (r. अप्पय्य *)दीक्षित इति प्रथितस्तनूजः ॥

तंत्राण्यधीत्य सकलानि सतातपाद-
व्याख्यानकौशलकलाविशदीकृतानि ।
आस्थाय मूलमनुरुध्य च संप्रदायं
सिद्धांतलेश(R. M. सिद्धांतभेदलव)संग्रहमित्यकार्षीत् ॥

इति शास्त्रसिद्धांतलेशसंग्रहे चतुर्थः परिच्छेदः संपूर्णो ऽयं ग्रंथः॥ संवत् १८३२ फाल्गुन वदि सोमवासरान्वितायाममावास्याभिधायां तिथौ मयाश्रितस्वस्वभावसच्चिदानंदघनशिवचरणेन पंडितचिंतामणिना समाप्तीकृतो ऽयं ग्रंथः ॥

The title of the work also appears in the MS. as *Śāstrasiddhāntalavasaṃgraha*.

[H. T. COLEBROOKE.]

## 2449.

**1438.** Foll. 134; size 12 in. by 6 in.; fairly good modern Devanāgarī writing; 19–26 lines in a page.

The same work, with a commentary called *Krishṇālaṃkāra*, by *Acyutakrishṇānanda Tīrtha*, disciple of *Svayaṃprakāśānanda Sarasvatī*, disciple of *Advaitānanda Sarasvatī* (or *Yati*).

See Hall's Index, p. 153, no. cclxxiv.; Rāj. Mitra's Notices, vol. i., p. 35; v., p. 145.

The commentary begins:

वेदवेद्यसुमाक्रांतं कुमाराभ्यामलंकृतं ।
नंदीशप्रमुखैः सेव्यं प्रणमामीष्टसिद्धये ॥ १ ॥
शंकरं शंकराचार्यं व्यासं नारायणात्मकं ।
सरस्वतीं च ब्रह्माणं प्रणमामि पुनः पुनः ॥ २ ॥
गोविंदेति समाक्रंद्य रक्षां प्राप भयातुरः ।
यं गजः करुणामूर्त्तिं तं गोविंदं भजे ऽन्वहं ॥ ३ ॥
यो मे विश्वेश्वरक्षेत्रं विश्वेश्वरसमो गुरुः ।
समध्यास्ते स्वयंज्योतिर्वाणीसंज्ञो भजामि तं ॥ ४ ॥
प्रकाशितब्रह्मतत्त्वं प्रकृष्टगुणशालिनं ।
प्रणवस्योपदेष्टारं प्रणमाम्यनिशं गुरुं ॥ ५ ॥ °

* अस्त्यप्प also in the Berlin copy, but अप्पय्य Rāj. Mitra, no. 1573; see also nos. 2211 and 2179 of this Catalogue.

यस्य शिष्यप्रशिष्याद्यैर्व्याप्तेयं सांप्रतं मही ।
सर्वज्ञस्य गुरोस्तस्य चरणौ संश्रये सदा ॥ ७ ॥
गुरोरपि गरीयान्से यः कलाभिरलंकृतः ।
अद्वैतानंदवाण्याख्यस्तं वंदे शर्मवारिधिं ॥ ८ ॥ °
श्रीकृष्णचरणद्वंद्वं प्रणिपत्य निबंधनं ।
व्याकुर्वे शास्त्रसिद्धांतलेशसंग्रहसंज्ञितं ॥ १० ॥
आचार्यचरणद्वंद्वस्मृतिलेखकरूपिणं ।
मां कृत्वा कुरुते व्याख्यां नाहमत्र प्रभुर्यतः ॥ ११ ॥

Colophon: इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानंदसरस्वतीदिव्यश्रीचरणारविंदसंलग्नरजोभूतस्याच्युतकृष्णानंदतीर्थस्य कृतौ शास्त्रसिद्धांतलेशसंग्रहव्याख्यायां श्रीकृष्णालंकाराख्यायां श्रीबालमुकुंदानंदतीर्थपादपूज्यशिष्यविश्वनाथतीर्थेन ग्रंथोद्धरणं (the other MSS. omit from श्रीबालमुकुंदानंद°) चतुर्थः परिच्छेदः समाप्तः ॥

[H. T. COLEBROOKE.]

## 2450.

**1081.** Foll. 111; size $12\frac{7}{8}$ in. by $6\frac{3}{8}$ in.; fairly good, modern Devanāgarī writing; 10–16 lines in a page.

Chapter i. of the same works; incomplete at the end. [H. T. COLEBROOKE.]

## 2451.

**1165b.** Foll. 7 (numbered 66–72); size $12\frac{3}{4}$ in. by $6\frac{1}{2}$ in.; fairly good, modern Devanāgarī writing; 19–21 lines in a page.

A fragment of the same works, comprising the concluding portion of the first chapter. It begins slightly before the point where the preceding MS. leaves off, and thus practically completes that part of the works.

[H. T. COLEBROOKE.]

## 2452.

**403.** Foll. 122; size $12\frac{1}{2}$ in. by 6 in.; fairly good, modern Devanāgarī writing (the same hand as the two preceding MSS.); 8–20 lines in a page.

Chapters ii.–iv. of the same works.

[H. T. COLEBROOKE.]

DR.RUPINATHJI( DR RUPAK NATH )

## 2453.

**1103d.** Foll. 13 (foll. 61–73 of the vol.); size 12¾ in. by 4¼ in.; fair, but small writing; 19–23 lines in a page.

*Vedāntasiddhāntasūktimañjarī*, a versification of the contents of the *Siddhāntaleśa*, by *Gaṅgādharendra Sarasvatī Bhikshu*, pupil of *Rāmacandra Sarasvatī*, with the same author's commentary called *Vedāntasiddhāntasūktimañjarīprakāśa*; the text in the middle of every page, the commentary above and beneath it.

See Hall's Index, p. 153, nos. cclxxv. and cclxxvi.; Rāj. Mitra's Notices, ii., p. 3, no. 524.

The text begins:

तरणिशतसवर्णं कर्णघूर्णद्विरेफावलि-
वलितकपोलोद्दामदानाभिरामं ।
गिरिशगिरिसुताभ्यां लालितं नित्यमंके
स्वजनभरणशीलं शीलये विघ्नराजं ॥
श्रीमद्गुरुपदांभोजद्वंद्वमानम्य भक्तितः ।
सिद्धांतलेशसिद्धांतान् कारिकाभिर्निदर्शये ॥

The commentary begins:

तारानाथकलाधरस्त्रिजगतां नाथस्त्रयीविग्रहः
कारुण्यैकनिधिर्विधींद्रमुखैर्देवर्षिसिद्धैर्नुतः ।
वामांकस्थितशैलजांकसहितं विघ्नाधिपं लालयन्
सानन्दः शुभदः सदास्तु भगवान्प्रारिप्सितेऽस्मिन् शिवः ॥१॥

विततर(विततततर the second copy)दुरवगाहवेदांतशास्त्रार्णवप्रवेशेन वहुविधसिद्धांतरत्नसंकलनासमर्थानां गुरुतरोपायप्रयत्नालमानामनायासेन सर्वसिद्धांतपरिज्ञानलालसानां मुमुक्षुविशेषाणामुपकाराय वेदांतसिद्धांतसूक्तिमंजरीं प्रारिप्समानः प्रत्यूहव्यूहप्रशमनाय प्रथमं सांवशिवस्पृहणीयगुणकदंव(° कदंवं the second copy)हेरंवमनुसंधत्ते तरणिशतसवर्णमिति etc.

The first *pariccheda* ends fol. 6*a*, the second fol. 9*b*, the third fol. 12*a*.

The text ends:

श्रुतिकल्पलताकुंजसंजाता सूक्तिमंजरी ।
रम्या राद्धांतरत्नाढ्या रंजयत्वखिलान्बुधान् ॥ २५ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामचंद्रसरस्वतीपूज्यपादशिष्येण गंगाधरेंद्रसरस्वत्याख्यभिक्षुणा विरचिता वेदांतसिद्धांतसूक्तिमंजरी समाप्ता ॥

The commentary ends:

कीर्त्तिप्रचयगमनादिसिद्धये ग्रंथस्य विशिष्टमूलगुणनामधेयानि दर्शयन्नाशीर्वचनलक्षणं मंगलांतरमाचरति श्रुतिकल्पलतेति स्पष्टार्थं पद्यं ॥ २५ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामचंद्रसरस्वतीपूज्यशिष्येण गंगाधरेन्द्रसरस्वत्याख्ययतिना विरचिते वेदांतसिद्धांतसूक्तिमंजरीप्रकाशे चतुर्थः परिच्छेदः समाप्तः ॥

Date of the MS.: निधींदुसिद्धिचंद्रे* पौष शुक्ले शनौ निशि तृतीयायां त्रिसंध्ये घट्टे वाराणसीपुरि जिज्ञासुजनसंतुष्ट्यै वुद्धिमान्समलीलिखत् ॥ [H. T. Colebrooke.]

## 2454.

**1597a.** Foll. 35; size 9½ in. by 3¾ in.; 8–11 lines in a page; small, clear writing, of the middle of the 18th century.

*Vedāntasiddhāntasūktimañjarī*, with its explanation, both by *Gaṅgādharendra Sarasvatī Bhikshu*; a second copy, incomplete. The first *pariccheda* ends fol. 24, which is fol. २२ of the original numbering. The next leaf contains *ślokas* 8–11 of the second *pariccheda*, the beginning and the end of this chapter are wanting. The leaves which contain the third and the fourth *paricchedas* were numbered १–१५, but foll. १, ६, ८, ९, ११ are lost.

The explanation of the last *śloka* and the colophon of the *Prakāśa* are wanting.

[H. T. Colebrooke.]

## 2455.

**2098b.** Foll. 13; size 10 in. by 3¾ in.; good Devanāgarī writing of 1652 A.D.; 7–9 lines in a page.

*Prasthānabheda*, a classificatory sketch of orthodox Brāhmanical writings, from a *Vedānta* point of view.

---

* *Siddhi* does not appear in the list of significant words given by Burnell, South-Indian Palæography, p. 58. It is, however, given by L. Rice, Mysore Inscr., p. xxi., as meaning 'eight' (cp. *Sāṃkhyakār.* v. 51, '*siddhayo*' *shṭāu*). This gives the (Saṃvat) year 1819.

DR.PUPNATHJI( DR.RUPAK NATH )

It begins: अथ सर्वेषां शास्त्राणां भगवत्येव तात्पर्यं साक्षात्परंपरया चेति समासेन तेषां प्रस्थानभेदो ऽत्रोद्दिश्यते । ०

See A. Weber, Ind. Stud., i., pp. 1 seqq., where the text has been edited from this and the next MSS. It was also printed, with a Bengali translation, at Calcutta, in 1856.

[GAIKAWAR.]

## 2456.

**1568a.** Foll. 13; size 10 in. by 4½ in.; good, modern Devanāgarī writing; seven lines in a page.

The same work. [H. T. COLEBROOKE.]

## 2457.

**1435a.** Foll. 32; size 12 in. by 4¾ in.; 11 or 12 lines in a page; written in the Bengali character.

*Saṅkhyāprakāśakavyākhyā*, the text of *Nandarāma's Saṅkhyāprakāśaka*, with a commentary by *Kāśīrāma*, son of *Bhaṭṭācārya Śiroratna Nyāyālaṃkāra*. The *Saṅkhyāprakāśaka* is an encyclopædic catalogue of philosophical and mythological objects, arranged according to their number.

It begins:

देहवानिव यो भाति शुद्धसत्यात्मभावकः ।
तनुते नन्दरामस्तं नत्वा सङ्ख्याप्रकाशकम् ॥

एकं ब्रह्म ॥ द्वावात्मानौ जीवेश्वरौ ॥ द्वावनादी प्रकृतिपुरुषौ ॥ द्वे प्रकृती परापरे ॥ द्वौ पुरुषौ क्षराक्षरौ ॥ ० Fol. 4*b*: त्रय उपाया ध्यानकर्म्मभक्तयः ॥ Fol. 7*a*: चत्वारो ब्राह्मणक्षत्रियविट्शूद्राः ॥ Fol. 9*a*: पञ्च देवता रविगणेशविष्णुशिवदुर्गाः ॥ Fol. 9*b*: पञ्च पुरुषार्थाः धर्म्मार्थकाममोक्षप्रेमभक्तयः ॥ Fol. 11*a*: पञ्च विद्या सांख्ययोगवैराग्यतपोभक्तयः ॥ Fol. 11*b*: पञ्चार्थशास्त्राणि नीतिशास्त्रमश्वशास्त्रं शिल्पशास्त्रं सूपकारशास्त्रं कलाशास्त्रञ्च ॥ Fol. 12*a*: षट् तर्काः न्यायवैशेषिकमीमांसापातञ्जलसांख्यवेदान्ताख्याः ॥ Fol. 20*a*: नव द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि ॥ नव वर्षाणि इलावृतरम्यकहिरण्मयकुरुहरिवर्षकिंपुरुषभारतकेतुमालभद्राश्वनामानि॥ etc.

It ends: प्रकृतिसहितानि चैतानि त्रिंशत्तत्त्वानि ॥ ब्रह्मसहितान्येतानि एकत्रिंशत्तत्त्वानि ॥ अन्यापि संख्या बोद्धव्या ॥

*Kāśīrāma's* commentary begins:

रिरक्षिषुर्यो निजधर्म्ममेतत् युगे युगे सत्वमयानि धत्ते ।
वपूंषि नानागुणकर्म्मभाञ्जि भूयात् स देवो भवतां विभूत्यै ॥
भट्टाचार्य्यशिरोरत्नन्यायालंकारसूनुना ।
संख्याप्रकाशकव्याख्या काशीरामेण तन्यते ॥

अथ सकलशास्त्राभिधः श्रीमान् नन्दरामतर्कवागीशभट्टाचार्य्यः इदानींतनान् मन्दबुद्धीन् पूर्व्वपण्डितकृतनानाविधतन्त्रग्रन्थाध्ययनासमर्थानवलोक्य परमकारुणिकतया अध्ययनभावनाभ्यां तत्तद्ग्रन्थेभ्यः सारमाकृष्य संख्याकथनमिषेण संख्याप्रकाशकनामकग्रन्थं संक्षिप्तमुक्तं तेषां हितार्थं रचितवान् । अथ एषो ऽपि तेषां नातिसुगमो ऽभूव अतो यथामति तद्व्याख्याने ममोद्यमः । तत्र तावत् ग्रन्थकृद्ग्रन्थसमाप्तिप्रतिबन्धकीभूतविघ्नसंभावनया तन्नाशार्थं कालीश्वरनमस्कारं शिष्यशिक्षार्थमादौ निबन्धनमुचिरतरकालीनविबुधपदावस्थितिहेतुयशसे स्वनामयौगिकग्रन्थनामधारी प्रवृत्यङ्गमभिधेयञ्चाह ॥

[H. T. COLEBROOKE.]

## 2458, 2459.

**343, 344.** Foll. 1–414 and 415–832 resp.; size 4to., 11½ in. by 9 in.; large modern Devanāgarī writing; 12–18 lines in a page.

*Vidyāratnākara*, a cyclopædia of Sanskrit Literature and Science, in eighteen chapters; compiled for Colebrooke, by *Dhanapati Sūri*, son of *Rāma Kumāra Datta*.

It begins:

ब्रह्मादिदेवतावृंदवंद्यपादसरोरुहं ।
नंदनंदनमानंदकंदं देवं समाश्रये ॥ १ ॥
नुमः श्रीबालगोपालतीर्थान् व्यासमुखान् मुनीन् ।
विघ्नहर्तॄन् गणेशादीन् पंडितांश्च विमत्सरान् ॥ २ ॥
आलोक्याखिलतंत्राणि सर्वसंबोधसिद्धये ।
वितन्यते यथाज्ञानं विद्यारत्नाकरो मया ॥ ३ ॥
श्रीमच्छ्रेपमुखप्रणीतविलसत्तत्रीर्थार्थतद्वाज्ञ(? तज्ज्ञानं चित्)
तेजस्वित्वसुभाग्यतादिकगुणाधाराधिकारप्रदः ।
यो विप्रेष्टकृदस्ति कौलब्रूकी गौरांगधीराग्रणीस्
तद्वाक्यात्तकृतिः कृती धनपतिर्ग्रंथं विधत्ते मुदा ॥ ४ ॥

चत्वारो वेदा चत्वार उपवेदाः । षडंगानि चत्वार्युपांगानि

DR.RUPNATHJI( DR.RUPAK NATH )

चेत्यष्टादश विद्यास्तत्र। धर्मब्रह्मप्रतिपादकमपौरुषेयं वाक्यं वेदः। स च मंत्रब्राह्मणात्मकः। ऋग्यजुःसामाथर्वसंज्ञैः पादैर्विशिष्टत्वाच्चतुष्पादनंतो यजुः संज्ञस्तं द्वापरे द्वापरे विष्णुर्व्यासरूपमादाय चतुर्धा कुरुते॥ तत्रास्मिन्वैवस्वते मन्वंतरे व्यासक्रमः। प्रथमः स्वयमेव ब्रह्मा। द्वितीयो मनुः०

Chapter i., which concludes with an account of the divisions and recensions of the *Ṛic*, ends fol. 4; ii. treating of the *Yajus*, fol. 6; iii. of the *Sāman*, fol. 7; iv. of the *Atharvan*, fol. 8; v.-vii. *Āyurveda*, *Kāmaśāstram*, *Dhanurveda*, *Gāndharvam*, *Kāvyam*, *Alaṅkāra*, *Nāṭyam*, *Prākṛitavyākaraṇam*, *Svarāḥ*, fol. 154; viii. *Arthaśāstram*, fol. 180*b*; ix. *Śikshā*, fol. 188*b*; x. *Kalpa*, fol. 189; xi. *Vyākaraṇam*, fol. 238; xii. *Niruktam*, fol. 152*b*; xiii. *Chandaḥ*, fol. 300*b*; xiv. *Jyotisham*, fol. 318*b*; xv. *Purāṇāni*, fol. 438*b*; *Bhāratam*, 455*b*; *Rāmāyaṇam*, 458; *Yoga-Vāsishṭham*, fol. 462*b*; xvi. *Nyāya*, fol. 505; *Vaiśeshika*, fol. 520*b*; xvii. *Pūrva-*, 570*b*; *Uttara-Mīmāṃsā*, *Śaṅkarācāryamatam*, fol. 644; *Rāmānujamatam*, 655*b*; *Madhvācārya*, fol. 662*b*; *Vallabhācārya*, 671; *Bauddhamatam*, *Digambara*, *Cārvāka*, fol. 688; xviii. *Dharmaśāstram*, 728*b*; *Tantramatam*, fol. 740; *Śāktamatam*, *Maheśvaramatam*, *Pāśupatamatam*, fol. 752; *Vaishṇava*, *Saura*, *Gāṇeśa*, etc., *Devārcanavidhi*, fol. 758; *Vaiśvadevam*, 764; *Pātraśuddhi*, 768; *Bhakshyābhakshyavidhi*, 770*b*; *Śayanavidhi*, etc., *Āhnikavidhi*, 771*b*; *Tithinirṇaya*, fol. 785*b*; *Kapilamatam*, *Nirīśvarasāṅkhyam*, fol. 801*b*; *Seśvara-Yogaśāstram*.

The work is of little use.

It ends (fol. 830*b*): इति श्रीमत्परमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपादशिष्यदत्तवंशावतंसरामकुमारसूनुधनपतिसूरिविरचिते विद्यारत्नाकराख्ये निबंधे ऽष्टादशस्तरंगः १८॥

Then follows an *anukramaṇikā*.

[H. T. Colebrooke.]

---

6. *Rāmānuja's Viśishṭādvaita.*

## 2460.

**567.** Foll. 248; size $12\frac{3}{4}$ in. by $4\frac{1}{2}$ in.; eleven lines in a page; writing middling.

*Śārīrakamīmāṃsābhāshya* or *Śrībhāshya*, a commentary on the *Vedāntasūtra*, by *Rāmānuja*, who followed the *Brahmasūtravṛitti* of *Bodhāyana*.

See Hall's Index, p. 92, no. xxiii. It was printed, together with *Sudarśana Ācārya's* commentary, at Madras in 1868 (4°. Telugu char.); and is being published again in the Bibl. Ind. Another edition, by *Rāma Miśra Śāstrī*, was begun in vol. vii., New Series, of the *Pandit*; a reprint from the *Pandit*, containing the first *pāda* of the first *adhyāya*, appeared in 1829 (vol. i.). For a legendary *Rāmānujacaritra* see Rāj. Mitra, Notices, v., p. 9, no. 1731. The chief date of his life is the erection of an image of *Nārāyaṇa* on the *Yādava Hill* in the Śaka year 1012. For an account of his system see Bhandarkar, Report, 1883-84, pp. 68-74; Vienna I.O.C., Ar. S., p. 100.

*Rāmānuja's Bhāshya* begins:

अखिलभुवनजन्मस्थेमभङ्गादिलीले
विनतविविधभूतव्रातरक्षैकदीक्षे।
श्रुतिशिरसि विदीप्ते ब्रह्मणि श्रीनिवासे
भवतु मम परस्मिन् शेमुषी भक्तिरूपा॥

पाराशर्य्यवचःसुधामुपनिषद्दुग्धाब्धिमध्योद्धृतां
संसाराग्निविदीपनव्यपगतप्राणात्मसंजीवनीम्।
पूर्व्वाचार्य्यसुरक्षितां बहुमतिव्याघातदूरस्थिताम्
आनीतां तु निजाक्षरैस्सुमनसो भौमा(ः) पिबन्त्वन्वहम्॥

भगवद्बोधायनकृतां विस्तीर्णां ब्रह्मसूत्रवृत्तिं पूर्व्वाचार्य्याः संचिक्षिपुस्तन्मतानुसारेण सूत्राक्षराणि व्याख्यास्यन्ते। श्री॥ अथातो ब्रह्मजिज्ञासा।

The first *adhyāya* ends fol. 126b, the second fol. 186a, the third fol. 232b.

DR.RUPNATHJI( DR.RUPAK NATH )

Fol. 219 is a leaf from another copy.

The copy was transcribed in संवत् १८२९.

[H. T. COLEBROOKE.]

## 2461, 2462.

**3262, 3263.** Foll. 215 and 183; size 11¾ in. by 5½ in.; good modern Devanāgarī writing; ten lines in a page.

*Śārīrakamīmāṃsābhāshya*, or *Śrībhāshya*, by *Rāmānujācārya*.

Vol. i. contains *pāda* 1; vol. ii. *pādas* 2-4 (of foll. 82, 70 and 31 resp.).

## 2463.

**7.** Foll. 396; size 13¾ in. by 4¼ in.; seven lines in a page; beautifully written.

*Mīmāṃsābhāshya*, an incomplete copy of *Rāmānuja's* commentary, the fourth *adhyāya* being wanting.

The first *adhyāya* ends fol. 225*b*, the second fol. 317*a*, the third fol. 396*b*.

[J. R. BALLANTYNE.]

## 2464.

**3274.** Foll. 81; size 10½ in. by 5⅜ in.; 19 or 20 lines in a page; good modern writing.

*Śārīrakamīmāṃsābhāshya*, an incomplete copy of *Rāmānuja's* commentary, containing the second (ends fol. 35), third (ends fol. 67) and fourth *adhyāyas*.

[A. C. BURNELL.]

## 2465.

**2797.** Foll. 46 (the leaves are put in the wrong way; one page of each leaf is left blank, every two leaves, as the original numbering shows, being intended to be pasted together; there is a double numbering in Sanskrit figures, one running from ३ to २४, the other, probably the original one, from २७ to ४८); size 11 in. by 4¼ in.; 11–14 lines in a page; good old writing, of the sixteenth century.

*Śrībhāshyavivriti*, a fragment of a short commentary on the *Śrībhāshya*. The beginning is lost. The second page, being 27*a* of the original numbering, contains *sūtra* 24 (ज्योतिश्चर०) of the first *pāda* of the first *adhyāya*. This first *pāda* ends fol. 31*a* of the original numbering: इति श्रीभाष्यविवृतौ प्रथमः पादः ॥ The second *pāda* begins: सर्वत्र=नैतद्युक्तं। वाक्यभेदो ऽपौरुषेये न दोषः (सर्वत्र is the beginning of the first *sūtra* of the second *pāda*). The last page contains the end of the third *pāda* of the first *adhyāya*.

[COLL. OF FORT WILLIAM.]

## 2466.

**332a.** Foll. 89; size 12¼ in. by 4½ in.; eleven lines in a page.

*Vedāntadīpa*, an exposition of the *Vedānta* according to the *Brahmasūtras*, by *Rāmānuja*. See Hall's Index, p. 95, no. xxxvi., Aufrecht's Oxford Cat., p. 221*b*, no. 536, Rāj. Mitra's Notices, ix., p. 221, no. 3141.

It begins:

श्रियः कांतोऽनंतो वरगुणगणैकास्पदवपुर्
हताशेषाऽवद्यः परमखपदो वाङ्मनसयोः ।
अभूमिर्भूमिर्यो नतजनदृशामादिपुरुषो
मनस्तत्पादाब्जे परिचरणसक्तं भवतु मे ॥ १ ॥

प्रणम्य शिरसाचार्यान् तदादिष्टेन वर्त्मना ।
ब्रह्मसूत्रपदांत(:)स्थवेदांतार्थः प्रकाश्यते ॥ २ ॥

अत्रेयं वेदविदां प्रक्रिया अचिद्वस्तुनः स्वरूपतः स्वभावतश्चात्यंतविलक्षणस्तदात्मभूतश्चेतनः etc.

The first *pāda* ends fol. 28*a*, the second fol. 48*b*, the third fol. 77*b*.



DR.RUPNATHJI( DR.RUPAK NATH )

Colophon: इति श्रीभगवद्रामानुजाचार्यविरचिते वेदांतदीपे चतुर्थस्याध्यायस्य चतुर्थः पादः समाप्तो ऽध्यायः ॥

Date: संवत् १८५० समैनाम कातिक । वदि १३ वारसुकर etc.

[H. T. Colebrooke.]

## 2467.

**1779.** Foll. 28; size $12\frac{3}{4}$ in. by 4 in.; excellent, modern Devanāgarī writing; European paper (water-mark 1859); five lines in a page.

*Vedāntatattvasāra*, by *Rāmānuja*.

It begins: श्रीमते रामानुजाय नमः॥ सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्मेत्यत्राद्वितीयशब्देन सजातीयादिभेदशून्याङ्गीकारे कथं तादृशस्य जगद्व्यापारः । मायाङ्गीकारेणेति चेत् किं तदानीं निर्विशेषज्ञानमात्रस्वरूपं ब्रह्म माया तिष्ठतीति जानाति न वा । जानाति चेत् ज्ञानमात्रस्य कथं ज्ञातृत्वं । न जानाति चेत् अज्ञात्वा कथमङ्गीकरोति । अपि च यत्किंचिच्छक्तियोगो मायाङ्गीकारानंतरमभ्युपेयते भवद्भिः । तत्पूर्वं मायाङ्गीकारानुगुणशक्त्यभ्युपगमे निर्विशेषत्वहानिः किं च तदानीं किं मायाविलक्षणं ब्रह्म उतावैलक्षण्येन मायात्मकं । यदि विलक्षणं वस्तुतः परिच्छेदादनंतत्वं ब्रह्मणो न स्यात् अथ मायात्मकं तर्ह्यङ्गीकारवचनं निरर्थकं ॥ ०

It ends:

> सगुणो निर्गुणो विष्णुर्ज्ञानगम्यो ह्यसौ स्मृतः ।
> न हि तस्य गुणाः सर्वे सर्वैर्मुनिगणैरपि ।
> वक्तुं शक्या वियुक्तस्य सत्त्वाद्यैरखिलैर्गुणैः ॥

एष आत्मा अपहतपाप्मा परास्य शक्तिर्विविधैव श्रूयते तत्त्वं नारायणः पर इत्यादिश्रुतिः स्मृतिः नारायणस्यैव परतत्त्वं दिव्यकल्याणगुणयोगेन सगुणत्वं प्राकृतहेयगुणराहित्येन निर्गुणत्वमिति विषयभेदवर्णनेन एकस्यैवावगमात् ब्रह्मद्वैविध्यं दुर्वचनं इति दिक ॥ इति श्रीरामानुजाचार्यविरचितं वेदांततत्त्वसारं संपूर्णम् ॥ शुभमस्तु ॥

The first few pages contain interlineary renderings by Ballantyne's hand.

This work is different from the *Vedāntasāra* described by Rāj. Mitra, Notices, ix., p. 222, no. 3142.

[J. R. Ballantyne.]

## 2468.

**3264.** Foll. 16; size $11\frac{3}{4}$ in. by $5\frac{5}{8}$ in.; good modern Devanāgarī writing; eleven lines in a page.

*Vedāntatattvasāra*, by *Rāmānujācārya*; a second copy.

## 2469.

**2011b.** Foll. 10; size $8\frac{1}{2}$ in. by $4\frac{5}{8}$ in.; 12–14 lines in a page; indifferent writing.

*Tattvamuktāvalī Māyāvādaśatadūshaṇī*, a refutation of the *advaita* theory, in a hundred and twenty verses, by *Gauḍa Pūrṇānanda Kavicakravartin*.

See Hall's Index, p. 160, no. ccci. The *Tattvamuktāvalī* is quoted in the *Rāmānujadarśana* of the *Sarvadarśanasaṃgraha*, p. 51 (Bibl. Ind.), cp. Aufrecht's Oxford Cat., p. 247*a*.

It begins:

> अनु(ग)तजनपालः क्रूरभूपालपालस्
> तरुणतरतमालश्यामलो नन्दबालः ।
> बहुकिरणविशालः सर्वशक्तिप्रवालः
> स जयति धृतमालः पुण्ड्रकोद्भासिभालः ॥ १ ॥
>
> पौराणिकोऽयं स्वमतानुसारि
> प्रातः पुराणं पठति प्रकामम् ।
> शृणोति भक्तः प्रणिधानपूर्वं
> ग्रन्थार्थतात्पर्यनिविष्टचेताः ॥ २ ॥
>
> जीवात्मनोरैक्यमतं विहाय भेदं
> तयोः स्थापयति स्म युक्त्या ।
> श्रुतिं स्मृतिं तत्र बहुप्रमाणं
> कृत्वानुमानं बहुधा तनोति ॥ ३ ॥
>
> जीवो ऽयं ब्रह्मणो भिन्नः परिछिन्नो यतः सदा ।
> इत्यादिबहुधा ज्ञेया अनुमानेषु हेतवः ॥ ४ ॥

The copy is dated: शके १७३२ प्रमोदे ज्येष्ठसिताष्टम्यां भानौ समाप्तिमगमत् ।

[J. Taylor.]

DR.RUPNATHJI( DR.RUPAK NATH )

7. *Madhvāċārya's Dvaitavidyā.*

## 2470.

**539b.** Foll. 18; size 9⅝ in. by 3½ in.; seven lines in a page.

*Kṛishṇāmṛitamahārṇava*, a poem of 235 *ślokas* in praise of *Kṛishṇa*, by *Ānandatīrtha*, disciple of *Śuddhānanda*.

*Ānandatīrtha* is also called *Ānandagiri*, *Ānandajñāna* (for other variations of this name see Aufrecht's Cat. Cat., p. 46), and *Madhva*. His name before initiation was *Vāsudevāċārya*. He died in the Śaka year 1119. Other particulars, a sketch of his system, and the Succession list of the High-priests of the *Mādhva* Sect, will be found in Bhandarkar's Report, 1882–83, pp. 16–19, and 202–208. Commentaries by *Ānandagiri*, on works of *Śaṅkara*, have been already noticed in nos. 2279, 2301.

It begins:

श्रीवेदव्यासाय नमः ॥ श्रीहनुमद्भीममध्वेभ्यो नमः ॥

अर्चितः संस्मृतो ध्यातः कीर्तितः कथित(:) स्तुतः ।
यो ददात्यमृतत्वं हि स मां रक्षतु केशवः । १ ॥

तापत्रये चासंतप्तं यदेतदखिलं जगत् ।
वक्ष्यामि शांतये तस्य कृष्णामृतमहार्णवं ॥ २ ॥

ते नराः पशवो लोके किं तेषां जीवनै(*r.* °ने) फलं ।
यैर्न लब्धा हरेर्दीक्षा नार्चितो वा जनार्दनः ॥ ३ ॥

The end is (cp. no. 2478):

यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं
बट् तद्दर्शितमित्थमेव निहितं देवस्य भर्गो महत् ।
वायो रामवचोनयं प्रथमकं पक्षो द्वितीयं वपुर्
मध्वो यत्तु तृतीयमेतदमुना ग्रंथः कृतः केशवे ॥ २३३ ॥

श्रीमदानंदतीर्थार्यसहस्रकिरणोदिता ।
गोनति(? *r.* गोमती)सततं सेव्या गीर्वाणी (? °णी)
[सिद्धिदा भवेत् ॥ २३४ ॥

यः सर्वगुणसंपूर्णः सर्वदोषविवर्जितः ।
प्रीयतां प्रीत एवालं विष्णुर्मे परमसुहृत् ॥ २३५ ॥

इति श्रीमदानंदतीर्थभगवत्पादाचार्यवर्योदाहृताः कृष्णामृत-महार्णवः समाप्तः ॥ श्रीहनुमद्भीममध्वांतर्गतश्रीरामकृष्णवेदव्या-सात्मकश्रीहयग्रीवश्रीलक्ष्मीनृसिंह ॥ श्रीवेंकटकृष्णार्पणमस्तु ॥

यादृशो(!) पुस्तकं दृष्ट्वा°
यदक्ष(रं) करभप(*r.* °भ्रष्टं) मात्र(ा)हीनं तु यद्भवेत् ।
तत्सर्वं क्षम्यतां देव नारायण नमोऽस्तु ते ॥

वदरीनारायणार्पणमस्तु आर्यावर्तैकदेशे = रौ द्रि सं° पुष्पकृष्णे त्रयोदश्यां इंदुवासरे ॥ श्रीविष्णुपूजास्तु ॥

[H. T. Colebrooke.]

## 2471.

**1935.** Foll. 167; size 10½ in. by 4 in.; 11–14 lines in a page; clear old writing, of the 17th century.

*Tattvaprakāśikā*, a commentary on *Ānandatīrtha's Brahmasūtrabhāshya*, by *Jayatīrtha Bhikshu*, disciple of *Akshobhyatīrtha*, the first and the second *adhyāyas*. *Jayatīrtha* was the sixth in the list of the high-priests of the *Mādhva* sect; he died in the Śaka year 1190, see Bhandarkar's Report, 1882–83, p. 203.

The commentary begins: श्रीवेदव्यासाय नमः ॥ श्रीमदानंदतीर्थभगवत्पादाचार्येभ्यो नमः ॥ निर्विघ्नमस्तु ॥

शुद्धानंदो(? दौघ)मंविद्युतिवलवहलौदार्यवीर्यादिदेहं
चिंतामंतापलेपोद्भवमृतिमुखराशेपदोषातिदूरं ।
सद्भिर्वैराग्यभक्तिश्रुतिमतिनियतध्यानजज्ञानयोगाद्
गम्यं वंदे मुकुंदाभिधममलमलं ब्रह्मवेदांतवेद्यं ॥ १ ॥

In the next verses some words are illegible, the writing being partly obliterated on the right side of the page. The 4th verse begins:

श्रीमध्वसंमेवनलब्धशुद्धविद्यासुधांभोनिधयो ... ॥ ४ ॥

श्रीमद्रमारमणसन्निरिपादसं(गं)
व्याख्याभिनादद्दलिताखिलदुष्टदर्पं ।
दुर्वादिवारणविदारणदक्षदीक्षम्
अक्षोभ्यतीर्थमृगराजमहं नमामि ॥ ५ ॥

अथ तत्कृपया ब्रह्मसूत्रभाष्यं यथामति ।
व्याकुर्वे श्रीमदानंदतीर्थार्यमुखनिःसृतं ॥ ६ ॥



DR.RUPNATHJI( DR.RUPAK NATH )

गंगासंगेन नैर्मल्यं रथ्याब्धिर्लभ्यते यथा ।
वाचो विष्णुद्विशुद्ध्यर्थं संगम्यते . . . . ॥ ७ ॥

अथाविद्यापटलपिहितनयनैरन्यैरन्यथा व्याख्यातानि ब्रह्मसूत्राणि यथाव(द् व्या)चिख्यासुर्भगवानाचार्यवर्यः प्रारिप्सितभाष्यस्य कैवल्याद्यखिलफलसाधनतासिद्ध्यर्थं निरतनाय(*r.* निरंतराय?)परिसमाप्त्याद्यर्थं च नारायणनमस्कारं ग्रथयति ॥ ग्रंथारंभं च प्रतिजानीते । नारायणमिति ॥

The first *adhyāya* ends fol. 71*a*.

Colophon: इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्ब्रह्मसूत्रभाष्यस्य टीकायां जयतीर्थभिक्षुविरचितायां तत्त्वप्रकाशिकायां द्वितीयाध्यायस्य चतुर्थः पादः ॥

[Dr. J. Taylor.]

## 2472.

**1662.** Foll. 69; size $8\frac{1}{2}$ in. by $3\frac{3}{4}$ in.; 8–10 lines in a page; fair writing, of the first half of the 17th century.

*Tattvoddyotavivaraṇa*, a commentary on *Ānandatīrtha's* (i.e. *Madhva's*) *Tattvoddyota*, by *Jayatīrtha Bhikshu*. The *Tattvoddyota* is a treatise on *Brahman*, soul and world, against the *māyā-vādins* and *śūnya-vādins*.

The *vivaraṇa* begins:

विश्वोत्पत्तिरिति ध्वंसकारणं रमणं श्रियः ।
अभिवंद्य यथाबोधं तत्त्वोद्योतं विवृणुमहे ॥ १ ॥

इहाविद्यातिमिरनिरंतरे संसारकांतारे परिखिन्नानामल्पास्थिरसुखखद्योतिकासु द्योतमानास्वपि मनःप्रसादमनासादयतामधिकारिणामनंतानंदनिदानस्य परमपुरुषतत्त्वोद्योतस्य सिद्धये समीहमानो भगवानाचार्यसूर्योंतरायविधुरोऽपि निरंतरायप्रारिप्सितपरिसमाप्त्यादेरंगमिष्टदेवताभिपूजनं शिष्यान् ग्राहयितुं प्रकरणादौ निबध्नाति ॥

सर्वत्राखिलसच्छक्तिः स्वतंत्रोऽशेषदर्शनः ।
नित्यातादृशचिच्चेत्ययंतेष्टो नो रमापतिः ॥ १ ॥

This *śloka* is the introductory verse of the *mūla*. The final *śloka* of the *mūla*, written by the author himself, is:

सत्यचिच्चेत्यपतये मुक्तामुक्तोत्तमाय ते ।
नमो नारायणार्यवृंदवंदितपदद्वयं(*sic!*) ॥

चिच्चेत्ययंतृतोपपादनं सत्येति । मुक्तामुक्तोत्तमायेति च । आर्येत्यादि तु नारायणस्यैव नम्यत्वोपपादनार्थमिहाशेषमतिमंगलं ॥

But *Ānandatīrtha* allowed some *ślokas* composed by his pupils to be added to his work. See the story, fol. 67*b*, l. 6: इतः परं भगवदाचार्यशिष्यप्रणीताः श्लोकाः । एवमत्र कथां कथयति । पुंडरीकवनाभिधानेन मायिना सह भगवत आचार्यस्य कथाप्रवृत्तौ सत्यां सभ्यसभापतिप्राश्निकेषु मीलितेषु आचार्यदर्शनमात्रेण भीतः प्रतिवादी तूष्णीं बभूव। तदाचार्येण तस्याकर्णयतः सतः मायामतनिकृंतनोप(न्या)सोऽयं निर्मितः । तच्छ्रवणेनात्यंतसंत्रस्तहृदयोऽसावपलायत । तदा त्वाचार्यशिष्याः प्रतिवादिभयंकरं भगवंतमाचार्यं तदभीष्टदेवतां नृसिंहं चोपश्लोकयां बभूवुः । ते च श्लोका अविच्छिन्नप्रवृत्तये शिष्यैरर्थितेन भगवता प्रकरणांते निवेशिताः। अत एव ते जाह्नवीजलानुगतयामुनोदकवत्प्रकरणांतर्गता एव । अना(*r.* अनेक)कर्तृकत्वान्न तेषामन्योन्यसंगतिः ।

आनंदतीर्थपुंसिंहो मायावादिदितेःसुतान्* ।
विदार्य युक्तिनखरैरप्रतीतोऽभिमासते ॥

पलायध्वं पलायध्वं त्वरया मायिदानवाः ।
सर्वज्ञहरिरायाति तर्कागमदरारिधृत्† ॥

द्रवत द्रवताशु मायिनः प्रविशध्वमतंद्रिता गुहाः ।
कमलारमणांवराश्रयः समुदेत्यखिलज्ञभास्करः† ॥

नृहरिः सकलनामकः(!) समुपैति हि मायिदानवान् ।
प्रपलायनमत्र तत्क्षमं त्वरया वा(*sic!*) वसतिर्गुहासु च†॥

जयत्यानंदतीर्थेष्टदेवता नरकेसरी ।
विपाटिताज्ञानतमःकपाटात्युरुहुंकृतः† ॥

जयत्यमितपौरुषः स्वजनतेष्टचिंतामणिः ।
अजेशमुखवंदितो गुणगणार्णवः श्रीपतिः ॥

जनता जनसमूहः । इष्टसिद्धौ चिंतामणिरिष्टे चिंतामणिः ॥

सर्वज्ञः सन्मुनींद्रोच्च(:) सन्मनःपंकजालयः ।
अजितो जयति श्रीशो रमाबाहुलताश्रयः ॥

रमाबाहुलतयोराश्रयो रमाबाहुलताश्रयः ॥

---

* The commentator says: मायावादिदितेःसुतानिति षष्ठ्या आक्रोश (*Pā.* vi. 3, 21) इत्यलुक् ।

† No explanation of this passage is given in the commentary.

DR.RUPNATHJI( DR.RUPAK NATH )

श्रीमदानंदतीर्थाय हृदयांभोजमंदिरः ।
कमलाश्लेषरसिकः प्रीयतां नः पुरः पुमान् ॥

इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचिततत्त्वोद्योतविवरणं जयतीर्थभिक्षुणा विरचितं समाप्तं ॥

कृष्णे भाद्रपदे मासि पंचम्यां भृगुवासरे ।
गिरिणा पुस्तकमिदं लिखितं रामतुष्टये ॥ १ ॥

कष्टेन पुस्तकमिदं लिखितमेवास्तु सतां ।
सज्जनैरवलोक्याथ यत्नेन परिपालयेत् ॥

॥ विरोधकृतसंवत्सरे ॥

[H. T. Colebrooke.]

## 2473.

**1725b.** Foll. 19; size 8 in. by 3½ in.; fair Devanāgarī writing of c. 1750 A.D.; nine lines in a page.

*Prapañcamithyātvānumānakhaṇḍana-vivaraṇa*, a commentary, by *Jayatīrtha Bhikshu*, on *Ānandatīrtha's Prapañcamithyātvānumānakhaṇḍana*, the text of which is also given. It begins:

नत्वा विश्वोदयस्थेमलयहेतुं पतिं श्रियः ।
कुर्मः प्रपंचमिथ्यात्वमानखंडनपीचकां(? r. पीठिकां) ॥

जन्माद्यस्य यत इति सूत्रेण जगदुदयादिनिमित्तकारणत्वं परस्य ब्रह्मणो लक्षणमभिहितं । न च जगत्सत्यतामंतरेण तद्वास्तवं संभवति । सापि न परोदीरितप्रपंचमिथ्यात्वप्रमाणस्याभासताव्युत्पादनेन विनोपपद्यत इति तदर्थमिदं प्रकरणमारभते भगवानाचार्यः । ननु कथं स्वपक्षसाधनेन विना निर्णयः । सत्यं । तथापि शास्त्रार्थैकदेशसंबंधित्वात्प्रकरणस्य न दोषः । विज्ञायते च कालातीतव्युत्पादनेन स्वपक्षसाधनप्रकारोऽपि अविगीतशिष्टाचारपारंपरादिप्राप्तं प्रारिप्सितपरिसमाप्त्यादिप्रयोजनं किमपि मंगलाचरणं प्रकरणादौ कस्मादाचार्यो नानुष्ठितवानिति चेत् । कथमेतदवगतं । अनुपलंभादिति चेत् । न । तात्कालिकस्य अधुनोपलब्धुमशक्यत्वात् । ग्रंथे निवेशनाभावस्तावत्प्रत्यक्ष इति चेत् । किमतः । न हि ग्रंथे निवेशनमेव तदनुष्ठानं । नापि तद्व्याप्तं । कायकवाक्चित्तानामनेकेषां भावात् । ग्रंथांतरनिवेशनादेव शिष्या अवगमिष्यंति । अत एव न तदनुष्ठाने संदेहोऽपीति । तत्र तावन्मायावादिनोदितं प्रपंचमिथ्यात्वानुमानमनुवदति । विमतं मिथ्या दृश्यत्वात् । यदित्थं तत्तथा यथा संप्रतिपन्नं । सर्वं मिथ्येत्युक्ते ब्रह्मणि प्रमाणाभावः । शुक्तिरजतादौ सिद्धार्थता च स्यादिति विमतमित्युक्तं ।०

It ends:

तद्वचनमुदाहरणं प्रसिद्धमेवेति ।
यत्प्रसादाद्यत्प्रीत्यैवेदं प्रकरणं ॥

कृतं तमेवाचार्योऽन्ते स्तुतिप्रणामाभ्यां प्रीणयति ।

यो दृश्यते सदानंदनित्यव्यक्तिचिन्नात्मना ।
निर्दोषाखिलकल्याणगुणं वंदे रमापतिं ॥

दृश्यत इत्यनेन दृश्यते त्वया बुद्ध्येत्यादिश्रुतिं सूचयति । तेन यदुक्तमात्मनोऽपि दृश्यत्वादिति तदुपपादितं च भवति ।०——।

उत्पत्तिस्थितिभंगं विश्वं यस्मात्प्रपद्यते पुरुषात् ।
स जगति जगदंतर्यामी मम रमानाथः ॥

इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचितप्रपंचमिथ्यात्वानुमानखंडनविवरणं जयतीर्थभिक्षुविरचितं समाप्तं ॥

For the text of the original treatise see Burnell, Tanjore MSS., p. 105*a*.

[H. T. Colebrooke.]

## 2474.

**1932.** Foll. 44; size 9½ in. by 4 in.; careless, modern Devanāgarī writing; 9 or 10 lines in a page.

*Dvaitasiddhi*, or *Dvaitavidyā*, a treatise on the dualistic doctrine of the *Vedānta*, by *Nirmalācārya*, pupil of *Śrīnivāsa*.

It begins:

निःसीमसुंदरं पूर्णं शक्तिपूर्वैगुणाकरं ।
ध्येयं ब्रह्मभवादीनां गोपवेषं हरिं भजे ॥ १ ॥

द्वैताद्वैतमते सम्यग् ज्ञात्वा नत्वा गुरोः पदं ।
प्रकाश्यते द्वैतविद्या ऽद्वैतसिद्धांतकृंतनी ॥ २ ॥

नन्वेतदयुक्तं । द्विविधं हि वेदांतवाक्यं । एकं पदार्थनिष्ठं । यथा सत्यं ज्ञानमनंतं ब्रह्म योऽयं विज्ञानमयः प्राणेषु हृद्यंतर्ज्योतिरित्यादि तत्त्वं पदार्थपरमपरं ऐक्यरूपवाक्यार्थनिष्ठं ॥ यथा तत्त्वमसीत्यादि । द्वयमप्यखंडार्थनिष्ठं । ब्रह्मविदाप्नोति परमित्यादौ किं तद्ब्रह्म कोऽयमात्मा कोऽहमस्मीति प्रस्तुतस्वरूपमात्रजिज्ञासायां सत्यादिवाक्यप्रवृत्तेर्विशिष्टार्थत्वे प्रामाण्यानिर्वाहात् ।०

It ends:

सर्वत्र चतुरध्याय्यां श्रीमध्वमतमीप्सतां ।
चिंत्यतां श्रीपतेः पादयुगलं तत्सुदाप्यतां ॥

DR.RUPNATHJI( DR.RUPAK NATH )

सम्यङ्मुनः समाधाय तात्पर्येणावलोक्यतां ।
निर्मलाचार्यरचना वचनार्थविदा मुदा ॥

इति श्रीमच्छ्रीनिवासाचार्यवर्यशिष्यनिर्मलाचार्यकृता द्वैतसिद्धिः समाप्ता ॥ [Dr. John Taylor.]

## 2475.

**1669.** Foll. 81; size 9 in. by 3⅝ in.; indifferent modern Devanāgarī writing; nine lines in a page.

*Paratattva-prakāśikā*, an exposition of the *Vedānta* system according to the views of *Ānandatīrtha*, by *Vijayīndra*, pupil of *Surendra*. See Hall's Index, p. 113, no. cxiii.

It begins:

क्रोधोद्यच्छटाग्रैः शिथिलितविगलत्तारकाहारहारी
नक्षत्रस्वच्छमुक्तावचलित[◡◡]विच्छन्नसच्छायकायः ।
रक्षोवक्षोविनिर्यत्क्षतजनिघुसृणालेपजातावलेपः
सो ऽव्यान्नो व्याजसिंहो मिलितजयरमो वीरभृंगार- [धारी ॥ १ ॥

कल्याणगुणपूर्णाय वल्लभाय श्रियः सदा ।
श्रीमध्वदेशिकेष्टाय श्रीनृसिंहाय ते नमः ॥ २ ॥ ० ॥

मूको ऽपि वाक्पतींद्रो जायते यदनुग्रहात् ।
श्रीसुरेंद्रगुरोस्तस्य पादौ नत्वा गिरं भवे ॥ ६ ॥

विजयींद्रयतींद्रेण विद्वदानंददायिनी ।
तन्यते तत्त्वविद्रीत्या परतत्त्वप्रकाशिका ॥ ७ ॥

इह नित्यनिर्दोषतयामकशिष्टैः(!) स्वीकृतप्रमाणभावेषु सदेव सौम्ये°

It ends: भयसमाधेयत्वादुपेक्षित इति सर्वमनवद्यमिति सिद्धांतसंक्षेप इति ॥

सुरेंद्रमुनिशिष्येण विजयींद्राख्यभिक्षुणा ।
नृसिंहप्रीतये ऽकारि परतत्त्वप्रकाशिका ॥

ये मीमांसकमुद्रया श्रुतिशिरस्तात्पर्यभूमिः परं
तत्त्वं श्रीहरिरेव नान्यदिति तन्निश्चेतुमुद्युंजते ।
तत्तत्त्वे दृढभक्तिसंपदमितः प्राप्तुं च तैरन्वहं
सेव्योऽयं विजयींद्रसंयमिवचोगुरुः(*r*.° ग्रंथः ?) सुधा- [स्वादिमा ॥ २ ॥

इति श्रीपरतत्त्वप्रकाशिका समाप्ता ॥

[H. T. Colebrooke.

## 2476.

**2022.** Foll. 93; size 9¼ in. by 3¾ in.; indifferent, modern Devanāgarī writing; ten lines in a page.

*Tarkatāṇḍava*, a treatise on the dualistic *Vedānta* theory, by *Vyāsayati*, pupil of *Brahmaṇyatīrtha*, the *Anumānapariccheda*. *Vyāsayati* died in 1339, see Aufrecht, Cat. Cat., p. 619.

It begins: एवं तन्मुख्यं ज्ञानशब्दयोरिति अनुप्रमाणेषु वेदरूपः शब्दः प्रमाणमित्युक्तत्वात्तदनुग्राहकमनुमानमुच्यते ॥ निर्दोषोपपत्तिरनुमा । उपपत्तिर्व्याप्यं । निर्दोषत्वेन विशेषणात्तासिद्धादावतिव्याप्तिः । उक्तं हि पद्धतौ । उपपत्तिर्लिंगं व्याप्यमिति पर्याया इति । °

परोक्तव्याप्तिलक्षणभंगः fol. 11*a*; खंडनोक्तव्याप्तिनिश्चयानुपपत्तिभंगः fol. 16*a*; प्रमेयत्वाभिधेयत्वयोर्व्याप्तिग्रहे खंडनोक्तसाध्यप्रसंगभंगः fol. 18*b*; परोक्तपक्षलक्षणभंगः fol. 21*a*; उदयनाद्युक्तोपाधिलक्षणभंगः fol. 26*a*; मण्युक्तोपाधिलक्षणभंगः fol. 30*b*; तार्किकोक्ततृतीयज्ञाननियमभंगः fol. 34*a*; प्राभाकरोक्तज्ञानद्वयहेतुत्वभंगः fol. 37*b*; मण्युक्तपरामर्शप्रक्रियाभंगः fol. 38*b*; व्यापकत्वपरामर्शस्यानुमितिहेतुत्वभंगः fol. 39*a*; केवलव्यतिरेकिभंगः fol. 53*b*; अत एव विष्णुतत्त्वनिर्णयटीकायां° fol. 56*a*; पंचावयववादिनियमभंगः fol. 60*b*; अप्रसिद्धविशेषणत्वस्य दोषत्वभंगः fol. 73*a*; व्यधिकरणासिद्धे दोषत्वभंगः fol. 75*a*; गौतमोक्तहेत्वाभासपंचत्वभंगः fol. 79*a*; मण्युक्तहेत्वाभाससंकरभंगः fol. 86*b*; मणिकंठोक्तहेत्वाभाससंकरभंगः fol. 90*b*; लीलावत्युक्तहेत्वाभासचातुर्विध्यभंगः fol. 92*a*; भासर्वज्ञोक्तहेत्वाभाससाप्तविध्यभंगः fol. 92*b*.

It ends: एतदेवाभिप्रेत्योक्तं प्रमाणलक्षणे । असिद्धिरव्याप्तिरिति हेतुविरोध इति ॥ सामान्येन परोक्तहेत्वाभासनियमभंगः ॥ – – ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्याणां श्रीमत्ब्रह्मण्यतीर्थपूज्यपादानां शिष्येण व्यासयतिना विरचिते तर्कतांडवे ऽनुमानपरिच्छेदः ॥ [Dr. J. Taylor.]

## 2477.

**539c.** Foll. 30; size 9⅝ in. by 3¾ in.; 10–14 lines in a page; clumsy writing of the beginning of the 19th century.

DR.RUPNATHJI( DR.RUPAK NATH )

*Tattvasāra*, a *paurāṇik* poem on *sṛishṭi* and *mukti* of beings, in 12 *adhyāyas*, by a follower of *Madhva*. Foll. 4*b*, 25*b*, and in the last colophon, it has the epithet, "*Sūta-Śaunaka-saṃvāda*."

It begins:

The work consists of ten chapters (*ullāsa*), viz.: 1. fol. 10b; 2. *sādhyabhaktinirūpaṇam*, fol. 15b; 3. *bhaktirasanirūpaṇam*, fol. 25a; 4. *vibhāvādinir.*, fol. 39a; 5. *śāntabhaktirasanir.*, fol. 44a; 6. *prītabhaktirasavivaraṇam*, fol. 48b; 7. *sakhyabhaktirasanir.*, fol. 50b; 8. *vatsalabhaktirasanir.*, fol. 51a; 9. *ujjvalabhaktirasanir.*, fol. 54b; 10. (*maitrīvairavivecanam*) ends fol. 60b: भरतमुनिनाप्युक्तं। रसाभासा अनौचित्यप्रवर्तिता इति । एवमन्यदूह्यं इति कलियुगपावनावतारः ॥ श्रीमदद्वैतवंशश्रीराधामोहनगोस्वामिविरचिते कृष्णभक्तिरसोदये दशम उल्लासः । समाप्तो ऽयं ग्रन्थः ॥ Cp. Rāj. Mitra, Notices, iii. no. 1192. [H. T. Colebrooke.]

## 2506.

**2486.** Foll. 249 (five of which, 124–128, are wanting), and two *śuddhapattras* (after 62 and 82 resp.); size 11½ in. by 4½ in.; fairly written, in Devanāgarī, about 1550 A.D. (fol. 61 supplied by a later hand); 8–11 lines in a page.

*Vishṇubhakticandrodaya*, another work on the same subject, in sixteen chapters (*kalā*), by *Nṛisiṃhāraṇya Muni*.

It begins:

वन्दे [ऽहं] श्रीनृसिंहेशं पुण्यारण्यं गुरूत्तमं ।
श्रीसाममन्त्रराजं (!) च वैष्णवान्हार्द्दि (°वाह्लाद)सिद्धये॥

आविर्बभूव लोके ऽस्मिन् सद्भक्त्याह्लाददायकः ।
श्रीविष्णभक्तिचंद्रो ऽयं विष्णुप्रेमाब्धिवर्धनः ॥

यस्य (तस्य R. M.) श्रुतेरेककलात्मकस्य
हन्याद्य(हृद्याद R. M.)नेकाद्यतमः प्रबंधः ।
शैथिल्यमेतौंद्रियवातयात्या(शान्त्या R. M.)
नानांतरायाभ्रमतौ हतायां ॥

वक्ष्ये निरंतराशेषदुर्जन्माधकारविध्वंसनं ।
स्मृत्वा प्रणम्य चादौ गुरुं श्रीविष्णुभक्तिचंद्रोदयं ॥

संसारानलनिर्विण्णो मनीषी स्वार्थसिद्धये ।
संसारासारतां ज्ञात्वा गुरुं शरणमाव्रजेत् ॥

गुरुसेवारतः शिष्यः स्निग्धः सर्वनिवेदकः ।
गुरुष्वीश्वरभावश्च दंडवत्प्रणमेद्गुरुं ॥

अप्रमत्तोद्यतः शश्वद्गुर्वाज्ञां शिरसा मुदा ।
गृह्णन्परिचरेद्भक्त्यानवज्ञस्तोषयन्गुरुं ॥

तथा चोक्तानि श्रीमद्भागवते श्रीभगवता उद्धवं प्रति शिष्यलक्षणानि ।°

No authorities, except *Purāṇas*, *Bhagavadgītā*, *Vishṇurahasya*, *Vaishṇavatantra* (fol. 93b), and suchlike works have been met with.

For the contents of the work, cp. Rāj. Mitra, Notices, viii., p. 279.

The MS. is not quite complete, the 16th *kalā* beginning on fol. 146b; and the last leaf breaking off at ॥ अथ फाल्गुने मासि श्रीविष्णोः—

[Gaikawar.]

## 2507.

**735.** Foll. 158; size 13 in. by 4¼ in.; clear, modern Bengalī handwriting; eight lines in a page.

*Vishṇubhaktidarpaṇa*, or *Vishṇudarpaṇa*, another compendium of devotional worship, in fifteen chapters, by *Upendrācārya*.

I. वासुदेवादिका मूर्तीर्दधानं परमं पदं ।
नारायणं शास्त्रयोनिं नमामि हरिमीश्वरं ॥

गुरुं प्रणम्य श्रीविष्णुं पूजनं परमात्मनः ।
अष्टाङ्गभक्तियोगाढ्यं मन्त्रैरष्टाक्षरादिकैः ॥

दृष्ट्वा तन्त्रपुराणानि मतं भागवतस्य च ।
मन्त्रार्थकथनोपेतं लिखिष्यामि यथामति ॥

यमाश्च नियमाश्चैव आसनं प्राणसंयमः ।
प्रत्याहारो धारणा च ध्यानं समाधिरेव च ॥

अष्टावङ्गानि योगस्य भक्तैर्भक्तिविदो विदुः ।
अहिंसाद्या यमाः प्रोक्ताः शौचाद्या नियमा मताः ॥

DR.RUPNATHJI( DR.RUPAK NATH )

अहिंसा सत्यमस्तेयमसङ्गो ह्रीरसंचयः ।
आस्तिक्यं ब्रह्मचर्यं च मौनं स्थैर्यं क्षमार्जवं ॥
शौचं जपस्तपो होमः श्रद्धातिथ्यं मदर्पणं (? मृद° = गो-
तीर्थाटनं परार्थेहा तुष्टिराचार्यसेवनं ॥ [पोमृत्तिका) ।
एते यमाः सनियमा उभयोर्द्वादश स्मृताः ।
आसनं स्वस्तिकाख्यं स्याद्वीरासनमथापि वा ॥°

II. अथ दीक्षां लिखिष्यामि सर्वशक्त्यां कलावतीं ।
दीक्षां विना पशुत्वं हि विप्रस्य न निवर्तते ॥ fol. 10*b*.

III. भक्त्यंगान्यथ वक्ष्यामि भक्तानां चैव लक्षणं ।
नैष्कर्म्यं पापशुद्धिं च विष्णुभक्तेश्च नित्यतां ॥ 20*b*.

IV. अथ साधनयोगस्य माहात्म्यं लिख्यते ऽधुना ।
यथा दृष्टं पुराणेषु श्रुत्वा जननमुत्तमं ॥ 30*b*.

V. अथ प्रणम्य विश्वेशं विधानं सार्वमन्त्रिकं ।
प्रातःप्रभृति सायान्तं लिखिष्यामि यथामति ॥ 43*a*.

VI. पीठन्यासं विधायैवं तत्र विष्णुं स्मरेत्प्रभुं ।
स्वाधिष्ठानसमुद्भूतनादेन प्रणवात्मना ॥ 56*b*.

VII. अथ विज्ञानमानन्दं ब्रह्म नत्वा महेश्वरं ।
पूजायां तस्य मन्त्राणां प्रकाशाद्यथ कथ्यते ॥
एको नारायणो देवः सर्वः सर्वेश्वरो विभुः ।
भक्तानां कार्यसिद्ध्यर्थं चतुर्मूर्तिर्महीयते ॥ 68*a*.

VIII. सत्यं ज्ञानमनन्तं यज्जन्माद्यस्य यतो भवेत् ।
तं विष्णुमव्ययं पूर्णं प्रणम्य जगदीश्वरं ॥
द्वादशाक्षरमन्त्रस्य वक्ष्यामि विधिमुत्तमं ।
भक्तानुग्रहणार्थाय वासुदेवेति यं विदुः ॥
वेदादिर्हृदयं तेऽन्तो भगवान्वालहंसकौ ।
नारायणविष्णुयुक्तो सत्यतुष्टेन संयुत(?) ॥ 78*b*.

IX. अथ प्रणम्य विश्वेशं भवबन्धप्रमच्युतं ।
विधानं तस्य पूजाया यथोक्तं लिख्यते ऽधुना ॥ 89*b*.

X. अथ सत्तानन्दमयं ब्रह्म नत्वा महेश्वरं ।
लिख्यते तस्य पूजाया विधानं कलितारणं ॥ 97*a*.

XI. ङ्लीं* च कृष्णगोविन्दौ मन्त्राद्यौ मदनादधः ।
अष्टादशाक्षरो मन्त्रो भक्तानां सुरपादपः ॥ 106*b*.

* The guttural nasal here may possibly be intended for the nasal sound which occurs in many of the formulas in this and several other chapters, *e.g.* ॐ प्रद्युम्नाय । ॐ अनिरुद्धाय नमः । श्रीँ श्रियै नमः । ॐ सोममण्डलाय नमः ॥

XII. अथ संक्षिप्तबुद्धीनां विधानं सार्वमन्त्रिकं ।
यथामति लिखिष्यामि मालाशुद्धिं पुरस्क्रियां ॥ 114*a*.

XIII. अथ पौराणिकैर्मन्त्रैरुपचारविधिं ब्रुवे ।
महापूजाविधानेन गृहदानविधिं तथा ॥ 123*a*.

XIV. अतः परं लिखिष्यामि शयनोत्थापनादिकं विधिं ।
श्रीहरेर्जागरं पुण्यं वैष्णवानि व्रतानि च ॥ 141*a*.

XV. अथ श्रीभागवतोक्तपयोव्रतपद्धतिर्लिख्यते । तत्र फाल्गुनामावास्यायां ब्राह्मे मुहूर्ते उत्थितः कृतमैत्रादिः श्रोतजले स्नानसंकल्पं कृत्वा° fol. 157*a*.

It ends: ततो यजमान आचार्यादिभ्यो यथाशक्ति वित्तशाठ्यं वर्जयित्वा दक्षिणां सुवर्णं तदर्धं पादं वा दत्त्वा तानन्यानपि ब्राह्मणान् सगुणान भोजनेन भोजयेत् । यथाशक्ति च चाण्डालादिभ्यो ऽप्यन्नभोजनं दद्यात् । ततो ऽच्छिद्रमवधार्य बन्धुभिः सह भुञ्जीत । व्रतेनानेन भगवन्तमाराध्य सकलयज्ञव्रततपसां सिद्धिमाप्य भगवल्लोकमाप्नुयात् ॥ इति श्रीभागवतोक्तपयोव्रतविधिः समाप्तः ॥ इति श्रीमानुपेन्द्राचार्यविरचितं श्रीविष्णुदर्पणं समाप्तं ॥

The other colophons run: इति विष्णुभक्तिदर्पणे (प्रथमः) परिच्छेदः (corrected everywhere for original पटलः). [H. T. Colebrooke.]

DR.RUPNATHJI( DR.RUPAK NATH )

## 2508.

**823e.** Foll. 38; size $12\frac{3}{4}$ in. by $4\frac{1}{2}$ in.; fair, modern Bengalī handwriting; six lines in a page.

*Haribhaktikalpalatikā*, a treatise, by *Kṛishṇa Sarasvatī*, on the nature of '*bhakti*' and the various grades of it through which the votaries of *Kṛishṇa* have to pass before attaining perfection of faith.

It begins:

सर्वात्मानमशेषलोकपितरं सर्वेश्वरं शाश्वतं
यं नो वेत्ति जगन्निवासममृतं यन्मायायान्धं जगत् ।
यं ज्ञात्वा कृतिनो विशन्ति परमानन्दावबोधं च यं
तं भक्तप्रियबान्धवं शरणदं वन्दे मुरद्वेषिणं ॥ १ ॥
व्रजस्त्रीणां प्रेमप्रणयहृदयो वा किमथवा
कृपायुक्तो भक्तेष्वसुरनिधनश्लाघ्यनिपुनः ।
अपि स्वात्मारामो य इह विजिहीर्षुर्व्रजमगात्
तमानन्दं वन्दे नवजलदजालोदरनिभं ॥ २ ॥

असत्यमपि संसारं यद्भक्तिः सत्यतां नयेत् ।
गोपीनां सदयानन्दं तमानन्दमुपास्महे ॥ ३ ॥

पुण्याम्भोधिभवा तमोविघटिनी सत्सङ्गमूलोत्तमा
  श्रद्धापल्लविनी विविक्तिकलिकाप्रेमप्रसूनोज्ज्वला ।
सान्द्रानन्दरसावहं च परमज्ञानं फलं बिभ्रती
  सेयं श्रीहरिभक्तिकल्पलतिका भूयात्सतां प्रीतये ॥ ४ ॥

The work is divided into fourteen *stavakas*, viz.: I. (verses 46) on the nature of the god; II. (vv. 78) on the kinds of worshippers; III. (vv. 17) on the nine grades of *bhakti*, to each of which is devoted one of the succeeding chapters; IV. (vv. 21) on *śravaṇa*, the recital of *Hari's* actions and sayings; V. (vv. 60) on *kīrtana*, invocation of his names and eulogizing of his qualities; VI. (vv. 34) on *smaraṇa*, or conception of *Kṛishṇa* as the aggregate of all that delights the human heart; VII. (vv. 27) on *pādasevana*, or paying tribute of admiration by meditating on his acts and offering magnificent presents; VIII. (vv. 48) on *arcana*, or worshipping him by sixteen different kinds of offerings, such as *tulasī*, etc.; IX. (vv. 12) on *vandana*, or prostration before the deity; X. (vv. 19) on *dāsya*, or complete absorption of soul and mind in the divine being; XI. (vv. 5) on *sakhya*, or love for the deity; XII. (vv. 10) on *ātmanivedana*, or annihilation of one's individuality and becoming one with *Kṛishṇa*; XIII. (vv. 13) on knowledge of the divine; XIV. (vv. 19) on the atonement for transgressions and relapses of the soul.

Occasionally explanatory remarks are inserted between the verses, in which the author speaks of himself in the third person, as to what the succeeding verses are intended to show.

It ends:

ये शृण्वन्ति पठन्ति वानिशमिदं भक्तिप्रबोधामृतं
  ये वा साधु निरूपयन्ति भगवद्भक्तेषु निर्मत्सराः ।
ते निर्धूय भवान्धकारमखिलं भक्तिप्रबोधामृतं
  सान्द्रानन्दमनावृतं तदमृतं विन्दन्ति विष्णोः पदं ॥ १९ ॥
इति श्रीहरिभक्तिकल्पलतिकायां चतुर्दशस्तवकः ॥ १४ ॥
श्रीकृष्णसरस्वतीविरचितो ग्रन्थः संपूर्णः ॥

[H. T. Colebrooke.]

## 2509.

**827b.** Foll. 18; size $12\frac{7}{8}$ in. by 5 in.; good, modern Bengalī handwriting; seven lines in a page.

*Bhaktilaharī*, apparently a work of a similar nature, by *Maṇirāma*. This MS. contains only the fourth chapter (*viśvasamuddeśa-taraṅga*), explaining the evolution of the universe, with the heaven of *Vishṇu* as the crowning of the edifice. It begins:

गुरुं विश्वेश्वरं कृष्णं प्रणिपत्य प्रणीयते ।
मणिरामेण विश्वस्य समुद्देशो यथामति ॥ १ ॥
नित्यस्थलजलादीनां तेजसा पञ्चमस्य च ।
सुतानध्वनिना सार्धं ज्योतिरुत्पद्यते महत् ॥ २ ॥
उभाभ्यां जडितीभूय व्याप विष्टो दिशो दश ।
विरेजे सूक्ष्मरूपेण विराट् तेन निगद्यते ॥ ३ ॥
शब्दस्वरूपा प्रकृतिर्ज्योतीरूपस्तु पूरुषः ।
प्रकृतेः समवायाद्वै तेजसश्चोपपद्यते ॥ ४ ॥
तेजोयोगाद्विभिन्नः सन् प्राज्ञः साक्षी निरञ्जनः ।
अव्याहताज्ञप्रकृतिराद्या सृष्टिविधायिनी ॥ ५ ॥
जिह्वारमणयोगात्सा गुणाः(?r.गुणान्) सत्त्वं रजस्तमः ।
पञ्चभूतानीन्द्रियाणि संभृतान्यसृजन्मुहुः ॥ ६ ॥
गुणास्तन्मात्रसहितैः पञ्चभूतैः समन्ततः ।
इच्छाज्ञानक्रियाभिस्ते ब्रह्माणं प्रकृता अजः (!) ॥ ७ ॥

It ends:

ब्रह्मलोकश्च वैकुण्ठः शिवलोकस्ततः परः ।
शक्तिलोकस्तु गोलोको महामायाभिधः परः ॥ २३३ ॥
गुरुलोकः सप्तविधः सत्यलोकः प्रकीर्तितः ।
गोलोकाद्गुरुलोकान्तं पञ्चाशत्कोटियोजनं ॥ २३४ ॥
इति विश्वसमुद्देशः संक्षेपात्कथितो मया ।
विस्तरेण सहस्रास्यो वक्तुं नैव क्षमो भवेत् ॥ २३५ ॥
इति भक्तिलहर्यां विश्वसमुद्देशो नाम चतुर्थस्तरङ्गः ॥

[H. T. Colebrooke.]

DR.RUPNATHJI(DR.RUPAK NATH)

## 2510.

**939b.** Foll. 10; size 12¾ in. by 4¼ in.; fair, modern Bengalī handwriting; eight lines in a page.

*Gauragaṇoddeśadīpikā*, or *Gaurāṅgagaṇoddeśadīpikā*, an account of the chief disciples of *Caitanya* (*Gaura, Gaurāṅga*), and the reformer's own mythic succession; composed, in 1544 A.D., by *Paramānandadāsa*, usually called *Kavikarṇapūra*, son of *Śivānanda Sena*; and pupil of *Śrīnātha*.

It begins: श्रीचैतन्यचन्द्राय नमः ॥

य: श्रीवृन्दावनभुवि पुरा सच्चिदानन्दसान्द्रो
  गौराङ्गीभिः सदृशरुचिभिः श्यामधामा ननर्त ।
तासां शश्वद् दृढतरपरीरम्भसंभेदतः किं
  गौराङ्गः सन् जयति स नवद्वीपमालम्बमानः ॥ १ ॥

नमस्यामोऽस्यैव प्रियपरिजनान् वत्सलहृदः
  प्रभोरद्वैतादीनपि जगदघौघक्षयकृतः ।
समानप्रेमाणः समगुणगणास्तुल्यकरुणाः
  स्वरूपाद्या येऽमी सरसमधुरास्तानपि नुमः ॥ २ ॥

गुरुं तं श्रीनाथाभिधमवनिदेवाद्वयविधुं
  नुमो भूपारत्नं भुव इव विभोरस्य दयितं ।
यदा स्यादुन्मीलन्निरवकरवृन्दावनरहः
  कथास्वादं लब्धा जगति न जनः क्वापि रमते ॥ ३ ॥

पितरं श्रीशिवानन्दं सेनवंशप्रदीपकं ।
वन्देऽहं परया भक्त्या पार्षदाग्र्यं महाप्रभोः ॥ ४ ॥

ये विख्याताः परीवाराः श्रीचैतन्यमहाप्रभोः ।
नित्यानन्दाद्वैतयोश्च तेषामपि महीयसां ॥

गोपालानां च पूर्वाणि यानि नामानि कानिचित् ।
स्वस्वग्रन्थे स्वरूपाद्यैर्दर्शितान्यादिसूरिभिः ॥

विलोक्यान्यानि साधूनां मथुरागौडनिवासिनां ।
गौडीयानामपि मुखान्निशम्य स्वमनीषया ॥

विविच्याम्रेडितः कैश्चित् कश्चितानि लिखाम्यहं ।
नाम्ना श्रीपरमानन्ददासः सेवितशासनः ॥

यद्वत्पुरा कृष्णचन्द्रः पञ्चतत्त्वात्मकोऽपि सन् ।
प्राज्ञः प्रकटतां तद्वद्गौरः प्रकटतामियात् ॥

स्वाभिन्नेन युतं तत्त्वं पञ्चतत्त्वमिहोच्यते ।
अन्यथा तदसंबन्धात्तत्त्वं स्याच्चतुष्टयं ॥

तद्भिन्नं यन्नदेवात्र तदभिन्नं विभाव्यते (°तां Tüb.) ।
यतः स्वशक्त्येच्छयया (स्वयेच्छया शक्त्या T.) कृष्णस्तादृ-
स्वरूपचरणैरुक्तं पञ्चतत्त्वनिरूपणे । [शतां गतः ॥
उपाधिभेदात्पञ्चत्वं तत्त्वस्येह प्रदर्श्यते ॥

पञ्चतत्त्वात्मकं कृष्णं भक्तरूपस्वरूपकं ।
भक्तावतारं भक्ताख्यं नमामि भक्तशक्तिकं ॥

अस्य विवृतस्तैस्तैः स संक्षिप्य विलिख्यते ।
भक्तरूपो गौरचन्द्रो यतोऽसौ नन्दनन्दनः ॥
भक्तस्वरूपनित्यानन्दः (!) विश्वरूपश्च मुख्यकः ।
भक्तावतार आचार्याद्वैतो यः श्रीसदाशिवः ॥
भक्ताख्याः श्रीनिवासाद्या यतस्ते भक्तरूपिणः ।
भक्तशक्तिर्द्विजाग्रण्यः श्रीगदाधरमुख्यकः ॥
श्रीमद्विश्वम्भराद्वैतनित्यानन्दावधूतकाः ।
अत्र त्रयः समुन्नया विग्रहाः प्रभवश्च ते ॥
एको महाप्रभुर्ज्ञेयः श्रीचैतन्यो दयाम्बुधिः ।
प्रभू द्वौ श्रीयुतौ नित्यानन्दाद्वैतौ महाशयौ ॥
गोस्वामिनश्च विज्ञेयास्ते द्विजश्च गदाधरः ।
पञ्चतत्त्वात्मका एते श्रीनिवासश्च पण्डितः ॥
यदुक्तस्तत्र गोस्वामी श्रीस्वरूपपदाम्बुजैः ।
त्रयोऽत्र विग्रहाः ज्ञेयाः प्रभवश्चात्र ते त्रयः ॥
एको महाप्रभुर्ज्ञेयो द्वौ प्रभू संमतौ मतौ ।
गोस्वामिनश्च चत्वारो वाच्याः प्रथमपुत्रवत् ॥
एषां पार्षदवर्गा ये महान्तः परिकीर्तिताः ।
नित्यानन्दगणाः सर्वे गोपालाश्चोपगोपकाः ॥
एषां संबन्धसंपर्कादुपगोपालसत्तमाः ।
तत्र श्रीमन्नवद्वीपे विश्वंभरसमीपतः ॥

विलसन्ति स्म ते ज्ञेया वैष्णवा हि महत्तमाः ।
नीलाचले च ये ख्यातास्ते हि ज्ञेया महत्तराः ॥
दक्षिणादिदिशां याने यैर्यैः सङ्गो महाप्रभोः ।
ते ते महान्तो मन्तव्याः परे ज्ञेयाः स्वयोग्यतः ॥
अतः स्वरूपचरणैरुक्तं गौरनिरूपणे ।
पञ्चतत्त्वस्य संपर्का ये ये ख्याता महत्तमाः ।
ते ते महान्तो गोपालाः स्थानाच्छेष्यादिवाचकाः ॥

रसज्ञाः श्रीवृन्दावनमिति यमाहुर्बहुविदो
  यमेतं गोलोकं कतिपयजनाः प्राहुरपरे ।
श्वेतद्वीपं प्राहुः परमपि परे व्योम जगदुर्
  नवद्वीपः सोऽयं जयति परमाश्चर्यमहिमा ॥



DR.RUPNATHJI( DR.RUPAK NATH )

तस्मिन्नामसुरीचकार नृहरिर्विश्वंभराख्यं दधत्
तच्चेष्टावशत: समस्तमहतां वासो ऽपि तत्राभवत् ।
तै: साकं महतो हरेरनु गुणाकारापि लीलाभवत्
तत्रासीज्जगतां मनो ऽपि परमानन्दाय मन्दं यत: ॥

य: सत्ये (ऽ)सितवर्णमादधदसौ श्रीहंसनामाभवत्
त्रेतायां मखभुग्मखाख्य उचितो ऽभूद्रक्तवर्णं दधत् ।
य: श्यामो दधदासवर्णकममुं श्यामं युगे द्वापरे
सो ऽयं गौरविधुर्विभाति कलयन्नानावतारं कलौ ॥

प्रादुर्भूता: कलियुगे चत्वार: सांप्रदायिका: ।
श्रीमाध्वीरुद्रसनका भवा: पाद्मे यथा स्मृता: ॥

अत: कलौ भविष्यन्ति चत्वार: संप्रदायिन: ।
श्रीमाध्वीरुद्रसनका वैष्णवा: क्षितिपावना: ॥

तत्र माध्वीसंप्रदाय: प्रस्तावात्परिलिख्यते ।
परव्योमेश्वरस्याभूच्छिष्यो ब्रह्मा जगत्पति: ॥

तस्य शिष्यो नारदो ऽभूद् व्यासस्तस्याप शिष्यतां ।
शुको व्यासस्य शिष्यत्वं प्राप्तो ज्ञानाववोधनात् ॥

तस्य शिष्या: प्रशिष्याश्च बहवो भूतले स्थिता: ।
व्यासाल्लब्धकृष्णदीक्षो मध्वाचार्यो महायशा: ॥

चक्रे वेदान् विभज्यासौ संहितां शतदूषणीं ।
निर्गुणाद् ब्रह्मणो यत्र सगुणस्य परिष्क्रिया ॥

तस्य शिष्यो ऽभवत् पद्मनाभाचार्यो महाशय: ।
तस्य शिष्यो नरहरिस्तच्छिष्यो माधवो द्विज: ॥

पद्मनाभस्तस्य शिष्यो ऽभूत् (!) तच्छिष्यो जयतीर्थक: ।
तस्य शिष्यो ज्ञानसिन्धुस्तस्य शिष्यो महानिधि: ॥

विद्यानिधिस्तस्य शिष्यो राजेन्द्रस्तस्य सेवक: ।
जयधर्मो मुनिस्तस्य शिष्यो ऽभूद् गणमध्यत: ॥

श्रीमद्विष्णुपुरी यस्य भक्तिरत्नावली कृति: ।
जयधर्मस्य शिष्यो ऽभूद् ब्रह्मण्य: पुरुषोत्तम: ॥

व्यासतीर्थस्तस्य शिष्यो यश्चक्रे विष्णुसंहितां ।
श्रीमांल्लक्ष्मीपतिस्तस्य शिष्यो भक्तिरसाश्रय: ॥

तस्य शिष्यो माधवेन्द्रो यद्धर्मो ऽयं प्रवर्तित: ।
कल्पवृक्षस्यावतारो व्रजधामनि तिष्ठत: ॥

प्रीतप्रेयोवत्सलतोज्ज्वलाख्यफलधारिण: ।
तस्य शिष्यो ऽभवच्छ्रीमानीश्वराख्यपुरी यति: ॥

कलयामास शृङ्गारं य: शृङ्गारफलात्मक: ।
अद्वैत: कलयामास दाससख्ये फले उभे ॥

श्रीमान् रङ्गपुरीति सद्वात्सल्ये यत्समाश्रित: ।
ईश्वराख्यपुरीं गौर उररीकृत्य गौरवे ॥

जगदाप्लावयामास प्राकृताप्राकृतात्मकं ।
स्वीकृत्य राधिका भावकान्ती पूर्वमुदुष्करे ॥

अन्तर्वाह्यरसाम्भोधौ श्रीनन्दनन्दनो ऽपि सन् ।
आद्यो व्यूहो ऽपि चैतन्यमविशद् यत्परे पुरा ॥

विचुक्षोभ मनस्तस्य दृष्ट्वा गन्धर्वनर्तनं ।
द्वारकास्थो ऽपि भगवानविशच्छ्रीमच्छचीसुतं (!) ॥

नानावतार: सुतरामेककालप्रभावत: ।
यथा श्यामो ऽविशत्कृष्णं भगवन्तं पुरा स्वयं ॥

योगमायावलाद्दृत तिष्ठन्तो ऽन्यत्र यद्यपि ।
तथापि प्राविशन् गौरे ऽचिन्त्यलक्षणलक्षत: ॥

यथोक्तं व्यासचरणै: प्रभासखण्डमध्यत: ।
अचिन्त्या: खलु ये भावा न तांस्तर्केण योजयेदिति ॥

रघुनाथं प्रविश्यापि यथा तिष्ठति भार्गव: ।
एवं श्रीनारदमुखास्तिष्ठन्तो ऽन्येषु धामसु ॥०

It ends:

श्रीगौराङ्गगणोद्देशदीपिका रचिता मया ।
दीप्यतां परमानन्दसंदोहभक्तवेश्मनि ॥

शाके रसारसमिते मनुनैव युक्ते
ग्रन्थो मयाविरभवत् कतमस्य यत्नात् ।
चैतन्यचन्द्रचरितामृतमग्नचित्तै:
शोध्य: समाकलितगौरगणाख्य एष: ॥

इति श्रीकविकर्णपूरविरचिता श्रीगौरगणोद्देशदीपिका समाप्ता॥
श्रीभैरवचन्द्रदेवशर्मणो लिखिरियं ॥

For another MS. see Roth, Tübingen MSS., p. 9. [H. T. Colebrooke.]

## 2511.

199. Foll. 29; size 11 in. by 5 in.; indifferent Devanāgarī writing of about 1750 A.D.; 10–14 lines in a page.

*Brahmasaṃhitā* (or *Bhagavatsiddhāntasaṃgraha*), *Adhyāya* V., consisting of a (*Paurāṇik*) account of the origin and divinity of *Krishṇa*, followed by a hymn to the same deity; with a commentary, entitled *Digdarśanī*, by *Rūpa*, younger brother of *Sanātana*, and elder brother of *Vallabha*.

DR.RUPNATHJI( DR.RUPAK NATH )

The entire work is stated to consist of a hundred *adhyāyas*.

A. The text contained in the present MS. runs as follows:

ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः ।
अनादिरादिर्गोविन्दः सर्वकारणकारणं ॥ १ ॥
सहस्रपत्रं कमलं गोकुलाख्यं महत्पदं ।
तत्कर्णिकारं तद्धाम तदनन्तांशसंभवं ॥ २ ॥
कर्णिकारं महद्यन्त्रं षट्कोणं वज्रकीलकं ।
षडङ्गं षट्पदीस्थानं प्रकृत्या पुरुषेण च ॥ ३ ॥
प्रेमानन्दमहानन्दरसेनावस्थितं हि यत् ।
ज्योतीरूपेण मनुना कामबीजेन संगतं ॥ ४ ॥
तत्किञ्जल्कं तदंशानां तत्पत्राणि श्रियामपि ।
चतुरस्रं तत्परितः श्वेतद्वीपाख्यमद्भुतं ॥ ५ ॥
चतुरस्रं चतुर्मूर्तेश्चतुर्धाम चतुष्कृतं ।
चतुर्भिः पुरुषार्थैश्च चतुर्भिर्हेतुभिर्वृतं ॥ ६ ॥
शूलैर्दशभिरानद्धमूर्ध्वाधो दिग्विदिक्ष्वपि ।
अष्टाभिर्निधिभिर्युक्तमष्टाभिः सिद्धिभिस्तथा ।
अनुरूपैश्च दशभिर्दिक्पालैः परितो वृतं ॥ ७ ॥
श्यामैर्गौरैश्च रक्तैश्च शुक्लैश्च पार्षदर्षभैः ।
शोभितं शक्तिभिस्ताभिरद्भुताभिः समन्ततः ॥ ८ ॥
एवं ज्योतिर्मयो देवः सदानन्दपरात्परः ।
आत्मारामस्य तस्यास्ति प्रकृत्या न समागमः ॥ ९ ॥
मायया रममाणस्य न वियोगस्तया सह ।
आत्मना रमया रेमे त्यक्तकालं* सिसृक्षया ॥ १० ॥
नियतिः सा रमा देवी तत्प्रिया तद्वशंवदा ।
तल्लिङ्गं भगवाञ्शंभुर्ज्योतीरूपः सनातनः ॥ ११ ॥
या योनिः सा परा शक्तिः कामो बीजं महद्धरेः ।
लिङ्गयोन्यात्मिका जाता इमा माहेश्वरीप्रजाः† ॥ १२ ॥
शक्तिमान्पुरुषः सो ऽयं लिङ्गरूपी महेश्वरः ।
तस्मिन्नाविरभूल्लिङ्गे महाविष्णुर्जगत्पतिः ॥ १३ ॥
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
सहस्रबाहुर्विश्वात्मा सहस्रांशः सहस्रसः‡ ॥ १४ ॥

* स्रष्टुमिच्छया त्यक्तः सृष्ट्यर्थं प्रहितः कालो यस्माद्रमणात् तादृशं यथा स्यात्तथा रेमे ।

† माहेश्वरी माहेश्वर्यः ।

‡ सहस्रं सूते सृजति ।

नारायणः स भगवानापस्तस्मात्सनातनात्§ ।
आविरासन् कारणार्णोनिधिः संकर्षणात्मकः ॥ १५ ॥
योगनिद्रां गतस्तस्मिन् सहस्रांशः स्वयं महान् ।
तद्रोमबिलजालेषु बीजं संकर्षणस्य च ॥ १६ ॥
हैमान्यण्डानि जातानि महाभूतावृतानि तु ।
प्रत्यण्डमेवमेकांशादेकांशाद्विशति स्वयं ॥ १७ ॥
सहस्रमूर्धा विश्वात्मा महाविष्णुः सनातनः ।
वामाङ्गादसृजद्विष्णुं दक्षिणाङ्गात् प्रजापतिं ॥ १८ ॥
ज्योतिर्लिङ्गमयं शम्भुं कूर्चदेशादवासृजत‖ ।
अहंकारात्मकं विश्वं तस्मादेतद्व्यजायत ॥ १९ ॥
अथ तैस्त्रिविधैर्वेशैर्लीलामुद्वहतः किल ।
योगनिद्रा भगवती तस्य श्रीरेव संगता ॥ २० ॥
सिसृक्षायां ततो नाभेस्तस्य पद्मं विनिर्ययौ ।
तन्नालं हेमनलिनं ब्रह्मणो लोकमद्भुतं ॥ २१ ॥
तत्त्वानि पूर्वरूपाणि कारणानि परस्परं ।
समवायेत् प्रयोगाच्च विभिन्नानि पृथक् पृथक् ॥ २२ ॥
चिच्छक्त्या सज्जमानो ऽथ भगवानादिपूरुषः ।
योजयन्मायया देवो योगनिद्रामकल्पयत् ॥ २३ ॥
योजयित्वाथ तामेव प्रविशति स्वयं गुहां ।
गुहां प्रविष्टे तस्मिंस्तु जीवात्मा प्रतिबुध्यते ॥ २४ ॥
स नित्यो नित्यसंबन्धः प्रकृतिश्च परैव सा ।
एवं सर्वात्मसंबन्धं नाभ्यां पद्मं हरेरभूत् ॥ २५ ॥
तत्र ब्रह्माभवद्भूयश्चतुर्वेदी चतुर्मुखः ।
स जातो भगवच्छक्त्या तत्कालं किल चोदितः ॥ २६ ॥
सिसृक्षायां मतिं चक्रे पूर्वसंस्कारसंस्कृतां ।
ददर्श केवलं ध्वान्तं नान्यत्किमपि सर्वतः ॥ २७ ॥
उवाच पुरतस्तस्मै तस्य दिव्या सरस्वती ।
कामः कृष्णाय गोविन्द ओं गोपीजन इत्यपि ॥ २८ ॥
वल्लभाय प्रिया वह्नेर्यं ते दास्यति प्रियं ।
तप त्वं तप एतेन तव सिद्धिर्भविष्यति ॥ २९ ॥
अथ तेपे स सुचिरं प्रीणन्गोविन्दमव्ययं ।
श्वेतद्वीपपतिं कृष्णं गोलोकस्थं परात्परं ॥ ३० ॥
प्रकृत्या गुणरूपिण्या रूपिण्या पर्युपासितं ।
सहस्रदलसंपन्ने कोटिकिञ्जल्कबृंहिते ॥ ३१ ॥

§ आपो वै नरसूनवः ।

‖ भ्रुवोर्मध्यात् ।

DR.RUPNATHJI( DR.RUPAK NATH )

भूमिश्चिन्तामणिस्तत्र कर्णिकारे महासने ।
समासीनं चिदानन्दं ज्योतीरूपं सनातनं ॥ ३२ ॥

शब्दब्रह्ममयं वेणुं वादयन्तं मुखाम्बुजे ।
विलासिनीगणवृतं स्वैः स्वैरंशैरभिष्टुतं ॥ ३३ ॥

अथ वेणुनिनादस्य त्रयी मूर्तिमयी गतिः ।
स्फुरन्ती प्रविवेशन्ती(*r.* °शाशु marg.) मुखाब्जानि*
[स्वयंभुवः ॥ ३४ ॥

गायत्रीं गायतस्तस्मादधिगत्य सरोजजः ।
संस्कृतश्चादिगुरुणा द्विजतामगमत्तदा ॥ ३५ ॥

त्रय्यां प्रबुद्धो ऽथ विधिर्विज्ञाततत्त्वसागरः ।
तुष्टाव वेदसारेण स्तोत्रेणानेन केशवं† ॥ ३६ ॥

---

चिन्तामणिप्रकरसद्मसु कल्पवृक्ष-
लक्षावृतेषु सुरभीरभिपालयन्तं ।
लक्ष्मीसहस्रशतसंभ्रमसेव्यमानं
गोविन्दमादिपुरुषं तमहं भजामि ॥ १ ॥

वेणुं क्वणन्तमरविन्ददलायताक्षं
बर्हावतंसमसिताम्बुदसुन्दराङ्गं ।
कन्दर्पकोटिकमनीयविशेषशोभं
गोविन्दमादिपुरुषं तमहं भजामि ॥ २ ॥

आलोलचन्द्रकलशब्दनमाल्यवंशी-
रत्नाङ्गदप्रणयकेलिकलाविलासं ।
श्यामं त्रिभङ्गललितं नियतप्रकाशं
गोविन्दमादिपुरुषं तमहं भजामि ॥ ३ ॥

अङ्गानि यस्य सकलेन्द्रियवृत्तिमन्ति
पश्यन्ति पान्ति कलयन्ति चिरं जगन्ति ।
आनन्दचिन्मयसमुज्ज्वलविग्रहस्य
गोविन्दमादिपुरुषं तमहं भजामि ॥ ४ ॥

अद्वैतमच्युतमनादिमनन्तरूपम्
आद्यं पुराणपुरुषं नवयौवनं च ।
वेदेषु दुर्लभमदुर्लभमात्मभक्तौ
गोविन्दमादिपुरुषं तमहं भजामि ॥ ५ ॥

पन्थास्तु कोटिशतवत्सरसंप्रगम्यो
वायोरथापि मनसो मुनिपुङ्गवानां ।
सो ऽप्यस्ति यत्प्रपदसीम्नि विचिन्त्य तत्त्वं
गोविन्दमादिपुरुषं तमहं भजामि ॥ ६ ॥

एको ऽप्यसौ‡ रचयितुं जगदण्डकोटिं
यच्छक्तिरस्ति जगदण्डचया यदंतः§ ।
अण्डान्तरस्थं परमाणुचयान्तरस्थं
गोविन्दमादिपुरुषं तमहं भजामि ॥ ७ ॥

यद्भावभावितधियो मनुजास्तथैव
संप्राप्य रूपमहिमासनजानुभूषाः(?) ।
सूक्तैर्यमेव निगमप्रथितैः स्तुवन्ति
गोविन्दमादिपुरुषं तमहं भजामि ॥ ८ ॥

आनन्दचिन्मयरसप्रतिभाविताभिस्
ताभिर्य एव निजरूपतया कलाभिः ।
गोलोक एव निवसत्यखिलात्मभूतो
गोविन्दमादिपुरुषं तमहं भजामि ॥ ९ ॥

प्रेमाञ्जनच्छुरितभक्तिविलोचनेन
सन्तः सदैव हृदये ऽपि विलोकयन्ति ।
तं(*r.* यं) श्यामसुन्दरमचिन्त्यगुणप्रकाशं
गोविन्दमादिपुरुषं तमहं भजामि ॥ १० ॥

रामादिमूर्तिषु कलानियमेन तिष्ठन्
नानावतारमकरोद्भुवनेषु किंतु ।
कृष्णः स्वयं समभवत् परमः पुमान्यो
गोविन्दमादिपुरुषं तमहं भजामि ॥ ११ ॥

यस्य प्रभावप्रभवतो जगदण्डकोटि-
कोटिश्व(*r.* ष्व)शेषवसुधादिविभूतिभिन्नं ।
तद्ब्रह्म निष्कलमनन्तमशेषभूतं
गोविन्दमादिपुरुषं तमहं भजामि ॥ १२ ॥

माया हि यस्य जगदण्डशतानि सूते
त्रैगुण्यतद्विषयवेदवितायमाना ।
सत्त्वावलम्बिपरसत्त्वविशुद्धसत्त्वं
गोविन्दमादिपुरुषं तमहं भजामि ॥ १३ ॥

आनन्दचिन्मयरसात्मतया मनःसु
यः प्राणिनां प्रतिफलन् स्मरतामुपेत्य ।
लीलायितेन भुवनानि जयत्यजस्रं
गोविन्दमादिपुरुषं तमहं भजामि ॥ १४ ॥

---

* मुखाब्जानि प्रविवेशेत्यष्टभिः कर्णैः प्रविवेशेत्यर्थः ।

† The text makes this last *śloka* consist of three hemistichs, the number of the verses, 7–35, being removed back to the end of the preceding hemistich. In the commentary this is different, though there too the numbering is irregular, several *ślokas* being sometimes treated together under the same number, and the two seetions being numbered conseeutively.

‡ Thus comm., °प्यणौ text.

§ जगदण्डचया इति न चान्तर्न वहिर्यस्येत्यादि ।

DR.RUPNATHJI( DR.RUPAK NATH )

गोलोकनाम्नि निजधाम्नि तले च तस्य
देवीमहेशहरिधामसु तेषु तेषु ।
ते ते प्रभावनिचया विहितास्तु येन
गोविन्दमादिपुरुषं तमहं भजामि ॥ १५ ॥

सृष्टिस्थितिप्रलयसाधनशक्तिरेका
छायेव यस्य भुवनानि बिभर्ति दुर्गा ।
इच्छानुरूपमपि यस्य च चेष्टते सा
गोविन्दमादिपुरुषं तमहं भजामि ॥ १६ ॥

क्षीरं यथा दधिविकारविशेषयोगात्
संजायते न तु ततः पृथगस्ति हेतोः ।
यः संभु(r. शंभु)तामपि* तथा समुपैति कार्याद्
गोविन्दमादिपुरुषं तमहं भजामि ॥ १७ ॥

दीपार्चिरेव हि दशान्तरमभ्युपेत्य
दीपायते विवृतहेतुसमानधर्मा ।
यस्तादृगेव हि च विष्णुतया विभाति
गोविन्दमादिपुरुषं तमहं भजामि ॥ १८ ॥

यः कारणार्णवजले भजति स्म योग-
निद्रामनन्तजगदण्डसरोमकूपः ।
आधारशक्तिमवलम्ब्य परां स्वमूर्तिं
गोविन्दमादिपुरुषं तमहं भजामि ॥ १९ ॥

यस्यैकनिःश्वसितकालमथावलम्ब्य
जीवन्ति लोमविलजा जगदण्डनाथाः ।
विष्णुर्महान्स इह यस्य कलाविशेषो
गोविन्दमादिपुरुषं तमहं भजामि ॥ २० ॥

भास्वान् यथाश्मशकलेषु निजेषु तेजः
स्वीयं कियत्प्रकटयत्यपि तद्वदत्र ।
ब्रह्मा य एव जगदण्डविधानकर्ता
गोविन्दमादिपुरुषं तमहं भजामि ॥ २१ ॥

यत्पादपल्लवयुगं विनिधाय कुम्भ-
द्वन्द्वे प्रणामसमये स गणाधिराजः ।
विघ्नान्विहन्तुमलमस्ति जगत्त्रयस्य
गोविन्दमादिपुरुषं तमहं भजामि ॥ २२ ॥

अग्निर्मही गगनमम्बु मरुद्दिशश्च
कालस्तथात्ममनसीति जगत्त्रयाणि ।
यस्माद्भवन्ति विभवं विशन्ति यं च
गोविन्दमादिपुरुषं तमहं भजामि ॥ २३ ॥

यच्चक्षुरेष सरिता(r. सविता) सकलग्रहाणां
राजा समस्तसुरमूर्तिरशेषतेजाः ।
यस्याज्ञया भ्रमति संभृतकालचक्रो
गोविन्दमादिपुरुषं तमहं भजामि ॥ २४ ॥

धर्मार्थकामनिचयः श्रुतयस्तपांसि
ब्रह्मादिकीटपतगावधयश्च जीवाः ।
यद्दत्तमात्रविभवप्रकटप्रभावा
गोविन्दमादिपुरुषं तमहं भजामि ॥ २५ ॥

यस्त्विन्द्रगोपमथवेन्द्रमहो(?) स्वकर्म-
बन्धानुरूपफलभाजनमातनोति ।
कर्माणि निर्दहति किंतु च भक्तिभाजां
गोविन्दमादिपुरुषं तमहं भजामि ॥ २६ ॥

यं क्रोधकामसहजं प्रणयन्ति भीति-
वात्सल्यमोहगुरुगौरवसेव्यभावैः ।
संचिन्त्य तस्य सदृशीं तनुमापुरेते
गोविन्दमादिपुरुषं तमहं भजामि ॥ २७ ॥

श्रियः† कान्ताः कान्तः परमपुरुषः कल्पतरवो
द्रुमा भूमिश्चिन्तामणिगणमयी तोयममृतं ।
कथा गानं नाट्यं गमनमपि वंशी प्रियसखी
चिदानन्दज्योतिः परमपि तदास्वाद्यमपि च ॥ २८ ॥

स यत्र क्षीराब्धी सरति सुरभीभ्यश्च‡ सुमहान्
निमेषार्धाख्यो वा व्रजति न हि यत्रापि समयः ।
भजे श्वेतद्वीपं तमहमिह गोलोकमिति यं
विदन्तस्ते सन्तः क्षितिविरलचाराः कतिपये ॥ २९ ॥

अथोवाच भगवान् भगवन्तं कमलयोनिं ॥

ब्रह्मन् महत्त्वविज्ञाने प्रजासर्गे च चेन्मतिः ।
पञ्चश्लोकीमिमां विद्यां वत्स दत्तां निबोध मे ॥ ३० ॥

प्रबुद्धे ज्ञानभक्तिभ्यामात्मन्यानन्दचिन्मयी ।
उदेत्यनुत्तमा भक्तिर्भगवत्प्रेमलक्षणा ॥ ३१ ॥

प्रमाणैस्तत्सदाचारैस्तदभ्यासैर्निरन्तरं ।
बोधयन्नात्मनात्मानं भक्तिमप्युत्तमां लभेत् ॥ ३२ ॥

यस्याः श्रेयस्करं नास्ति यया निर्वृतिमाप्नुयात् ।
या साधयति मामेव भक्तिं तामेव साधयेत् ॥ ३३ ॥

धर्मानन्यान्परित्यज्य मामेव भज विश्वसन् ।
यादृशी यादृशी श्रद्धा सिद्धिर्भवति तादृशी ॥ ३४ ॥

---

* शंभोरपि कार्यत्वं गुणसंवलनात् ।

† व्रजसुन्दरीरूपाः

‡ सुरभीभ्यः सरतीति तदीयवंशीध्वन्याद्यावेशादिति भावः ।

DR.RUPNATHJI( DR.RUPAK NATH )

अहं हि विश्वस्य चराचरस्य
बीजं प्रधानं प्रकृतिः पुमांश्च ।
मया हितं तेज इदं बिभर्षि
विधे विधेहि त्वमथो जगन्ति ॥ ३५ ॥

इति श्रीब्रह्मसंहितायां भगवत्सिद्धांतसंग्रहे मूलसूत्राख्यः पंचमो ऽध्यायः ॥

In the *Bhaktirasāmṛitasindhu* the verses ii. 12 (यस्य प्रभावतो॰) and ii. 20 (यस्यैकनिःश्वसित॰) are quoted as occurring "*Brahmasaṃhitāyām Ādipurusharahasye.*"

B. *Rūpa's* commentary, which, for the most part, is illustrative rather than explanatory, begins: श्रीमते निंबार्काय भगवते नमः ॥ श्री-
कृष्णस्वरूपमहिमा मम चित्ते महीयतां ।
यस्य प्रसादाद् व्याकर्तुमिच्छामि ब्रह्मसंहितां ॥

दुर्योजनापि युक्तार्था सुविचारादृपिस्मृतिः (?सुचिरा-
[दृषिणाङ्कृतिः R. M.) ।
विचारे तु मयात्र स्यादृषीणां स ऋषिर्गतिः (?सदृशी
[गतिः)
यद्यप्यध्यायशतयुक् संहिता सा तथाप्यमौ ।
अध्यायः सूत्ररूपत्वात्तस्याः सर्वांगतां गतः ॥

श्रीमद्भागवताद्येषु दृष्टं यत्सृष्टबुद्धिभिः ।
तदेवात्र परामृष्टं ततो हृष्टं मनो मम ॥

यद्यच्छ्रीकृष्णसंदर्भे विस्तराद्धि निरूपितं ।
अत्र तत्पुनराम्रष्य(*r.* मृश्य) व्याख्यातुं स्पृश्यते मया ॥

अथ श्रीमद्भागवते यदुक्तमेते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयमिति तदेव तावत्प्रथममाह । ईश्वरः इति॰

The commentator quotes freely from the *Bhāgavatapurāṇa*, esp. the tenth book (*śrīdaśama*), with its *Ṭīkā*, and the *Bhagavadgītā*. Other authorities quoted are: *Uddhava* (या वै श्रियार्चितमित्यादि श्रीमदुद्धववाक्यात्), fol. 19*b*; *Kṛishṇasandarbha*, foll. 1*b*, 24*a*; *Gopālatāpanī*, foll. 3*b*, 8*b*; *Gosūktam* (गोभ्यो यज्ञाः प्रवर्तंते गोभ्यो देवाः समुत्थिताः । गोभिर्वेदाः समुद्गीर्णाः स षडंगपदक्रमाः ॥), fol. 6*a*; *Gautamīyatantra*, foll. 2*b*, 3*a* (*Vṛihad-Gautamīya*, foll. 9*b*, 23*a*; *Gautamīyatantra-dvaya*, fol. 28*a*); *Nāmakaumudī-kāra*, fol. 3*a*; *Nāradapañcarātra*, foll. 8*b*, 17*b*; *Prabhāsha-purāṇa* (*Nāradakuśadhvajasaṃvāde*; prob. the *Prabhāsakhanda* of the *Skandapurāṇa*), fol. 2*a*; *Bhaṭṭa*, fol. 3*b*; *Mṛityuṃjayatantra*, fol. 14*a*; *Brahmastuti*, fol. 4*b*; *Bhaktisandarbha*, fol. 29*a*; *Yāmunācārya*, fol. 22*a*; *Vāsudevopanishad*, fol. 3*a*; *Śuka* (?तथासौ दर्शयामास लोकस्वमित्यादौ श्रीशुकवाक्यात्), fol. 19*b*; *Śrīdharasvāmin* (comm. on *Vishṇup.*), fol. 21*b*; *Śrutistava* (स्वकृतपुरेष्वमीष्वबहिरन्तरसंवरणं॰। इति नृगतिं विविच्य कवयो निगमावपनं॰॥), fol. 28*b*; (*Trailokya-*)*Sammohanatantra* (*ashṭādaśāksharaprasaṅga*), fol. 24*a*; *Sahasranāmavyākhyā*, fol. 13*b*; *Hayaśīrshapañcarātra*, foll. 8*b*, 28*a*.

It ends: इति ब्रह्मसंहितायामिति । तदुक्तं तत्रैवान्यत्र ।
अध्यायशतसंपन्ना भगवद्ब्रह्मसंहिता ।
कृष्णोपनिषदां सारैः संचिता ब्रह्मणोदितेति ॥

यद्यपि नाना पाठान्नाना चार्थान् स्मरंति नाना ते ।
तदपि च सत्पथ लब्ध्वा एवास्माभिस्त्वमी प्रमिताः ॥

सनातनसमो यस्य ज्यायान् श्रीमान् सनातनः ।
श्रीवल्लभो ऽनुजः सो ऽसौ श्रीरूपो जीवसद्गतिः ॥

इति ब्रह्मसंहितायां मूलसूत्राख्यस्य पंचमाध्यायस्य दिग्दर्शनी [नाम्नी suppl.] टीका समाप्ता ॥ श्रीमते निंबार्काय भगवते नमः ॥

For another MS. of both text and commentary (not metrical, as is there stated erroneously), see Rāj. Mitra, Notices, ii., p. 106.

[H. T. COLEBROOKE.]

## 2512.

**2461.** Foll. 203, one of which (fol. 93) is wanting; whilst 118–125 are misplaced after 193; size 11 in. by 4¾ in.; fairly written, in Devanāgarī, about the beginning of the 17th century; nine lines in a page.

*Vishṇudharmamīmāṃsā*, a dissertation on the worship of *Vishṇu*, by *Nṛisiṃha Bhaṭṭa*, son of *Soma Bhaṭṭa*. The MS. has suffered to some extent from damp.

DR.RUPNATHJI( DR.RUPAK NATH )

It begins:

वाचामगोचरमज्ञातिगुणक्रियाया
  यं नेति नेति चकितं श्रुतयो वदंति ।
वैखानसागमपरैरधिगम्यते यस्
  तस्मै नमो ऽस्तु हरये द्विषडक्षराय ॥ १ ॥
सर्वस्वं वैष्णवानां श्रुतिनि[खि]लशिरःसागरं पंचरात्रं
  यत्प्राहादौ मुरारिः स्वजनहितकरो नारदायेष्टसिद्ध्यै ।
तद्व्याचिख्यासवस्तु प्रकटितवपुषे श्रीनृसिंहाश्रमाख्या-
  विख्यातायाखिलाप्त्यै सततमिह नमस्कुर्महे ऽस्मै मधुघ्ने [॥ २ ॥
वेदांताद्यविरोधेन पूर्वतंत्रानुसारतः ।
मीमांसा विष्णुधर्माणां क्रियते सोमसूनुना ॥ ३ ॥
वैष्णवकंठाभरणं कंठे धार्यं सर्वविपश्चिद्भिः ।
द्वापरपाषंडादिध्वांतात्यंतव्युदासाय ॥ ४ ॥
ईर्ष्यामत्सरपित्तदूषितधियो नैतत्कृतेः स्वादुतां
  द्राक्षेक्षीरमधूपमामिह विदुः किं तावता तत्कृतिः ।
रंभामप्यमरांगनामरसिकः क्लीवो न चेद्वोक्ष्यते
  लावण्यादि किमत्र दुष्यति यतः संत्येव तद्भावुकाः ॥ ५ ॥
पंचरात्रविदो नत्वा गुरूनपि गरीयसः ।
प्रामाण्यं पंचरात्रस्य प्रथमं समुदीर्यते ॥ ६ ॥

सात्वतापरनामधेयपंचरात्रोक्तपूजास्तुतिनमस्कारादिना भगवंतं नारायणं भजम[ाना]नामेव कैवल्यमभ्युदयो वा नान्येषां । श्रुति-स्मृतिप्रामाण्यात् । °

There are no divisions, and a rapid perusal has only yielded quotations from *Purāṇas*, the epics, the *Nāradapañcarātra*, *Brahmayāmala* (fol. 104*b*), *Ratnasāgara* (fol. 102*a* मध्यमानामिका मध्यपर्वद्वयमिह प्रिये । मेरुं कल्पजपं कुर्यात्प्रदक्षिणमनुक्रमात् ॥ अनामा मूलपर्वादि कनिष्ठादिक्रमेण तु । तर्जन्यग्रादितो देवि मध्यामूलावभासकं ॥ °); *Parāśara*, *Śaṅkarācārya*.

It ends:

श्रीविष्णुधर्ममीमांसापदार्थानां तु संग्रहः ।
सुखावबोधनार्थं तु जिज्ञासूनामयं कृतः ॥
मीमांसिता विष्णुधर्माः श्रीगुरूणामनुग्रहात् ।
यदत्र सुष्ठु तत्तेषां यदसुष्ठु ममैव तत् ॥ ° ॥

सद्ध्यायवेदतदनुस्मृतिवारिजानां
  सोमात्मजेन धिषणागुणक्लृप्तमाला ।
न्यस्ता हरेश्चरणयोरनया नृसिंहः
  प्रीणातु मे स भगवान्द्विषडक्षरात्मा ॥

इति श्रीपदवाक्यप्रमाणज्ञसोमभट्टतनूजश्रीनृसिंहभट्टविरचिता विष्णुधर्ममीमांसा समाप्ता ॥ [GAIKAWAR.]

## 2513.

**2635b.** Foll. 20 (the first five of which are wanting); size $10\frac{1}{2}$ in. by 4 in.; legibly written in Devanāgarī; 14 or 15 lines in a page.

*Śivādvaitaprakāśikā*, a treatise, in three chapters (*ullāsa*), on the unity of the deity as represented by *Śiva*, and on the practices of devotion due to that deity, by *Kāśīnātha Bhaṭṭa*, son of *Jayarāma Bhaṭṭa* and *Vārāṇasī*.

The treatise is composed in *ślokas* (chiefly compiled from *Purāṇas*) interspersed with explanatory remarks.

Ch. II. beg. (fol. 8*a*):

अथोत्पत्तिं प्रवक्ष्यामि शैवशास्त्रानुसारतः ।
निर्गुणः सगुणश्चेति शिवो ज्ञेयः सनातनः ॥
निर्गुणः प्रकृतेरन्यः सगुणः सकलः स्मृतः ।
सच्चिदानंदविभवात्सकलात्परमेश्वरात् ॥
पंच भूतानि तन्मात्रपंचकं च तथा पुनः ।
ज्ञानेंद्रियाणि पंचैव पंचकर्मेंद्रियाण्यपि ॥
मनोमयाः शुद्धविद्या महेश्वरः सदाशिव इति ।

अस्यार्थः ॥ सनातनो नित्यः शिवो निर्गुणः सगुणश्च ज्ञेयः । निर्गुणस्वरूपमाह ।

तच्छक्तिभूतः सर्वेशो भिन्नो . . . . . . ।
नित्यः सर्वगतः सूक्ष्मः सदानंदो निरामयः ।
विकाररहितः साक्षाच्छिवो ज्ञेयः सनातन इति ॥

प्रकृतेरन्यः । केवलो निर्गुणः । °

Ch. III. beg. (fol. 15*a*): शैवपुराणे ।

शृणु धर्मं प्रवक्ष्यामि भक्तानां लक्षणं मम ।
भस्मोद्धूलितसर्वांगास्त्रिपुंड्रांकितमस्तकाः ॥ °

It ends (from the *citrakhaṇḍa*):

प्रदोषपूजनं शंभोः सर्वपापभयापहं ।
सर्वाभीष्टप्रदं तस्मात्सादरं तत्समाचरेत् ॥
सोमवारत्रयोदश्यां नक्तभुक् शंकरप्रियः ।
रुद्राध्यायजपी चेत्स्यात् सुकृतं को ऽस्य वर्णयेदिति ॥

DR.RUPNATHJI( DR.RUPAK NATH )

इति श्रीमद्भडोपनामक(thus in all three colophons) जयरामभट्टसुत- वाराणसीगर्भसंभव- दक्षिणामूर्तिशिवाराधक- काशीनाथविरचितायां शिवाद्वैतप्रकाशिकायां तृतीयोल्लासः ॥ संवत् १८५८ शके १७२३ दुर्मतिनामसंवत्सरे वैशाखकृष्ण श्रमायां(!) भौमे भरणीनक्षत्रे मेषस्थिते चंद्रे वृषस्थिते रवौ कर्कस्थिते देवगुरौ काश्यां दशाश्वमेधस्थितनगरकराख्यप्रसिद्धः वडव्योपनामकेन आकुलनेरवृन्नीश्वरेण पुतदेवप्रपौत्रेण(?) नीलकंठपौत्रेण विठलात्मजेन वत्सगोत्रोत्पन्नेन पंचप्रवरान्वितेन पुण्यग्रामे ० इदं पुस्तकं जयरामशर्मणा स्वहस्तेन लिखितं । तस्येदं दक्षिणामूर्तिविश्वेश्वरः प्रसन्नो ऽस्तु ॥

Of non-*purāṇic* authorities may be mentioned: *Purushārthaprabodha*, foll. 12*b*, 16*a*,*b*; *Paippalādopanishad*, fol. 12*b*; *Vidyeśvarasaṃhitā* (?of some *purāṇa*), fol. 17*a*; *Śāradā*, fol. 15*a*. [MACK. COLL.]

## 2514.

**1547C.** Foll. 20; size 10 in. by 4½ in.; clear, modern Devanāgarī writing; five lines in a page.

*Catushṭayasampradāyikā-paddhati*(?) and *Sītārāmapaddhati*, two short manuals of prayers, with directions for their use (? by *Rāmānuja* or one of his followers). Partly in *bhāshā*.

I. (in four sections) begins: श्रीमते रामानुजाय नमः ॥ ओं

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि पवित्रं चाशनं(*r.* चासनं)कुरु ॥

इति आसनमंत्रः ॥

समुद्रमेखले देवि पर्वतस्तनमंडले ।
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥

इति पादपूरमंत्रः ॥

ओं तस्य तस्य देवानां भूतप्रेतपिशाचिका ।
मलमूत्रमनुष्याणां मम दोषो न दीयते ॥

इति मलमंत्रः ॥

Follow *pātraśuddhimantra*, *mṛittikāmantra*, *dantadhāvanamantra*, *śikhābandhanamantra*, *śikhāmuktimantra*, *ācamanamantra*, *snānamantra*, *aghamarshaṇa*, *karanyāsa*, *hṛidayāyanyāsa*, *aṅganyāsa*, *hṛidayanyāsa*, *dhyānam*, *shaḍakshara-mantra*.

It ends:

विलासाचार्यके अगस्त्याचार्ये ॥ ४ ॥ इति चतुष्टसंप्रदाकीपद्धत(!) संपूर्णम् ॥

II. beg. (fol. 9*a*): अगस्त्य उवाच ॥ ओं प्रातरुत्थाय शौचस्नानं कृत्वा मलमंत्रं त्रिवारं पठित्वा ।

पृष्ठे तु पद्मनाभं च त्रिके दामोदरं न्यसेत् ।

ओंकारमध्ये स गुरुं श्रीरामचंद्रं ध्यात्वा सो ऽहं हृदयं वायुवीजं षोडशवारं जपेत् ॥ पापपुरुषं विशेषयेत् ॥ ०

Follow *tilakamantra*, *prāṇapratishṭhā*, *devanyāsa*, *shaḍaṅganyāsa*, *siṃhāsanamantra*, *āsanamantra*, *pādyamantra*, *snānamantra*, *ācamanamantra* (different from above), *candanamantra*, *vastramantra*, *pushpamantra*, *dhūpamantra*, *dīpamantra*, *naivedyamantra*, *tāmbūlamantra*, *ārtimantra*, *pradakshiṇāmantra*, *aparāddhakshamāmantra*, *namaskāramantra*, *dhyānamantra*, *caraṇasevanamantra*, *jalagāyatrī*, *karanyāsa*, *prayogasaṃkalpa*.

It ends: अमुकवर्षे अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे योगकर्णलग्नमुहूर्ते । अमुकतीर्थे ॥ श्रीसीतारामपद्धति ॥ पटलं संपूर्णम् ॥

The leaves are marked पटल or लट.

For a *Śrīrāmapaddhati*, by *Rāmānuja*, see Aufrecht, Cat. Bodl., no. 733; for a *Rāmapaṭala* by the same Author, Burnell, Tanjore MSS., p. 202*b*. [H. T. COLEBROOKE.]

## 2515.

**1068.** Foll. 149; size, oblong, 6¼ in. by 5 in.; large, clear Devanāgarī writing of about 1750 A.D.; 10 or 11 lines in a page.

A collection of hymns, and theological or devotional tracts, by *Vallabhācārya* (A), his son *Viṭṭhaleśvara* (B) and others; with extracts from *Purāṇas*, etc.

DR.RUPNATHJI( DR.RUPAK NATH )

1. *Vallabhāshṭaka* (B), व्रजराजविराजितगोपवरे ० ending with eight stanzas, श्रीमद्वृंदावनेंदुप्रकटितरसिका ० ends fol. 3*b*; 2. *Siddhāntarahasya* (A), 9 *vv.*, श्रावणस्यामले पक्षे एकादश्यां महानिशि । ० fol. 4*b*; 3. *Saptaślokī* (B), स्फुरत्कृष्णप्रेमामृतरसभरेण ० fol. 5*b*; 4. *Siddhāntamuktāvalī* (A), 21 *vv.*, नत्वा हरिं प्रवक्ष्यामि स्वसिद्धांतविनिश्चयं । कृष्णसेवा सदा कार्या मानसी सा परा मता ॥ fol. 7*b*; 8. *Antaḥkaraṇaprabodha* (A), 11 *vv.*, अंतःकरण मद्वाक्यं ० fol. 8*b*; 9. *Sevāphalam* (A), 8 *vv.*, यादृशी सेवना प्रोक्ता ० fol. 9*a*; 10. *Vivekadhairyāśraya* (A), 17 *vv.*, विवेकधैर्ये सततं रक्षणीये तथाश्रयः । ० fol. 10*b*; 11. *Nirodhalakshaṇam* (A), 20 *vv.*, यच्च दुःखं यशो दाया ० fol. 12*b*; 12. Extracts from the tenth book of the *Bhāgavata* (and from the *Brahmāṇḍa*) *Purāṇa*, fol. 33*a*; 13. *Sevānantaram prārthanā* (B), 12 *vv.*, नमो भक्तिसारसास्वाददात्रे ० fol. 33*a*; 14. *Madhurāshṭakam* (A), 8 *vv.*, अधरं मधुरं वदनं मधुरं नयनं ० fol. 34*a*; 15. *Maṅgalastotram* (A), 3 *vv.*, मंगलं मंगलं ० fol. 34*b*; 16. *Prātaḥstavaḥ* (A), 10 *vv.*, तत्कुंजरं ० fol. 35*b*; 17. *Kṛishṇastavarāja* (by?), 8 *vv.*, अनंतकंदर्प ० fol. 36*b*; 18. *Shoḍaśastotram* (by?), प्रमुदकुमारो ० fol. 37*b*; 19. *Vṛindāshṭakam* (A), कालिंदीइतायाः ० fol. 39*a*; 20. *Gopījanavallabhacaraṇaikatānam* (B), रहस्यं श्रीराधेत्यखिलनिगम ० fol. 40*a*; 21. *Svāminyāḥ stotram* (B), 12 *vv.*, देव श्रीराधे रहसि मिलति त्वां ० fol. 42*a*; 22. *Yamunāshṭakam* (B), नमामि यमुनामहं ० fol. 43*b*; 23. *Yamunāshṭapadī* (B), *rāmakalīrāgeṇa gīyate*, नमो देवि यमुने ० fol. 44*b*; 24. *Gaṅgāshṭakam* (by *Vālmīki*), मातः शैलसुता ० fol. 46*a*; 25. *Antaḥkaraṇaprabodha* (A), 11 *vv.*, अन्तःकरण मद्वाक्यं सावधानतया शृणु । fol. 47*a* (=8); 26. *Siddhāntarahasyam* (A), 9 *vv.*, श्रावणस्यामले ० fol. 47*b*; 27. *Navaratnam* (A), 9 *vv.*, चिंता कापि न कार्या ० fol. 48*b*; 28. *Bhaktivardhinī* (A), 11 *vv.*, यथा भक्तिः प्रवृद्धा स्यात् तथोपायो निरूप्यते । ० fol. 49*b*; 29. *Vallabhāshṭakam* (B), 8 *vv.*, श्रीमद्वृंदावनेंदु ० (=1); 30. *Agnikumāraproktam Sarvottamastotram*, fol. 53*b*; 31. *Kṛishṇapremāmṛitam* (B), 8 *vv.*, स्फुरत्कृष्णप्रेमा (partly = 3); 32. *Haridāsoditaṃ Śrīvallabhaśaraṇāshṭakam*, 9 *vv.*, निःसाधनजनोद्धारकरणप्रकटीकृतः । ० fol. 55*b*; 33. *Harirāyajī's Navanītapriyāshṭakam*, अलकावृतमदलके ० fol. 56*a*; 34. *Raghunāthajī's Nāmaratnākhyastotram*, 32 *vv.*, यन्नामार्कोदया ० fol. 58*b*; 35. *Raghunātha's Stavanam*, 10 *vv.*, यः कृष्णसेवार्थमगाधबोधं जगाद ० fol. 59*b*; 36. *Mahādevakṛitaṃ Śrī-Viṭṭhaleśvarasyāshṭottaraśatanāmastotram*, fol. 62*a*; 37. *Catuḥślokī* (A), सर्वदा सर्वभावेन ० fol. 62*b*; 38. *Premāmṛitam* (by?), 35 *vv.*, पयोदश्यामीलानवधृत ० fol. 67*b*; 39. *Bhujaṅgaprayātāshṭakam* (B), मुखांभोजनैत्यधरा ० fol. 68*b*; 40. *Pañcapadī* (A), श्रीकृष्णरस ० fol. 69*a*; 41. Extracts (*Rigv.*, *Purāṇas*), fol. 118; 42. *Āryādvaye* (B), शरणागतभीतिवृत्तिपरं ० fol. 120*a*; 43. *Ācāryajīkṛita-sikshā*, चिन्तासंतानहंतारो ० fol. 120*b*; 44. *Giridharajīkrita Vijñaptiḥ*, अपराधघनोत्सुकचित्त ० (twice), foll. 121*b*, 125*a*; 45. *Nandakumārāshṭakam* (A), सुन्दरगोपाल ० (twice), foll. 124*a*, 142*b*; 46. *Snānavidhi* and *Yajurvedoktatrikālasandhyopāsanavidhi*, fol. 136*b*; 47. Extracts from *Bhāg. P.*; 48. *Haridāsoktaṃ Śrī-Vallabhapañcāksharastotram*, 8 *vv.*, श्रीवल्लभीवल्लभस्य वियोगी ० fol. 143*a*; 49. Extracts from *Purāṇas*. [H. T. COLEBROOKE.]

## 2516.

**2611a.** Foll. 45 (foll. 15–19 of which are wanting); size 9½ in. by 4¼ in.; legibly written in Devanāgarī, about 1750 A.D.; eleven lines in a page.

*Sarvottamastotra-vivṛiti*, a commentary on the *Sarvottamastotra*, in praise of *Kṛishṇa*, by *Vallabhācārya*.

It begins:

नत्वा पितृपदांभोजमैहिकामुष्मिकार्पदं ।
तत्प्रोक्ताचार्यनामानि विवरिष्ये यथामति ॥ १ ॥

यद्यप्ययोग्य एवाहं तन्नामविवृतौ स्वतः ।
स्वीयत्वेनैव कृपया योग्यतां मयि दास्यति ॥ २ ॥



DR.RUPNATHJI( DR.RUPAK NATH )

इति विश्वासतो नूनं प्रवृत्तो ऽहं न चान्यथा ।
अतस्त एव शरणं मम सर्वार्थसिद्धये ॥ ३ ॥

श्रीमत्पितृचरणः श्रीमदाचार्याणामलौकिकनामानि प्रकटयितुमाचार्याणां स्वरूपं तत्प्राकट्यहेतुं च वक्तुमाचार्यैकप्रकटितभक्तिमार्गप्रतिपाद्यं सर्वश्रुतिश्रीभागवतगीताद्यनेकालौकिकप्रमाणसिद्धं पूर्वोक्तप्रमेयमूलभूतं साक्षात्पुरुषोत्तमस्वरूपं सर्वमूलत्वेन मंगलार्थं स्तुवंति । प्राकृतधर्मानाश्रयमिति ।

The *stotra* here consists of 36 stanzas (whilst Hall, Index, p. 151, makes it 25).

The commentary ends:

एवमाचार्यनामानि विवृतानि यथामति ।
पितृपादाब्जकृपया नान्यसाधनतो मया ॥ १ ॥
यदत्र बुद्धिदोषेण विवृतावन्यथा कृतं ।
क्षमंत्वाचार्यचरणा मद्गत्यो ऽयमिति स्वतः ॥ २ ॥
आचार्यनामानि शताष्टकमौक्तिकानि
श्रीविट्ठलोक्तिरसमसागरनिर्गतानि ।
श्रीवल्लभोक्तिविवृतेर्गुणगुंफितानि
निकुर्वंतु(!) कंठभुवि भक्तजना जयार्थं ॥

इति श्रीमत्प्रभुचरणैकतानश्रीवल्लभविरचिता सर्वोत्तमस्तोत्रविवृतिः ॥ [GAIKAWAR.]

## 2517.

**2611b.** Foll. 22; size $10\frac{1}{4}$ in. by $4\frac{3}{4}$ in.; good Devanāgarī writing of about 1750 A.D.; eleven lines in a page.

Tracts connected with the sects of *Vallabhācārya* and *Rāmānuja*.

I. *Vivekadhairyāśrayanirūpaṇa*, by *Vallabhācārya*; 17 *ślokas*, beg.:

विवेकधैर्ये सततं रक्षणीये तथाश्रयः ।
विवेकस्तु हरिःसर्वं निजेच्छातः करिष्यति ॥

This is followed by a commentary (*ṭīkā*) thereon, beg.:

स्वगोकुलपरित्राणसंभ्रमेणोद्धृताचलं ।
क्रीडन्नोपाङ्गनापाङ्गसङ्गिगोपालमाश्रये ॥ १ ॥

II. [*Ananya-*]*Bhaktiviveka* (?by *Lakṣmaṇācārya*). It begins, fol. 4*a*:

रामानुजश्रीशपदावलंबी रामानुजश्रीशमतानुसारात् ।
श्रुत्यादिसंवादयुतं प्रवक्तुमनन्यभक्तेस्तु विवेकमीहे ॥ १ ॥
तत्रास्तु मे मूढतमस्य गूढः
श्रीवैष्णवाचार्यकृपासहाय(:) ।
चक्षुष्मदालंबनतो हि यायाद्
अंधो जनो दुर्गममार्गपारं ॥ २ ॥

इह खलु देहात्मभ्रमेण वंभ्रम्यमाणेन पार्थेन शिष्यस्तेहं साधि मां त्वां प्रपन्नमिति प्रार्थितपार्थसारथिः ०

It ends:

श्रीरामानुजकारुण्यान्नदीयानां मुदावहः ।
विवेको ऽनन्यभक्तेस्तु व्यक्तमुक्तो मयाधुना ॥
श्रीरामानुजारत(? नत)श्रीलक्ष्मणाचार्यभक्तिविवेकः समाप्तः ॥

III. *Siddhāntavivṛiti*, or rather a gloss thereon; by *Vallabha*. It begins, fol. 7*b*:

यद्वाक्यैव मोक्षांता(:) पुमर्था अचरीकृताः ।
स सर्वोपि पितृपादाब्जपे(*r.* रे)णुर्मेह्यं प्रसीदतु ॥
अग्रे वक्ष्यमाणैरिति । ०

It ends:

इति श्रीपितृपादाब्जपरागारक्तचेतसा ।
श्रीवल्लभेन सिद्धांतविवृतेर्विवृतिः कृता ॥

IV. *Yamunāshṭapadīvivaraṇa*, by *Raghunātha* (?pupil, or son, of *Viṭṭhala*). It begins, fol. 10*a*:

यो गिरींद्रमवष्टभ्य स्थितो भक्तरिरक्षया ।
सप्राहमवमत्येंद्रं तं वंदे वल्लभात्मजं ॥ १ ॥
या कलिंदाचले चारु पतंती संगता भुवि ।
स्वभर्तृभक्तमोदाय कालिंदीं प्रणमामि तां ॥ २ ॥

अष्टपदीगीतेन यमुनां प्रार्थयितुं स्तोतुं वादौ नमस्यंति । नमो देवि यमुन इति ० ॥

Colophon: इति श्रीमद्वल्लभनंदनचरणैकशरणरघुनाथकृतौ यमुनाष्टपदीविवरणं संपूर्णं ॥

V. A commentary on the *Siddhāntamuktāvalī* (see p. 827*a*, no. 4). It begins, fol. 14*a*:

प्रणम्य पितृपादाब्जपरागमनुरागतः ।
कृपया विशदीकुर्मस्तद्वाङ्मुक्ताफलावलीं ॥ १ ॥
स्वसिद्धांतेति अग्रे वक्ष्यमाणैर्बहुभिर्मियो विरुद्धैः ०

VI. *Yamunāshṭakavivṛiti*, by *Viṭṭhala*. It begins, fol. 19*a*:

विश्वोद्धारार्थमेवाविर्भूतवृंदावनप्रिया(:) ।
कृपयंतु सदा तातचरणा मयि विट्ठले ॥ ० ॥
नमामीति ० ।

DR.RUPNATHJI(DR.RUPAK NATH)

Colophon: इति श्रीगोपीजनवल्लभचरणैकतानश्रीविट्ठलविरचिता यमुनाष्टकविवृतिस्संपूर्णा ॥

[GAIKAWAR.]

## 2518.

**2611c.** Foll. 20 (and a *śuddhapattra* to 10); size 8¼ in. by 3¾ in.; indifferent, modern Devanāgarī writing; eight lines in a page.

*Vallabhāshṭakavivṛitiprakāśa*, a gloss on a commentary on *Viṭṭhaleśvara's Vallabhāshṭaka*, by *Purushottama*, son of *Pītāmbara*.

It begins:

नत्वा श्रीवल्लभाचार्यचरणाम्बुजरजांस्यहं ।
तदष्टकीयविवृतेर्भावं वच्मि कृपावलात् ॥ १ ॥

तत्र पूर्वमुपोद्घाततयेदमुच्यते। सर्वश्रुतिशिरस्सु परब्रह्मण एव परमत्वं सच्चिदानंदरूपेण वैयासदर्शने सिद्धे । °

It ends:

इति श्रीवल्लभाचार्यदासेन कृपया मया ।
तद्दर्शितेन मार्गेण विवृतिः संप्रकाशिता ॥

इति श्रीवल्लभाचार्यदासानुदासेन पीतांबरतनुजपुरुषोत्तमेन विरचितो ऽयं श्रीवल्लभाष्टकविवृतिप्रकाशः ॥

[GAIKAWAR.]

## 2519.

**2611d.** Foll. 5; size 8½ in. by 4 in.; fairly written, in Devanāgarī, about 1700 A.D.; 10 or 11 lines in a page.

*Bhaktivardhinīvivaraṇa*, a versified exposition of *Vallabhācārya's Bhaktivardhinī*; by *Haridāsa*.

It begins:

श्रीवल्लभाचार्यपदानुकंपावलेन किंचित्परिचिंत्य चित्ते ।
निरूप्यते भक्तिविवृद्ध्युपायनिरूपणग्रंथनिरूपितो ऽर्थः॥१॥

प्रकृतिप्रत्ययार्थाभ्यां भक्तिसप्रेमसेवनं ।
चेतस्तत्प्रवणं तच्च ननु चित्तप्रसाधितं ॥ २ ॥

तत्र मूलं हरेरंगीकारो ऽथ शरणागतिः ।
ततः समर्पणाज्जीवदेहसंवंधिन्युद्धता(?) ॥ ३ ॥

It ends:

इति श्रीवल्लभाचार्यकरुणालब्धशक्तितः ।
स्वसंतोषाय भावस्य पोषयति प्रयत्नतः ॥ ८६ ॥

श्लोकरूपेण सर्वापि विवृता भक्तिवर्धिनी ।
यथामति निजाचार्यचरणाश्रयणादपि ॥ ८७ ॥

एतेनास्मत्कुलपतिः प्रभुः श्रीविट्ठलेश्वरः ।
प्रसीदतु सदा दासे हरिदासे स्ववंशगे ॥ ८८ ॥

टीका भक्तिवर्द्धिनिनी(!) श्रीहरिदासजीकृतछे ॥

[GAIKAWAR.]

## 2520.

**2663b.** Foll. 3; size 9 in. by 4 in.; fair, modern Devanāgarī writing; nine lines in a page.

A fragment, consisting of thirteen verses in praise of *Vishṇu*. Rather incorrect.

It begins (somewhat corrected):

यया गीयते सत्सभापंडिताभा
यया पूज्यते राजभिर्मंडनापि(?) ।
यया प्राप्यते ब्रह्मलोको दुरापः
करोत्वेव सा गीः सहायं द्रुतं मे ॥ १ ॥

स्मरंते पठंते हरे त्वां मनुष्या
लभंते पदं ते विभो शांतियुक्तं ।
अतो ऽहं भजे सच्चिदानंदरूपं
यशोदाकिशोरं हरिं रुक्मणेशं(*r.* रुक्मिणीशं) ॥ २ ॥

भवाशीविषाद्भीतमानंदरूप
सदा रक्ष विश्वेश गोपीप्रिय त्वं ।
त्वदन्यः स्मृतः किं विभो त्राति मां
यथा वारिदान्नैव वीजांकुरं हि ॥ ३ ॥

The first leaf is marked शंकरो° in one margin, and रामः in the other. [GAIKAWAR.]

## 2521.

**1635e.** Foll. 10; size 8¾ in. by 4 in.; legibly written, in Devanāgarī, about 1700 A.D.; ten lines in a page.

*Bhaktiśata*, consisting of 101 verses in praise of *Krishṇa*, by *Anantadeva*.

It begins:

भगवद्भजनारंभे संभावय मतिं मम ।
अपाराचारसंसारनिस्ताराय तदेव नः ॥ १ ॥



DR.RUPNATHJI( DR.RUPAK NATH )

It ends :

वनिता सुलता सुयोजिता
कुपतौ खल्पतरौ च ताम्यति ।
अथ कल्पतरौ हरौ स्थिता
कविताकल्पलते विभासि भूरि ॥ १०१ ॥

[H. T. Colebrooke.]

## 2522.

**823b.** Foll. 24; size $12\frac{3}{4}$ in. by $4\frac{1}{2}$ in.; good, modern Bengalī handwriting; eight lines in a page.

*Susiddhāntapushpāvalī,* a eulogium of *bhakti* as the highest form of *Vishṇu* worship, by *Bhāgavatānanda Gosvāmin.*

It begins:

यानन्दैकस्वरूपा हरिसुवशकरी सिद्धचूडामणिर्या
सा कृष्णप्रेमभक्तिः प्रभवति पतितानां च येषां प्रसादात् ।
येषां पादाब्जरेणुः शिरसि विनिहिता याति चिन्तामणित्वं
नत्वा भक्तानतस्तान्हरिचरणवरा(न्) कोऽपि वक्तीशकीर्तिं [॥ १ ॥

ईशकीर्तिकथनप्रयोजनमाह ।

संसारदुःखजलधिं तरणिस्तितीर्षोः
संकीर्तनं भवतो गुणकर्मनाम्नां ।
श्रुत्वेत्यमच्युतकृपालवमाकलय्य
नीचो ऽपि वच्मि चरितं मधुसूदनस्य ॥ २ ॥

ननु ब्रह्मादिदुःसाध्ये कथं नीचस्य वृत्तिरित्याह । °

It ends:

सुसिद्धान्तपुष्पावलीयं मुरारेः
पदाब्जार्चने सज्जनप्रीतये ऽस्तु ।
मयोपाहृता सात्वतोद्यानतो या
विना वैष्णवानां प्रसादान्न लभ्या ॥

इति भागवतानन्दगोस्वामिविरचिता सुसिद्धान्तपुष्पावली समाप्ता ॥

[H. T. Colebrooke.]

## 2523.

**2599.** Foll. 11; size 12 in. by 5 in.; clear, modern Devanāgarī writing; nine lines in a page.

*Kāśīmṛitimokshavinirṇaya,* or *Kāśīmokshanirṇaya,* a treatise on the efficacy of dying at Kāśī as insuring final emancipation to a devout Hindu; by *Sureśvarācārya.*

It begins: श्रीविश्वनाथाय नमः (see Aufr., Cat. Cat., काशीमोक्षनिर्णयः) ॥

नमस्कृत्य जगन्नाथं मायया चंद्रशेखरं ।
गंगाधरं गरच्छायानीलकंठमुपास्महे ॥ १ ॥

वाराणसीं पुरीं पुण्यां ये ऽधितिष्ठंति जंतवः ।
व्याचष्टे तारकं ब्रह्म रुद्रस्तेषां दयानिधिः ॥ २ ॥

प्राणप्रयाणसमये प्राप्य ज्ञानं महेश्वरात् ।
मुच्यंते जंतवः सर्वे वद्धाश्चानाद्यविद्यया ॥ ३ ॥

मोक्षस्तेषां तादात्म्यं घटे तरखयोरिव(?) ।
पुनर्देहांतरारंभे कारणं नास्ति किंचन ॥ ४ ॥

सालोक्यादेर्न विद्वद्भिः साक्षान्मोक्षत्वमिष्यते ।
उपास्तेः पर(फल marg.)रूपत्वात्तारतम्यपदस्थितेः ॥५॥

ज्ञानाग्निना विनष्टत्वाद्विश्लिष्टा पूर्वकर्मणां ।
उत्तरेषां न विश्लेषो भवेन्मुक्तस्य जीवतः ॥ ६ ॥

प्रारब्धं कर्मभोगेन क्षीयते ज्ञानकारणं ।
ततो विदेहकैवल्यं भवतीति सुनिश्चितं ॥ ७ ॥

काश्यां विदेहकैवल्यप्राप्तेरुत्तरकर्मणां ।
असंभवान्न विश्लेषो वेदितव्यो विचक्षणैः ॥ ८ ॥

किमत्र प्रमाणं । श्रूयते हि । तद्यथा ईषिकातूलमग्नौ प्रोतं प्रदूयते एवमिहास्य सर्वे पाप्मानः प्रदूयंत इति । ° तर्हि पापकर्मणामेव विलयः श्रूयते न पुण्यकर्मणामिति चेन्नेत्याह । ब्रह्मादीनां शरीराणि श्वसूकरशरीरवत् । यतो जिहासितव्यानि तस्माद्धर्मे ऽपि पाप्मगीरिति वचनात् । पुण्यकर्मारब्धानां ब्रह्मेंद्रादिशरीराणां पापकर्मारब्धश्वसूकरादिशरीरवज्जिहासितव्याविशेषात्पुण्यस्यापि कर्मणः पाप्मत्वेन कीर्तनं युक्तं ॥ तथा च भगवद्गीतासु श्रूयते । ° further on the opening paragraphs of the *Jābālopanishad* are cited.

It ends: किं बहूक्तेन ॥

येन केनापि यः कश्चिन्निमित्तेन परित्यजेत् ।
काश्यां प्राणान्सर्वजंतुर्मुक्त इत्यवगम्यतां ॥

मोक्षस्य निर्णयः काश्यामित्थमेकेन जन्मना ।
सर्वेषामेव जंतूनां प्रमाणैः प्रतिपादितः ॥

DR.RUPNATHJI(DR.RUPAK NATH)

विश्वेश्वरो जयति विश्वविमुक्तिहेतोः
काशीनिवासरसिकः करुणासमुद्रः ।
यत्पादपद्मयुगसौरभवासितस्य
जंतोर्भवत्यकृतके शिवसागरस्य ॥

इति श्रीसुरेश्वराचार्यविरचितः सकलश्रुतिस्मृतिपुराणवाक्यनिर्धारितः काशीमृतिमोक्षविनिर्णयः समाप्तः ॥

On fol. 1*a* the treatise is called *Kāśīmuktiprakāśikā*, cf. Wilson, Mack. Coll. (second ed.), p. 125.

This work, as well as the succeeding one, should perhaps rather have been given under Sacred Law than under *Bhakti*.

[MACK. COLL.]

## 2524.

**1991.** Foll. 55; size $8\frac{1}{2}$ in. by 4 in.; clear, correct, modern Devanāgarī writing (European paper); nine lines in a page.

*Prapañcasāraviveka*, or *Bhavasāraviveka*, a course of moral and religious instruction for pious *Vaishṇavas*, in eight chapters; by *Gaṅgādhara*, son of *Sadāśiva-sūri Mahāḍakara*, and pupil of *Advaitānanda*.

It begins:

नमस्कृत्य शिवानाथं लक्ष्मीकांतं जगद्गुरुं ।
भवानीं ढुंढिराजं च दंडपाणिं च भैरवं ॥ १ ॥

गंगां सरस्वतीं रामं वायुपुत्रं जितेंद्रियं ।
देवदैत्यगुरू सूर्यं वाल्मीकिं व्यासनारदौ ॥ २ ॥

अद्वैतानंदपादाब्जं पितरं मातरं गुरुं ।
देवानृषीन् पितॄन् धर्मं काशीं च हृदि भक्तितः ॥ ३ ॥

सदाशिवतनूजन्मा वत्सर्षिकुलसंभवः ।
गंगाधरो ऽतिविख्यातो भगवद्भक्तिकिंकरः ॥ ४ ॥

नानाशास्त्राणि चालोक्य बालानां हितकाम्यया ।
भवसारविवेकं च कुर्वे मोहविनाशकं ॥ ५ ॥

यस्य प्रज्ञानमात्रेण मातेव हितकारिणी ।
बुद्धिर्विवर्धते पुंसां तस्मादाद्रियतां बुधैः ॥ ६ ॥

सुभाषितं विचित्रं च यो नो जानाति मानवः ।
बलीवर्दसमो लोके शोभते शृंगवर्जितः ॥ ७ ॥

रूपयौवनसंपन्ना विशालकुलसंभवाः ।
विद्याहीना न शोभंते निर्गंधाः किंशुका इव ॥ ८ ॥

विद्यां प्राप्य प्रयत्नेन धर्ममोक्षं न विंदति ।
अर्थकामपरो नित्यं स वै मूढ इति श्रुतः ॥ ९ ॥

यस्य विद्यापवर्गाय परोपकृतिजीवितं ।
स साधुर्वीर इत्याहुः पंडिताः कवयो महान्(!) ॥ १० ॥

शीलविद्याविहीनेन किं कुलेन च देहिनां ।
अकुलीनो ऽपि विद्वान्सः पूज्यते दैवतैः सह ॥ ११ ॥

विद्या यशस्करी पुंसां श्रेयःसंतोषदायिनी ।
सम्यगाराधिता विद्या मोक्षदा इति मे मतिः ॥ १२ ॥

शूरश्च कृतविद्यश्च यश्च जानाति सेवितुं ।
रूपयौवनसंपन्ना या नारी धनिकः कविः ॥ १३ ॥

दाता दोग्ध्री सुधेनुश्च मंजुभाषी जितेंद्रियः ।
एते यत्र च तिष्ठंति तत्र लोकाः कृतादराः ॥ १४ ॥

किं तपः किं सुखं दानं को धर्मः कस्य संपदः ।
कः शूरः कश्च विद्वांश्च को लाभः संसृतौ महान् ॥ १५ ॥

को देवः कश्च पूज्यश्च धीरः को बंधुरेव च ।
शत्रुः कः किं च मित्रं च किं फलं जीवितस्य तु ॥ १६ ॥

भूषणं किं पवित्रं च ग्राह्यं किं त्याज्यमेव च ।
तीर्थं किं कश्च मुक्तश्च मूर्खः को ब्रूत तत्त्वतः ॥ १७ ॥

I. (*śl.* 17) *upodghāta*; II. (*śl.* 60) *gūḍhārthapraśnottaranirūpaṇa*; III. (*śl.* 146) *nītimārganirūpaṇa*; IV. (*śl.* 55) *karmavipākanirūpaṇa*, on sins and punishments; V. (*śl.* 73) *devasvarūpanirūpaṇa*, on God (*Vishṇu*); VI. (*śl.* 115) *vāsudevapūjānirūpaṇa*, on the modes of worshipping *Vishṇu*; VII. (*śl.* 105) *bhāgavatadharmanirūpaṇa*, on the duties of a *Vaishṇava*, and the reward accruing therefrom; VIII. (*śl.* 267) *ahorātrakṛityanirūpaṇa*, on religious rites generally.

The verses seem to be partly the author's own, and partly culled from various sources.

The *bhakti*-element, though not too obtrusive, is by no means absent. While a devout adherent of *Vishṇu*, the author is not bigoted, and allows to *Śiva* a certain share

DR.RUPNATHJI( DR.RUPAK NATH )

of religious sentiment. We extract a few passages :

एको देवो ऽद्वयः कृष्णो वासुदेवो निरंजनः ।
सर्वाधारः सर्वसाक्षी वेत्ता सर्वावभासकः ॥

सर्वव्यापी नियंता च भूतानां सर्वदेहिनां ।
मायावी निर्गुणः शुद्धः कर्ता पातांतको गुरुः ॥

यस्यांतःस्थानि भूतानि येन सर्वमिदं ततं ।
सर्वज्ञो ऽनंतशक्तिश्च विश्वरूपी सुखात्मकः ॥

सत्यो भूतहितो ऽनंतो देवदेवो महेश्वरः ।
भोक्ता च यज्ञतपसां पवित्रो मंगलं परं ॥

क्रूराणां पापिनां शास्ता भक्तानामभयंकरः ।
यस्याधीनाश्च देवाश्च गंधर्वाः पितरो नराः ॥ fol. 20*b*.

दुर्लभं भारते वर्षे जन्म तस्मान्मनुष्यता ।
मनुष्याद्ब्राह्मणत्वं च दुर्लभं सुतरां मतं ॥

लब्ध्वा भक्तिं न कुर्वंति वासुदेवे महात्मनि ।
जीवन्मृतास्तु ते ज्ञेया न संभाष्याः कदाचन ॥

तच्चित्तस्तद्गतः प्राणः प्रेमभावेन तत्परः ।
भक्त इत्युच्यते सद्भिर्भीष्मप्रह्लादनारदैः ॥

अद्य श्वो वा मरिष्यंति गमिष्यंति यमालयं ।
हरिं यदि स्मरिष्यंति तरिष्यंति भवार्णवं ॥

अनित्यमसुखं लोकं जन्ममृत्युजराकुलं ।
मत्वा तु सततं धीरो नारायणपरो भवेत् ॥

विविक्तदेश आसीनो विरागो विजितेंद्रियः ।
प्रसन्नचित्तः सततं ध्यायेद्धृदि हरिं परं ॥ ° fol. 22*b*.

शालग्रामशिलाबिंबं कोटिहत्याविनाशनं ।
संस्मृतं पूजितं ध्यातं कीर्तितं च नमस्कृतं ॥

शालग्रामशिलारूपी यत्र तिष्ठति शंकरः ।
तत्र देवासुरयक्षभुवनानि चतुर्दश ॥

यवमात्रं तु गर्तः स्याद्यवार्धं लिंगमुच्यते ।
शिवनाभ इति प्रोक्तस्त्रिषु लोकेषु दुर्लभः ॥

वासुदेवमयं क्षेत्रं लिंगं शिवमयं स्मृतं ।
तस्माद्धरिहरक्षेत्रे पूजयेच्छंकराच्युतौ ॥ °

शालग्रामशिला रम्या द्वारकाचक्रसंयुता ।
तुलसीशंखघंटाद्यैः पूजिता मुक्तिदायिनी ॥

तस्मात्तु ब्राह्मणो नित्यं त्रिकाले भक्तितः शुचिः ।
शालग्रामशिलायां हि पूजयेद्धरिमव्ययं ॥ fol. 26b.

शालग्रामशिलायाश्च गंगाया गुणवर्णने ।
तुलस्याश्च विशेषेण न समर्थः प्रजापतिः ॥

तुलस्यमृतजन्मासि सदा त्वं केशवप्रिया ।
केशवार्थं विचिन्वामि(? न्नामि) वरदा शोभने भव ॥

एवं संप्रार्थ्य तुलसीं गृह्णीयात्तां हरिप्रियां ।
पूजयित्वा रमाकांतं कृतकृत्यो भवेन्नरः ॥ fol. 29*b*.

ध्यानं परं कृतयुगे त्रेतायां यजनं तथा ।
द्वापरे विष्णुपूजा च कलौ केशवकीर्तनं ॥

ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरे ऽर्चयन् ।
यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवं ॥ fol. 34*a*.

It ends :

य इदं स्मृतिसारार्थं महर्षीणां च संमतं ।
भक्त्या पठेत्पाठयेद्वा स विद्वान्मुक्तिमाप्नुयात् ॥ २३५ ॥

शास्त्राब्धिमथनाज्जातो ग्रंथो ऽयं पारिजातकः ।
बुधानां कामदो भूयान्मूढानां भजतामपि ॥ २६६ ॥

बहवो यद्यपि ग्रंथाः पादपाः संति भूतले ।
तथाप्ययं विजयते हरिनामफलैः शुभैः ॥ २६७ ॥

इति श्रीमन्महाडकरोपनामकसदाशिवसूरिसूनुभगवद्भक्तकिंकरगंगाधरविरचिते प्रपंचसारविवेके अहोरात्रकृत्यनिरूपणं नाम अष्टमोल्लासः समाप्तः ॥

For another MS. of this work, see Rāj. Mitra, Notices of Sanskrit MSS., x., p. 162.

[Dr. John Taylor.]

---

## G. Kaśmīr Śaivism.

(*Spanda and Pratyabhijñā.*)

### 2525.

**66a.** Foll. 48; size 11 in. by 6 in.; good, thick (*Kaśmīr*) Devanāgarī writing of about 1750 A.D.; thirteen lines in a page.

*Spandavivṛiti* (or *Spandakārikāvivaraṇa*), a commentary, by *Rājānaka Rāma*, on *Bhaṭṭa Kallaṭa's Spandakārikā* (or *Spandārthasūtrāvalī*), or metrical paraphrase of *Vasugupta's Spandasūtra* (or *Śivasūtra*).

DR.RUPNATHJI( DR.RUPAK NATH )

The commentary also includes the text of the *kārikās* as well as that of *Kallaṭa's* own brief explanation (*vṛitti*) of his verses, and is thus an exposition of the whole of the *Spanda-sarvasva*, as *Kallaṭa's Kārikās* and *Vṛitti* are also called.

It begins:

दशादिक्कालाद्यैरकलितचिदालोकवपुष:
  सदा तादृक्स्वात्मानुभवितृतया विस्फुरति य: ।
निजो धर्म: शंभोरनुपमचमत्कारसरस:
  परं शाक्तं तत्त्वं जयति जगति स्पंद इति तत् ॥

तज्ज्ञैरदर्शितदिश: स्वयमाविशंत:
  केचिन्निसर्गगहनं विषमं भ्रमंतु ।
तेनैव यत्पुनरमी हतवर्त्मनान्या
  नाकारयंति गमनाय महान्भ्रमो ऽयम् ॥

नानावादानिलौघाननवसरकृतान्योन्यसंघट्टघोरो-
  द्धातानापातयद्भि: श्रवणविदलनोद्दामशब्दप्रबंधान् ।
शास्त्राब्धि: क्षोभिते यैर्विवरणरभसादुच्चदावर्तभीम-
  भ्रांतिभृष्टागमार्थप्लवविधुरमतिस्तारितीर्थी जनस्तै: ॥

कश्चिद्भिन्नरुचिर्विदन्नपि परं तत्त्वं विपर्यस्यति
  द्वेषध्वांतविरुद्धबुद्धिरितरो जात्यैव चान्यो जड: ।
इत्थं दुर्लभ एव सर्वहृदयग्राही गिरां संग्रह:
  किं त्वेते ऽद्य विवेकिन: कतिपये संत्यत्र पात्रं सताम् ॥

केनापि ग्रथितां प्रमारणधिया कश्चिद्धि सूत्रे कृताम्
  एकीकृत्य यथागमं विरचितां स्पंदार्थसूत्रावलीम् ।
ईशानुग्रहशक्तिवज्रशिखया विद्धेष्वविद्धात्मनो-
  माणिक्येषु निवेशयाम्यहमिमां कर्तुं कृतार्थं (*r.* र्थो)
                                  [द्वयीम् ॥

ओं नम: शिवाय सशिवाय ॥ ओं

[*Kārikā*] यस्योन्मेषनिमेषाभ्यां जगत: प्रलयोदयौ ।
  तं शक्तिचक्रविभवप्रभवं शंकरं स्तुम: ॥ १ ॥

[*Vṛitti*] अनेन स्वस्वभावस्यैव शिवात्मकस्य संकल्पमात्रेण जगदुत्पत्तिसंहारयो: कारणत्वं विज्ञानदेहात्मकस्य शक्तिचक्रैश्वर्य-स्योत्पत्तिहेतुत्वं नमस्कारद्वारेण प्रतिपाद्यते ॥

[*Vivṛiti*] तं शंकरं श्रेयस: कर्तारं स्तुम: प्रशंसाम: । तं कं । यस्योन्मेषनिमेषाभ्यां शक्तिप्रसरप्रलयाभ्यां जगतो विश्वस्य प्रलयोदयौ विनाशप्रादुर्भावौ । अत्र यथासंख्यं न विवक्षितमिति वक्ष्याम: । तं कीदृशं । शक्तिचक्रविभवप्रभवं । शक्तीनां वक्ष्य-माणस्वरूपाणां चक्रं समूह: । स एव विभव ऐश्वर्यं तस्य प्रभव: ।° (fol. 4*b*) अभिधानमस्य शास्त्रस्य स्पन्द इति यत: स्पंदतत्त्व-विविक्तय इत्यादाविहैव व्यवहार: । स्पंदशब्दश्चायं स्वस्वभावप-रामर्शमात्रस्य नित्यस्य शून्यताव्यतिरेचनकारणभूतस्य तावन्मात्र-संरंभात्मन: शक्त्यपराभिधानस्य पारमेश्वरस्य धर्मस्य किंचिच्चल-नात्स्पंद इत्यर्थानुगमाद्वाचकत्वेन व्यपदिष्ट: । तत्प्रतिपादनहेतु-त्वाच्छास्त्रमपीदं स्पंदशब्देनाभिधीयते। विषयश्चास्य विशुद्धश्रद्धा-भक्तिप्रकर्षपरिशुनित(!)परमेश्वरपरशक्तिपातप्रोन्मील्यमानस्वभा-वालोकतिरस्कृतसकलसंदेहांधकारत्वात्प्रबुद्ध: सम्यगुपनतदीक्षा-दिसंस्कारो गुरुवचनचोदनामात्रावशेषस्वात्मैश्वर्योपलब्धिस्तादृ-शस्यैवेहोपदेशत्वेन पुरस्तात्परिगृहीतत्वादित्यभिधानविषयाववग-वगंतव्यौ ॥ व्याख्यातश्चायमादिश्लोक: । समस्तकरणार्थोपक्षेप-गर्भ: ॥ १ ॥

We subjoin the text of the remaining *kārikās*, slightly emended with the help of the commentaries and a careful collation kindly supplied by Professor Bhandarkar (B):

यत्र स्थितमिदं सर्वं कार्यं यस्माच्च निर्गतम् ।
तस्यानावृतरूपत्वान्न निरोधो ऽस्ति कुत्रचित् ॥ २ ॥ 5*a*.

जाग्रदादिविभेदे ऽपि तदभिन्ने प्रसर्पति ।
निवर्तते निजान्नैव स्वभावादुपलब्धृत: ॥ ३ ॥ fol. 6*a*.

अहं सुखी च दु:खी च रक्तश्चेत्यादिसंविद: ।
सुखाद्यवस्थानुस्यूते वर्तन्ते ऽन्यत्र ता: स्फुटम् ॥ ४ ॥ 8*a*.

न दु:खं न सुखं यत्र न ग्राह्यं ग्राहको न च ।
न चास्ति मूढभावो ऽपि तदस्ति परमार्थत: ॥ ५ ॥ 8*b*.

यत: करणवर्गो ऽयं विमूढो ऽमूढवत्स्वयम् ।
सहान्तरेण चक्रेण प्रवृत्तिस्थितिसंहृती: ॥ ६ ॥ 9*a*.

लभते तत्प्रयत्नेन परीक्ष्यं तत्त्वमादरात् ।
यत: स्वतन्त्रता तस्य सर्वत्रेयमकृत्रिमा ॥ ७ ॥ fol. 9*b*.

न हीच्छा नोदनस्यायं प्रेरकत्वेन वर्तते ।
अपि त्वात्मबलस्पर्शात्पुरुषस्तत्समो भवेत् ॥ ८ ॥ fol. 10*b*.

निजाशुद्ध्यासमर्थस्य कर्तव्येष्वभिलाषिण: ।
यदा क्षोभ: प्रलीयेत तदा स्यात्परमं पदम् ॥ ९ ॥ 11*b*.

तदा स्यात्कृत्रिमो धर्मो ज्ञत्वकर्तृत्वलक्षण: ।
यतस्तदीप्सितं सर्वं जानाति च करोति च ॥ १० ॥ 12*a*.

तमधिष्ठातृभावेन स्वभावमवलोकयन् ।
स्मयमान इवास्ते यस्तस्येयं कुसृति: कुत: ॥ ११ ॥ 12*b*.

DR.RUPNATHJI( DR.RUPAK NATH )

नाभावो भावि(*r.* भाव्य)तामेति न च तत्रास्त्यमूढता ।
यतो ऽभियोगसंस्पर्शात्तदासीदिति निश्चयः ॥ १२ ॥ 13*a*.

अतस्तत्कृत्रिमं ज्ञेयं सौषुप्तपदवत्सदा ।
न त्वेवं स्मर्यमाणत्वं तत्तत्त्वं प्रतिपद्यते ॥ १३ ॥ fol. 13*b*.

अवस्थायुगलं चात्र कार्यकर्तृत्वशब्दितम् ।
कार्यता क्षयिणी तत्र कर्तृत्वं पुनरक्षयम् ॥ १४ ॥ 14*b*.

कार्योन्मुखः प्रयत्नो यः केवलं सो ऽत्र लुप्यते ।
तस्मिंल्लुप्ते विलुप्तो ऽस्मीत्यबुधः प्रतिपद्यते ॥ १५ ॥ 15*a*.

न तु यो ऽन्तर्मुखो भावः सर्वज्ञत्वगुणास्पदं ।
तस्य लोपः कदाचित्स्यादन्यस्यानुपलम्भनात् ॥ १६ ॥ 15*b*.

इति ० व्यतिरेकोपपत्तिनिर्देशः प्रथमो निष्पन्दः ॥ fol. 16*a*.

तस्योपलब्धिः सततं त्रिपदाव्यभिचारिणी ।
नित्यं स्यात्सुप्रबुद्धस्य तदाद्यन्ते परस्य तु ॥ १७ ॥ 16*a*.

ज्ञानज्ञेयस्वरूपिण्या शक्त्या परमया युतः ।
पदद्वये विभुर्भाति तदन्यत्र तु चिन्मयः ॥ १८ ॥ fol. 17*b*.

गुणादिस्पन्दनिष्पन्दाः सामान्यस्पन्दसंश्रयात् ।
लब्धात्मलाभाः सततं स्युर्ज्ञस्यापरिपन्थिनः ॥ १९ ॥

अप्रबुद्धधियस्त्वेते स्वस्थितिस्थगनोद्यताः ।
पातयन्ति दुरुत्तारे घोरे संसारवर्त्मनि ॥ २० ॥

अतः सततमुद्युक्तः स्पन्दतत्त्वविविक्तये ।
जाग्रदेव निजं भावमचिरेणाधिगच्छति ॥ २१ ॥ fol. 18*b*.

अतिक्रुद्धः प्रहृष्टो वाक्यं(*r.* वा किं) करोमीति वा मृशन् ।
धावन्वा यत्पदं गच्छेत्तत्र स्पन्दः प्रतिष्ठितः ॥ २२ ॥ 20*b*.

यामवस्थां समालम्ब्य यदयं मम वक्ष्यति ।
तदवश्यं करिष्ये ऽहमिति संकल्प्य तिष्ठति ॥ २३ ॥

तमाश्रित्योर्ध्वमार्गेण सोमसूर्यावुभावपि ।
सौषुम्णेऽध्वन्यस्तमितो हित्वा ब्रह्माण्डगोचरम् ॥ २४ ॥ 22*a*.

तदा तस्मिन्महाव्योम्नि प्रलीनशशिभास्करे ।
सौषुप्तपदवन्मूढः प्रबुद्धः स्यादनावृतः ॥ २५ ॥ fol. 23*a*.

तदाक्रम्य बलं मन्त्राः सर्वज्ञबलशालिनः ।
प्रवर्तन्ते ऽधिकाराय करणानीव देहिनाम् ॥ २६ ॥

तत्रैव संप्रलीयन्ते शान्तरूपा निरञ्जनाः ।
सहाराधकचित्तेन तेन ते शिवधर्मिणः ॥ २७ ॥ fol. 23*b*.

इति ० व्यतिरिक्तस्वभावोपलब्धिर्द्वितीयो निष्पन्दः ॥ fol. 25*a*.

यस्मात्सर्वमयो जीवः सर्वभावसमुद्भवात् ।
तत्संवेदनरूपेण तादात्म्यप्रतिपत्तितः ॥ २८ ॥ fol. 25*b*.

तेन शब्दार्थचिन्तासु न सावस्था न यः शिवः ।
भोक्तैव भोग्यभावेन सदा सर्वत्र संस्थितः ॥ २९ ॥

इति वा यस्य संपत्तिः(*r.* संवित्तिः) क्रीडात्वेनाखिलं जगत् ।
स पश्यन्सततं युक्तो जीवन्मुक्तो न संशयः* ॥ ३० ॥ 25*b*.

इति ० विश्वस्य स्वस्वभावशक्तिमात्रत्वोपपत्तिः तृतीयो निष्पन्दः ॥ fol. 27*b*.

अयमेवोदयस्तस्य ध्ये [यस्य ध्यायिचेतसि B.] ।
तदात्मतासमापत्तिरिच्छतः साधकस्य या ॥ ३१ ॥ 27*b*.

इयमेवामृतप्राप्तिरयमेवात्मनो ग्रहः ।
इयं निर्वाणदीक्षा च शिवसद्भावदायिनी ॥ ३२ ॥ 28*a*.

यथेच्छाभ्यर्थितो धाता जाग्रतो ऽर्थान्हृदि स्थितान् ।
सोमसूर्योदयं कृत्वा संपादयति देहिनः ॥ ३३ ॥

तथा स्वप्ने ऽप्यभीष्टार्थान्प्रणयस्यानतिक्रमात् ।
नित्यं स्फुटतरं मध्ये स्थितो ऽवश्यं प्रकल्पयेत् ॥ ३४ ॥ 29*a*.

अन्यथा तु स्वतन्त्रा स्यात्सृष्टिस्तद्धर्मकत्वतः ।
सततं लौकिकस्येव जाग्रत्स्वप्नपदद्वये ॥ ३५ ॥ fol. 30*b*.

यथा ह्यर्थो ऽस्फुटो दृष्टः सावधाने ऽपि चेतसि ।
भूयः स्फुटतरो भाति स्वबलोद्योगभावितः ॥ ३६ ॥

एवं(*v.l.* तथा B.) यत्परमार्थेन यत्र(*r.* येन) यत्र यथा [स्थितम् ।
तत्तथा बलमाक्रम्य नचिरात्संप्रवर्तते ॥ ३७ ॥ fol. 31*a*.

दुर्बलो ऽपि तदाक्रम्य यतः कार्ये प्रवर्तते ।
आच्छादयेद्बुभुक्षां च तथा यो ऽतिबुभुक्षितः ॥ ३८ ॥ 32*a*.

अनेनाधिष्ठिते देहे यथा सर्वज्ञतादयः ।
तथा स्वात्मन्यधिष्ठानात्सर्वत्रैवं भविष्यति ॥ ३९ ॥ 33*a*.

ग्लानिर्विलुण्ठिता(*r.* °का †) देहे तस्याश्चाज्ञानतः सृतिः ।
तदुन्मेषविलुप्तं चेत्कुतः सम्याद(*r.* सा स्याद्)हेतुका ॥ ४० ॥
एकचिन्ताप्रसक्तस्य यतः स्यादपरोदयः । [fol. 33*b*.
उन्मेषः स तु विज्ञेयः स्वयं तमुपलक्षयेत् ॥ ४१ ॥ 34*a*.

---

* Here, as in other instances where several *ślokas* are taken together for comment, the *vritti* for the whole is given after the *kārikās*, but at the end of the commentary the commentator remarks that the *vrittikrit* has taken them separately, as in the case of these three verses: व्याख्यातमेतद्वृत्तौ पृथक् सर्वात्मक एवायमात्मेत्यादिना तेन तथाविधेनेत्यादिना एवं स्वभावस्येत्यादिना ग्रंथेन ॥

† शरीर विलुंठिका धातुवर्णतेजःशक्त्यादीनां हठेन हर्त्री ।

DR.RUPNATHJI( DR.RUPAK NATH )

अतो बिन्दुरतो नादो रूपमस्मादतो रसः ।
प्रवर्तन्ते ऽचिरेणैव क्षोभकत्वेन देहिनः ॥ ४२ ॥ 34*b*.

दिदृक्षयेव सर्वार्थान्यदा व्याप्यावतिष्ठते ।
तदा किं बहुनोक्तेन स्वयमेवावभोत्स्यते (°गम्यते *v.l.* B.)
[॥ ४३ ॥ fol. 35*b*.

प्रबुद्धः सर्वदा तिष्ठेज्ज्ञानेनालोच्य गोचरम् ।
एकत्रारोपयेत्सर्वं ततो ऽन्येन न पीड्यते ॥ ४४ ॥ 36*a*.

शब्दराशिसमुत्थस्य शक्तिवर्गस्य भोग्यतां ।
कलाविलुप्तविभवो गतः सन्स पशुः स्थितः (*r*. स्मृतः) ॥
[४५ ॥ fol. 36*b*.

[परामृतरसापायस्तस्य यः प्रत्ययोद्भवः ।
तेनास्वतन्त्रतामेति स च तन्मात्रगोचरः ॥ ४६ ॥ B.*]

स्वरूपावरणे चास्य शक्तयः सततोत्थिताः ।
यतः शब्दानुवेधेन न विना प्रत्ययोद्भवः ॥ ४७ ॥ 40*a*.

सेयं क्रियात्मिका शक्तिः शिवस्य पशुवर्तिनी ।
बन्धयित्री स्वमार्गस्था ज्ञाता सिद्ध्युपपादिका॥४८॥ 41*a*.

तन्मात्रोदयरूपेण मनो ऽहंबुद्धिवृत्तिना (*r*. वर्तिना) ।
पुर्यष्टकेन संरुद्धस्तदुक्तं प्रत्ययोद्भवम् ॥ ४९ ॥

भुङ्क्ते परवशो भोगं तद्भावात्संसरेद्यथा (*r*. °दतः) ।
संसृतिप्रलयस्यास्य कारणं संप्रचक्ष्महे ॥ ५० ॥ fol. 41*a*.

यदा त्वेकत्र संरूढस्तदा तस्य लयोद्भवौ (°दयौ *v.l.* B.)।
नियच्छन्भोक्तृतामेति ततश्चक्रेश्वरो भवेत् ॥ ५१ ॥ 45*b*.

इति ° शक्त्यात्मकविश्वाव्यतिरेकोपलब्धिः प्रकीर्णश्चतुर्थो निष्पन्दः ॥ fol. 47*a*.

अगाधसंशयाम्भोधिसमुत्तरणतारिणीम् ।
वन्दे विचित्रार्थपदां चित्रां तां गुरुभारतीम् ॥ ५२ ॥

[*Vṛitti* :] अगाधो ह्यप्रतिष्ठो ऽनंतः ॥

समाप्तं स्पंदसर्वस्वं प्रवृत्तं भट्टकल्लटात् ।
स्वप्रकाशैकचित्तत्वपरिरंभरसोत्सुकात् ॥

[*Vivṛiti* :]

दृब्धं महादेवगिरौ महेश-स्वप्नोपदिष्टाच्छिवसूत्रसिंधोः ।
स्पंदामृतं यद्वसुगुप्तपादैः श्रीकल्लटस्तत्प्रकटीचकार ॥

* Prof. Bhandarkar's MS. of the *Vivaraṇa* likewise omits the text of this verse, supplied by him from a copy of the *Spandakārikā* in the *Śāradā* character (Rep. of 1875-76, no. 508).

तामशक्यस्वरूपप्रतिपादनां हृदि स्फुरंतीं गुरुभारतीं वंदे । गुरोर्वसुगुप्ताभिधानस्य साक्षात्सिद्धमुखसंक्रांतसमस्तरहस्योपनिषद्भूतस्पंदतत्त्वामृतनिष्पंदस्य भारतीं वाचं स्तौमि ॥ कीदृशीं । अगाधेत्याद्यर्धेन विशेषणम् । ° ending with four benedictory stanzas, the last of which runs thus:

शशिज्योतिर्दीपप्रभृतिभिरशक्यं शमयितुं
यदासीन्निष्पंदीकृतसकललोकं किल तमः ।
गते तत्रेदानीं क्षयममलसूर्यागमहते
कृतार्थाः संकोचं विजहतु विनिद्रा जनदृशः ॥

संपूर्णेयं वृत्त्यनुसारिणी स्पंदविवृतिः ॥ कृतिस्तत्रभवतो महामाहेश्वराचार्यशिरोमणिराजानकश्रीमदुत्पलदेवानुजीविनो राजानकश्रीरामस्येति शिवम् ॥ °

Quotations are met with in the commentary from *Jñānagarbhastotra*, fol. 41*b*; *Tattvagarbha(stotra)*, foll. 37*a*, 38*a* (यदा त्वेवंविधादत्र निजा भोगज्ञतां पशोः । तदा माया स्वरूपेति ज्ञायसे वैभवाश्रयः ॥); the *Parameśvara*, fol. 3*b* (शक्तिश्च शक्तिमांश्चैव पदार्थद्वयमुच्यते । शक्तयो ऽस्य जगत्कृत्स्नं शक्तिमांश्च महेश्वर इति ।); *Pratyabhijñā*, foll. 38*a*, 40*b* (*an. ślokas*); *Bhartrihari*, fol. 30*b* (प्रविभज्यात्मनात्मानं सृष्ट्वा भावान्पृथग्विधान् । सर्वेश्वरः सर्वशक्तिः स्वप्ने भोक्ता प्रपद्यते ॥); *Mālinīvijaya*, fol. 42*b* (तथा च श्रीमालिनीविजये ॥ या सा शक्तिर्जगद्धातुः कथिता समवायिनी । इच्छा त्वं तस्य सा देवि सिसृक्षोः प्रतिपद्यते ॥); whilst other schools of Yoga philosophy are referred to at fol. 13*a*: यथान्यैर्योगिभिरुपदिश्यते ।

On the tenets and principal works of the *Kaśmīr Śaivas*, see esp. Hall, Index, pp. 196 seq.; Bühler, Detailed Report, pp. 77 seq.; Bhandarkar, Report 1883-4, pp. 76 seq.

*Bhaṭṭa Kallaṭa*, the disciple of *Vasugupta*, lived under king *Avantivarman*, who reigned about 854 A.D.; whilst *Rājānaka Rāma* calls himself a dependent (or pupil) of *Rājānaka Utpaladeva*, who, if identical with the author of the *Pratyabhijñā*, is assigned by Prof. Bühler to the first half of the tenth century. At the end of his commentary on the *Bhagavadgītā*, *Rājānaka Rāma* (also called *Rāmakaṇṭha*)



DR.RUPNATHJI( DR.RUPAK NATH )

speaks of himself as a younger brother of *Muktākaṇa* (? the same as the poet of that name in the time of *Avantivarman*), and a descendant of *Nārāyaṇa* of Kānyakubja*; whilst in the colophon of a MS. of his *Nareśvaraparīkshāprakāśa* (Rāj. Mitra, Notices, iii., no. 1140) the author is called *Nārayaṇakaṇṭha-sūnu-Rāmakaṇṭha*.

*Rāmakaṇṭha* is referred to in the *Sarvadarśanasaṃgraha* (Cowell and Gough, transl., p. 125) in the chapter on the *Śaivadarśana*, in connection with the interpretation of the term *puryashṭaka* in the 49th *kārikā* (or rather the corresponding *spandasūtra*), where the present commentary gives the following interpretation (fol. 44*b*): पुर्यां सूक्ष्मशरीरे तन्मात्रपंचकं गुणत्रयमिति स्थूलशरीरकारणभूतमष्टकं यत्सन्निविष्टं तन्मुख्यं पुर्यष्टकं तत्कार्यत्वात्स्थूलमपि शरीरं तच्छब्देन पुर्यष्टकमित्युच्यते ॥ *Nārāyaṇakaṇṭha* is likewise referred to in the same work (ib. p. 129), apparently as the author of the *Mrigendravṛitti*.

Fol. 1*a* contains the following note, in Colebrooke's hand, '*Syanda*: a demonstration of the Identity of *Śiva* and his active power or *Śakti*.' [H. T. Colebrooke.]

## 2526.

**1573a.** Foll. 78; size 10 in. by 4½ in.; fair Devanāgarī writing of about 1750 A.D.; nine lines in a page.

*Triṃśikātattvavivaraṇa* (or *Parātriṃśikātattvavivaraṇa*), an exposition, by *Rājānaka Abhinavagupta* (son of *Cukhala*, and disciple of *Utpala*), of the *Triṃśikā* (or *Parātriṃśikā*), a versified treatise of *Kaśmīr Śaiva* philosophy. Very correct.

It begins:

विमलकलाश्रयाभिनवसृष्टिमहाजननी
भरिततनुश्च पंचमुखगुप्तरुचिर्जनकः ।
तदुभययामलस्फुरितभावविसर्गमयं
हृदयमनुत्तरामृतकुलं मम [सं]स्फुरतात् ॥ १ ॥
यस्यामंतर्विश्वमेतत् स्फुरंत्या
बाह्याभासंभासमानं विसृष्टौ ।
क्षोभे क्षीणे ऽनुत्तरायां स्थितौ
तां वंदे देवीं स्वात्मसंवित्तिमेकां ॥ २ ॥

नरशक्तिशिवात्मकं त्रिकं हृदये या विनिधाय भासयेत् ।
प्रणमामि परामनुत्तरां निजभासां प्रतिभाचमत्कृतिं ॥ ३ ॥

जयत्यनर्घमहिमा विपाशितपशुव्रजः ।
श्रीमानाद्यगुरुः शंभुः श्रीकंठः परमेश्वरः ॥ ४ ॥

निजशिष्यविबोधाय प्रबुद्धस्मरणाय च ।
मयाभिनवगुप्तेन श्रमो ऽयं क्रियते मनाक् ॥ ५ ॥

श्री[दे]व्यु[वा]च ॥

अनुत्तरं कथं देव सद्यः कौलिकसिद्धिदं ।
येन विज्ञातमात्रेण खेचरी समतां व्रजेत् ॥

परमेश्वरः पंचविधकृत्यमयः सततमनुग्रहमय्या पररूपया शक्त्या आक्रांतो वस्तुतो ऽनुग्रहात्मैव । न हि शक्तिः शिवाद्भेदं मर्शयेत् । सा च शक्तिर्लोकानुग्रहविमर्शमयी प्रथमतः परामर्शमयपश्यंत्या सूत्रयिष्यमाणानंतशक्तिशताविभिन्ना प्रथमतरं परमहामंत्रमय्यामदेशकालकलितायां संविदि विरूढा तावत्पश्यंत्युद्वविष्यदुक्तिप्रत्युक्तिविभागेनैव वर्तते सैव च सकलप्रमातृसंविदद्वयमयी सततमेव वर्तमानरूपा ततस्तु पश्यंती यद्यदीप्सितं तत्तदेव समुचितकारणनियमप्रबोधितं बोधसूत्रणमात्रेण विमृशति ॥ °

The succeeding verses are as follows:

एतद्गुह्यं महागुह्यं कथयस्व मम प्रभो† ॥ fol. 14*a*.

हृदयस्था तु या शक्तिः कौलिकी कुलनायिका ।
तां मे कथय देवेश येन तृप्तिं लभाम्यहं ॥ fol. 16*a*.

Comm.: °तन्मे कथयेत्यपि पठंति । श्रीसोमानंदपादा व्याचक्षते च तत्तस्मादिति यद्वा तत्कथय येन तृप्तिं परमानंदमयीं लभे परमाद्वयनिर्वृतिस्वातंत्र्यरसा भवामीति समन्वयः ॥ व्रजामीत्यपि पाठः ॥ °

शृणु देवि महाभागे उत्तरस्याप्यनुत्तरं ।

---

* यो नारायण इत्यभूच्छ्रुतनिधिः श्रीकन्यकुब्जे द्विजस्
तद्वंशे स्वगुणप्रकर्षखचिते मुक्ताकणाख्यो ऽभवत् ।
तस्यैषा सदृशानुजेन रचिता रामेण विद्वज्जन-
श्लाघ्यत्वात्सफलश्रमेण भगवद्गीतापदार्थप्रथा ॥

† At fol. 25*b* this half-*śloka* and the first *śloka* are referred to as अनुत्तरमित्यादिसार्धश्लोकयुगलं.

DR.RUPNATHJI( DR.RUPAK NATH )

कौलिको ऽयं विधिर्देवि मम हृद्व्योम्न्यवस्थितः ।
कथयामि सुरेशानि सद्यः कौलिकसिद्धिदं ॥ fol. 17*a*.

Comm. fol. 23*b*: तदाहुर्निजवृत्तौ श्रीसोमानंदपादाः । कथयामीत्युच्चारयाम्युत्कलिकात इति । °

अथाद्यास्तिथयः सर्वे स्वरा बिंदुवसानगाः ।
तदंतःकालयोगेन सोमसूर्यौ प्रकीर्तितौ ॥

पृथिव्यादीनि तत्त्वानि पुरुषांतानि पंचसु ।
क्रमात्कादिषु वर्गेषु मकारांतेषु सुव्रते ॥

वाय्वग्निसलिलेंद्राणां धारणानां चतुष्टयं ।
तदूर्ध्वं शादि विख्यातं पुरस्ताद् ब्रह्मपंचकं ॥

अमूला तत्क्रमा ज्ञेया क्षांतिः सृष्टिरुदाहृता ।
सर्वेषामेव मंत्राणां विद्यानां च यशस्विनि ॥

इयं योनिः समाख्याता सर्वतंत्रेषु सर्वदा ॥ fol. 26*a*.

After a general discussion, the explanation of these 4½ *ślokas* begins fol. 44*b*:

सर्वत्र स्वस्वभावात्मकप्रभावप्रख्याप्रसरानिरोधो यस्या इत्यामंत्रणे यस्येति शोभने व्रतेन तदयमत्र संक्षेपार्थः ॥ स्वातंत्र्यैकरसावेशचमत्कारैकलक्षणा । परा भगवती नित्यं भासते भैरवी स्वयं॥ तस्याः स्वभासा योगो यः सो निरुद्धः सदोदितः । सदाशिवधरा तिर्यङ्नीलपीतसुखादिभिः ॥ भासमानैः स्वस्वभावैः स्वयं प्रथनशालिभिः । प्रथते संविदाकारः स्वसंवेदनसारकः ॥ स्वसंवेदनं नाम प्रमाणमिति वर्ण्यते । बालतिर्यक्संविदां यत्साम्येनैव भासते॥ इंद्रियाणि त्रिरूपं च लिंगं प्रत्यचःक्रमः । सारूप्यमन्यथा योगः प्रतीत्यनुदयो यमः ॥ इत्यादिको यस्य सर्वं द्वारमात्रे निरूप्यते । तत्स्वसंवेदनं प्रोक्तमविच्छिन्नप्रथामयं ॥ येषां नाक्षत्रिरूपादिनाममात्रे ऽप्यभिज्ञता । तेषामपि तिरश्चां हि सा सा संवित्प्रकाशते ॥ एवंभासा स्वभावेन स्वरूपामर्शनात्मिका । स्वरूपामर्शनं यच्च तदेव परवाग्वपुः ॥ तद्विचित्रस्वभावत्वाद्विचित्रप्रथनामयं । प्रथने पारतंत्र्यं हि न जातु भजते क्वचित ॥ अपारतंत्र्यात्संकेतप्रत्यूहादेः कथं स्थितिः । अतः संकेतरहितं स्वस्वरूपविमर्शनं ॥ देशकालकलामायास्थानघातक्रियोत्तरं । परिपूर्णं स्वतः सर्वं सर्वाकारविलक्षणं ॥ स्वाभाविकमहासंवित्सत्संस्कारैकलक्षणं । शुद्धविद्यात्मकं रूपमहमित्युभयात्मकं ॥ तदेव मातृकारूपं धरादीनां निजं वपुः । तत्पारमार्थिकाकारं द्रुत्याश्यानस्वरूपतः॥ बीजयोन्यात्मकं प्रोक्तं शिवशक्तिस्वरूपकं । शिवशक्त्योस्तु संघट्टादन्योन्योच्छलितत्वतः ॥ परस्परसमापत्तिर्जगदानंददायिनी । अंतःस्थविश्वपार्यंतपारमार्थिकसद्वपुः ॥ यद्वीर्यमिति निर्णीतं तद्विश्लेषणयोजना । विसर्ग इति यत्प्रोक्तं ध्रुवधाम(?) तदुच्यते॥ अनुत्तरपदावाप्तौ स एष सुघटो विधिः । अस्मादेव त्वमायीयाद्वर्णपुंजान्निरूपिता ॥ मायामालंब्य भिन्नेव श्रीपूर्वे सृष्टिराक्षसी । पंचाशद्भेदसंभिन्नप्रत्ययप्रसवात्मिका ॥ बंधरूपा स्वभावेन स्वरूपा वरणात्मिका । अत्रैवांतर्गतास्तास्ताः खेचर्यो विषयात्मिकाः॥ तन्वते संसृतिं चित्रां कर्ममायाणुतामयीं । अस्यां साम्यं स्वभावेन शुद्धभैरवतामयं ॥ प्रोक्तं प्रागेव जीवत्वं मुक्तत्वं पारमार्थिकं । भिन्नाया वर्णसृष्टेश्च तदभिन्नं वपुः परं ॥ वीर्यमित्युक्तमत्रैव यद्गुप्त्या मंत्रगुप्तता । तदेतदहमित्येव विसर्गानुत्तरात्मकं ॥ स्वं स्वभावं परं जानञ्जीवन्मुक्तः सकृद्बुधः । सिद्धादिप्रेप्सवस्तेन क्रमसंकोचसूत्रितं ॥ नाभिकुंडलहृद्व्योमस्थो योगिनोहमुपासते(?) । तदेतत्किल निर्णीतं यथागुर्वागमं मनाक ॥ एतां संविदमालंब्य यत्स्यात्तत्प्रव्यतो स्ववित् । नैतावतैव तुलितं मार्गांशस्तु प्रदर्शितः ॥ इयतीति व्यवच्छिंद्याद्भैरवीं संविदं हि कः । एतावाञ्शक्तिपातो ऽयमस्मासु प्रविजृंभितः ॥ येनाधिकारितैरेतदस्माभिः प्रकटीकृतं । अस्माकमन्यमातॄणामद्य कालांतरे ऽपि वा ॥ भवत्वभूत्वाभविता तत्कः सूक्ष्मतमो ऽप्यतः । यः सर्वयोगावयवप्रकाशेषु गभस्तिमान् ॥ श्रीपूर्वशास्त्रे निर्णीतो येन मुक्तश्च मोचकः । एतत्तु सर्वथा ग्राह्यं विमृश्यं च परेप्सुभिः ॥ ध्रुवं मर्यत्वसुलभां हित्वासूयां विचक्षणैः । आलोचलक्षणादूर्ध्वं यद्वेदात्मनि स्थितिः ॥ चिदर्काभ्रलवास्तेन संशाम्यंते स्वतो रसात् ॥ Then follows a *prākṛit* passage: परसंवेअण भाससऊइण थिर अरसुहसो आइसऊइणसइ भासइस ° fol. 56*b*.

ततश्च विस्तरतो ऽनुत्तरस्वरूपनिरूपणाय ग्रंथावतारस्तन्निरूपयति ॥ चतुर्दशयुतं भद्रे तिथीशांतसमन्वितं । तृतीयं ब्रह्म सुश्रोणि हृदयं भैरवात्मनः ॥ एतन्नायोगिनीजातो नारुद्रो लभते स्फुटं । हृदयं देवदेवस्य सद्यो योगविमोक्षदं ॥ अस्योच्चारे कृते सम्यङ्मंत्रमुद्रागणो महान् । सद्यस्तन्मुखतामेति स्वं देहावेशलक्षणं ॥ मुहूर्तं स्मरते यस्तु ुचकेनाभिमुद्रितः । स बध्नाति तदा सर्वं मंत्रमुद्रागणं नरः ॥ अतीतानागतानर्थान्पृष्टो ऽसौ कथयत्यपि । प्रहराद्यदभिप्रेतं देवतारूपमुच्चरन्॥ साक्षात्पश्यत्यसंदिग्धमाकृष्टं रुद्रशक्तिभिः । प्रहरद्वयमात्रेण व्योमस्थो जायते स्मरन्॥ त्रयेण मातरः सर्वा योगेश्वर्यो महाबलाः । वीरा वीरेश्वराः सिद्धा बलवाञ्शाकिनीगणः ॥ आगत्य समयं दत्त्वा भैरवेण प्रचोदिताः । यच्छंति परमां सिद्धिं फलं यद्वा समीहितं॥ अनेन सिद्धाः सेत्स्यंति साधयंति च मंत्रिणः । यत्किंचिद्भैरवे तंत्रे सर्वमस्मात्प्रसिध्यति ॥ अदृष्टमंडलो ऽप्येवं यः कश्चिद्वेत्ति तत्त्वतः । प्रसिद्धिभाग्भवेन्नित्यं स योगी स च दीक्षितः ॥ fol. 59*a*.

°यदुक्तं कुलात्परतरं त्रिकमिति सर्वोत्तरमनुत्तरत्वं तन्निरूपयति ।



DR.RUPNATHJI( DR RUPAK NATH )

अदृष्टमंडलो ऽप्येवं यः कश्चिद्वेत्ति तत्त्वतः ।
स सिद्धिभाग् भवेन्नित्यं स योगी स च दीक्षितः ॥
[fol. 68*b*.

अनेन ज्ञातमात्रेण ज्ञायते सर्वशक्तिभिः । fol. 69*a*.

शाकिनीकुलसामान्यो भवेद्योगं विनापि हि ।
अविधिज्ञो विधानज्ञो जायते यजनं प्रति ॥

कालाग्निमादितः कृत्वा मायांतं ब्रह्मदेहगं ।
शिवो विश्वाद्यनंतश्च परशक्तित्रयं मतं ॥ fol. 69*b*.

तदंतर्वर्ति यत्किंचिच्छुद्धमार्गे व्यवस्थितं ।
अणुविशुद्धमचिरादैश्वरं ज्ञानमश्नुते ॥

तच्चोदकः शिवो ज्ञेयः सर्वज्ञः परमेश्वरः ।
सर्वगो निर्मलः स्वच्छस्तृप्तः स्वायतनः शुचिः ॥

यथा न्यग्रोधबीजस्थः शक्तिरूपो महाद्रुमः ।
तथा हृदयबीजस्थं जगदेतच्चराचरं ॥

एवं यो वेत्ति तत्त्वेन तस्य निर्वाणगामिनी ।
दीक्षा भवत्यसंदिग्धा तिलाज्याहुतिवर्जिता ॥ fol. 70*a*.

मूर्ध्नि वक्त्रे च हृदये गुह्ये मूर्तौ तथैव च ।
न्यासं कृत्वा शिखां बद्धा सप्तविंशतिमंत्रितां ॥

एकैकं तु दिशां बंधं दशानामपि योजयेत् ।
तालत्रयं पुरा दत्त्वा सशब्दं विघ्नशांतये ॥

शिखासंख्याभिजप्तेन तोयो नाभ्युक्षयेत्ततः ।
पुष्पादिकं क्रमात्सर्वं लिंगे वा स्थंडिले च वा ॥

चतुर्दशाभिजप्तेन पुष्पेणासनकल्पना ।
ततः सृष्टिं यजेद्वीरः पुनरेवासनं ततः ॥

सृष्टिं तु संपुटीकृत्य पश्चाद्यजनमारभेत् ।
सर्वतत्त्वसुसंपूर्णां सर्वाभरणभूषितां ॥

यजेद्देवीं महेशानीं सप्तविंशतिमंत्रितां ।
ततः सुगंधिपुष्पैस्तु यथाशक्त्या समर्चयेत् ॥

पूजयेत्परया शक्त्या आत्मानं च विवेदयेत् ।
एवं यजनमाख्यातमग्निकार्ये ऽप्ययं विधिः ॥ fol. 71*b*.

कृतपूजाविधिः सम्यक् स्मरन्बीजं प्रसिध्यति ॥ 73*b*.

आद्यंतरहितं बीजं विकसत्तिथिमध्यगं ।
हृत्पद्मांतर्गतं ध्यायेत्सोमांशं नित्यमभ्यसेत् ॥ fol. 75*a*.

यान्यान्कामयते कामांस्तांस्ताञ्शीघ्रमवाप्नुयात् ।
तस्मात्प्रत्यक्षतामेति सर्वज्ञत्वं न संशयः ॥

एवं मंत्रफलप्राप्तिरित्येतद्रुद्रयामलं ।
एतदभ्यासतः सिद्धिः सर्वज्ञत्वमवाप्यते ॥

Whether any other verses occurring in the MS. belong to the original treatise, it is difficult to make out.

*Abhinavagupta's* exposition concludes with the following genealogical account:

इत्थं प्रपन्नजनतोद्धरणप्रवृत्त-
श्रीमन्महेश्वरपदांबुजचंचरीकः ।
वृत्तिं व्यधात् त्रिकरहस्यविमर्शगर्भां
काश्मीरकाच्चुखलकादधिगम्य* जन्म ॥ १ ॥

एतावदेतदिति कस्तुलयेत्प्रसह्य
श्रीशांभवं सृतमनर्गलिताश्च वाचः ।
एतत्तु तावदखिलात्मनि भाति यन्मे
भावं ततो ऽत्र सुधियो न पराङ्मुखाः स्युः ॥ २ ॥

अज्ञस्य संशयविपर्ययभागिनो वा
ज्ञानं प्रकंपरहितं प्रकरोति सम्यक् ।
रूढस्य निश्चयवतो हृदयप्रतिष्ठां
संवादिनीं प्रकुरुते कृतिरीदृशीयं ॥ ३ ॥

एतावदर्थरससंकलनाधिरूढ-
धारानिरूढहृदयो विमृशेदतो ऽपि ।
यद्युत्तरं तदपि नैव सहेत नेदं
सोपानमेतदमलं पदमारुरुक्षोः ॥ ४ ॥

काश्मीरेषु यशस्करस्य नृपतेरासीदमात्याग्रणीः
श्रीमान्वल्लभ इत्युदाहृततनुर्यः प्राग्यजन्मा द्विजः ।
तस्य स्वांगभवः प्रसिद्धपदवीपात्रं समग्रैर्गुणैः
श्रीशौरिः शिशुचंद्रचूडचरणध्यानैकरत्नाकरः ॥ ५ ॥

शीलस्यायतनं परस्य यशसो जृंभास्पदं नर्मभूर्
वात्सल्यस्य समग्रलोककरुणाधर्मस्य जन्मस्थितिः ।
श्रीमद्वत्सलिकाभिधा च सहजा (सहचरी B.) तस्यैव
[भक्त्युल्लसत्
प्रोद्रिक्तांतरवृत्तिशंकरनुतौ यस्या मनो जृंभते ॥ ६ ॥

तस्यैवात्मभवो विभावितजगत्सर्गस्थितिः शंकर-
ध्यानार्चापरिचिंतनैकरसिकः कर्णाभिधानो द्विजः ।
यो बाल्ये ऽप्यथ यौवने ऽपि विषयासक्तिं विहाय
[स्थिराम्
एनामाश्रयते विमर्शपदवीं संसारनिर्मूलिनीं ॥ ७ ॥

* Prof. Bühler's Report has काश्मीरिकाद्विचुलकाद-धिगम्य.

DR.RUPNATHJI( DR.RUPAK NATH )

भ्राता ममैव शिवशासनरूढचेताः
 प्रेप्सुः परात्मनि मनोरथगुप्तनामा ।
यः शास्त्रतंत्रमखिलं प्रविवेक्तुकामः
 प्राप्तुं परं शिवपदं भवभेदनाय ॥ ८ ॥

शिवशास्त्रैकरसिकः पदवाक्यप्रमाणवित् ।
रामदेवाभिधानश्च भूपितोत्तमजन्मकः ॥ ९ ॥

एतत्प्रियहितकरणप्ररूढहृदयेन यन्मया रचितं ।
मार्गप्रदर्शनं तत्सर्वस्य शिवाप्तये भूयात् ॥ १० ॥

अंतर्वेद्यामत्रिगुप्ताभिधानः*
 प्राप्योत्पत्तिं प्राविशत्प्राग्र्यजन्मा ।
श्रीकाश्मीरांश्चंद्रचूडावतारैर्निः-
 संख्याकैः पावितोपांतभागान् ॥ ११ ॥

तस्यान्ववाये महति प्रमूताद्वराहगुप्तात्प्रतिलब्धजन्मा ।
संसारवृत्तांतपराङ्मुखो यः शिवैकचित्तश्चुखलाभिधानः
[॥ १२ ॥

तस्माद्विवेचितसमस्तपदार्थशास्त्राल्
 लब्ध्वापि देहपदवीं परमेशपूतां ।
प्राप्ताभयो ऽभिनवगुप्तपदाभिधानः
 प्रावेशयत् त्रिकसतत्त्वमिदं निगूढं ॥ १३ ॥

ये तावत्प्रविवेकवंध्यहृदयास्तेभ्यः प्रणामो वरः
 के ऽप्यन्ये प्रविविंचते न च गताः पारं धिगेतान्नरान्
यस्त्वंतः प्रविमर्शसारपदवीसंभावनासु स्थितो
 लब्धैको ऽपि स कश्चिदेव सफलीकुर्वीत यत्नं मम
[॥ १४† ॥

स्वात्मानं प्रविवेक्तुमप्यलसतां ये विभ्रति प्रार्थना[त्]
 तान्प्रत्यात्मकदर्थनान्न परतः किंचित्फलं शोध्यते ।
विश्वस्यास्य विविक्तये स्थिरधियो ये संरभंते पुनम्
 तानभ्यर्थयितुं मयैष विहितो भूम्ना प्रणामादरः ॥ १५ ॥

भ्राम्यंतो भ्रमयंति मंदधिषणास्ते जंतुचक्रं जडं
 स्वामी कृत्यगुणाभिधानवशतो बद्धा दृढं बंधनैः ।
दृष्ट्वेत्थं गुरुभारवाहविधये यातानुयातान्पशूं-
 स्तत्पाशप्रविकर्तनाय घटितं ज्ञानत्रिशूलं मया ॥ १६ ॥

बहुभिरपि सो ऽहमेव भ्रमितस्तत्त्वोपदेशकंमन्यैः ।
तत्त्वमिति वर्णद्वय(*r.* युग)मपि रसना येषां न पस्पर्श ॥ १७ ॥

परमेश्वरः प्रपन्नप्रोद्धरणकृपाप्रयुक्तगुरुहृदयः ।
श्रीमान्देवः शंभुर्मामियति नियुक्तवांस्तत्त्वे ॥ १८ ॥

तत्तत्त्वनिर्मलस्थितिविभागिहृदये स्वयं प्रविष्टमिव ।
श्रीसोमानंदमतं प्रविमृश्य मया निबद्धमिदं ॥ १९ ॥

हंहो हृच्चक्रचारप्रविरचनलसन्निर्भरानंदपूर्णा-
 देव्याः सत्पाशकोटिप्रविघटनपटुज्ञानशूलोर्ध्वधाराः ।
चेतोवाक्कायमेतद्विगतभवभयोत्पत्ति युष्मासु सम्यक्
 प्रोतं यत्नेन सद्यं व्रजत किल हृदि द्राक्प्रसादं प्रसह्य
[॥ २० ॥

व्याख्यादिकर्मपरिपाटिपदे नियुक्तो
 युष्माभिरस्मि गुरुभावमनुप्रविश्य ।
वाक्चित्तचापलमिदं मम तेन देव्याम्
 तच्चक्रचारुचतुरस्थितयः क्षमध्वं ॥ २१ ॥

समाप्तमिदं त्रिंशिकातत्त्वविवरणं ॥ कृतिस्त्रिनयनचरणचिं-
तनलब्धप्रसिद्धेः श्रीमद्राजानकाभिनवगुप्तस्य ॥

शतैरेकोनविंशत्या त्रिंशिकेयं विवेचिता ।
सर्वेषु त्रिकशास्त्रेषु ग्रंथोन्निर्दलयिष्यति ॥

शुभमस्तु सर्वजगतां परहितनिरता भवंतु भूतगणाः ।
दोषाः प्रयांतु शांतिं सर्वत्र सुखी भवतु लोकः ॥

From the way in which *Somānanda* is referred to in the above extracts, it seems clear that he must have been the author of the *Triṃśikā* (see Hall, Index, p. 198, where the author is called *Someśvara*), and that he also wrote a commentary on his own verses, referred to as *nijavṛitti* (once *nijavivṛiti*, fol. 55*a*). His *Śivadṛishṭi* is likewise quoted at foll. 29*b*, 33*a* (where *Somānanda* is expressly mentioned as the author), 75*a*; whilst a *śloka* by him is quoted at fol. 17*b* [यदुक्तं सोमानंदपादैरपरस्थितौ । सा बुद्धिर्यत्पुनः सूक्ष्मं सर्वदिक्कमवस्थितं । ज्ञानं बोधमयं तस्य शिवस्य सहजं सदेति]. And further, fol. 25*a*: तथा हि केषुचिद्दृढपुस्तकेष्वीदृक् श्लोकांतरं दृश्यते । श्रुतं देव महाज्ञानं त्रिकाख्यं परमेश्वर । उत्तरं च तथा ज्ञानं त्वत्प्रसादावधारित-मिति ॥ तदस्मच्छ्रीसोमानंदपादनिरूपितव्याख्यानुसारेणैव यद्गुरवः समादिक्षंस्तदेव सर्वस्य करोति शिवं । °

* Prof. Bühler's MS. reads अन्तर्वेद्यां मंत्रिगुप्ताभिधानः

† The MS. again makes this verse 13; the succeeding verses then being likewise numbered wrongly. See Prof. Bühler's Report, where a similar mistake is made by the two *S'ālinī* verses 11 and 12 being numbered as a single stanza.

DR.RUPNATHJI( DR.RUPAK NATH )

*Abhinavagupta* quotes his own *Śivadrishṭyālocana* at fol. 30*b*; his commentary *Kramakeli* on (?his own) *Kramastotra*, fol. 64*b*; and four verses from a *stotra* (or *stotras*) of his (मयैव स्तोत्रे ।? the *Kramastotra*), each in a different metre, foll. 15*b*, 44*b*, 53*a*, 60*a*. We also read, fol. 7*a*: तदेतच्छ्री-*Pūrvapañcikāyām* मयैव विस्तरतो निर्णीतमिहानुपयोगाद्ग्रन्थगौरवाच्च न वितत्योक्तं ।; fol. 44*a*: वितत्य च विचारितं मयैतत् *Padārthapraveśanirṇayaṭīkāyām* इति किमिह वृथा वाग्जालेन; and further fol. 4*b* (an *āryā*) without any introduction: गोप्यमुपदेशसारं सद्यो भैरवपदावहं सततं । अभिनवगुप्तेन मया व्याख्यातं प्रश्नसर्वस्वं ॥ and fol. 16*b*: तदत्र प्रश्नसर्वस्वे ॥ श्रीभैरव उवाच ॥ व्याख्यातं प्रागेवैतत् किं पुनरुक्तता यादनेन भैरवो भरणात्मको महामंत्ररवात्मकश्च ॥

Other authorities referred to are: (*śrīmad-*) *Ucchushmaśāstra*; *Utpaladeva*, fol. 7*b* [ज्ञानं क्रिया च भूतानां जीवतां जीवनं मतं ॥]; fol. 9*a* [स क्रमत्वं च लौकिक्याः क्रियायाः कालशक्तितः । घटते न तु शाश्वत्याः प्राभव्याः स्यात्प्रभोरपि ॥]; fol. 52*b* (*Īśvarapratyabhijñāṭīkāyām*); *Kallaṭa*, fol. 27*b* [यदाहुः श्रीकल्लटपादाः । तुटिपाते सर्वज्ञत्वसर्वकर्तृत्वलाभ इति ॥]; *Kālottara*, fol. 42*a*; *Kiraṇā* (one *śloka*), fol. 69*b*; *Kubjikā*(*tantra*), fol. 49*b* [तथा श्रीकुब्जिकामते चक्रविचारे मुमेवार्थं प्रधानतयाधिकृत्यादिष्टं । मायोपरि महामाया त्रिकोणानंदरूपिणीत्यादि ॥]; *Guhyayoginītantra*, fol. 51*a* (two *ślokas*); *Tantrasamuccaya*, fol. 21*a* (one *śloka*: नरशक्तिशिवावेशि °); *Tantrasāra*, fol. 5*b* [त्रिंशिकार्थस्त्वया प्रोक्तः सार्धकोटिप्रविस्तरः], fol. 30*b* (*śl.*), fol. 46*b* [निजो नमोगच्छायातत्त्वम् ।]; *Tilakaśāstra* (?*Śāradātilaka*), fol. 64*a*; *Trikatantrasāra*, fol. 49*b* [शिवशक्तिसमापत्त्या शिवशक्तिघनात्मकः । °], fol. 60*b* [आनंदप्रसरः पूज्या तां त्रिकोणे प्रकल्पयेत् । °]; *Trikahṛidaya*, fol. 4*a* [नित्यं विसर्गपरमः स्वशक्तौ भैरवो विभुः ।°], fol. 41*b*; *Triratnakula*, fol. 51*b* [अष्टाष्टकविभेदेन मातृकाया निरूपितं । तदेव कुलचक्रं तु तेन व्याप्तमिदं जगदिति ॥ मातृकाज्ञानभेदे विस्तरतो निरूपितमेतत् ॥]; *Nārāyaṇa Bhaṭṭa* or *Bh. N.*, fol. 18*a* [त्रैलोक्ये ऽप्यत्र यो यावानानंदः कश्चिदीक्ष्यते । स विंदुर्यस्य तं वंदे देवमानंदसागरं ॥], fol. 54*b* [प्राणोर्ध्वाधोमात्रायां ऽप्याणव इति ।]; *Niśācara*, fol. 24*a* [वाममार्गाभिषिक्तो ऽपि दैशिकः परतत्त्ववित् । संस्कार्यो भैरवे सो ऽपि कुले काले त्रिके ऽपि सः ॥]; *Pañcasrotaḥ-prabhṛitīni śāstrāṇi*, fol. 4*b*; (*bhagavat*) *Pushpadanta*, fol. 47*a* [रश्मितिसामान्यान्यासिद्धमिति शून्ये हि निश्चले रूपे ऽनुप्रविविक्षायां भास्वररूपसंविन्निसोपानक्रमेण° इति ।]; *Pūrvaśāstra*, fol. 40*a* [यथेष्टफलसंसिद्धै मंत्रतंत्रानुवर्तिनां ।°], fol. 58*a* (cp. p. 839*b*, l. 34), fol. 65*b* [सार्णेन त्रितयं व्याप्तं त्रिशूलेन चतुर्थकं । °]; *Bhargaśikhā*, fol. 64*a* [वीरव्रतं चाभिनंदेद्यथायोगं तथाभ्यसेत् ।]; *Bhartṛihari* (*śl.*) fol. 33*b*, (*vākyavicāre*) fol. 65*b*; *Mālinītantra*, fol. 21*a* [एवं सर्वानुसंधानं ° *śl.*], fol. 31*b* (*mālinī-vijayottara-siddhātantrasvacchandādiśāstreshu*); *Mukuṭasaṃhitā*, fol. 64*b* [जातीनां च ब्राह्मणादीनां नास्ति स्थितिः कल्पितत्वादुपदेशव्यंगतेति तु दुर्बुद्धीन्प्रत्यप्रत्याययदिति च भगवता मुकुटसंहितायां विस्तरतो निर्णीतं ॥]; *Vādyatantra*, fol. 9*b* [संरुध्य रश्मिचक्रं स्वं पीत्वामृतमनुत्तमं । कालोभयपरिच्छिन्नं वर्तमाने सुखी भवेत् ॥]; *Vāmana*, fol. 53*a* (after quoting a verse from his own *stotra*, he adds इत्येष एव श्रीवामनविरचिते द्वयसंपत्तिवार्त्तिके उपदेशनयो बोद्धव्यः); *Vāyasanīyatantra* (!), fol. 41*b* [तथा श्रीवाजसनीयतंत्रे वर्णान्यथोचितं निवेश्योक्तं । इत्येतन्मातृकाचक्रं दिव्यं विष्णुपदाम्पदं ज्ञातं गुरुमुखात्सम्यक्पशोः पाशान्निकृंततीति ॥]; *Vīrāvalīśāstra*, fol. 64*a*; *Vaishṇavavāmaśāstrāṇi*, fol. 42*a*; *Śarvācāra*(!), fol. 24*a* [दैशिकः परतत्त्ववित्°]; *Sarvācāra*, fol. 64*a* [अज्ञानाच्छंकते मूढस्ततः सृष्टिश्च संहृतिः ।° 4 *śl.*]; *Śaivavāmaśāstrāṇi*, fol. 42*a*; (*bhaṭṭāraka-*) *Śrīkaṇṭha* (*-pāda*), fol. 52*b* [पश्यत्यन्यच्छृणोत्यन्यत्करोत्यन्यच्च जल्पति । चिंतयत्यन्यदाभुंक्ते तत्रासांकेतिकी स्थितिः ॥]; *Siddhisantāna*, fol. 24*a* [प्रकाशमाना भासैव यद्वृत्तिस्तत्सदैव हि ।]; *Spandaśāstra*, fol. 5*b* [इति वा यस्य संविन्निः क्रीडा त्वेनाखिलं जगत् । °], fol. 24*a* [तदस्ति परमार्थतः ।]; *Svacchandatantra*, fol. 4*a* [गुरुशिष्यपदे स्थित्वा स्वयं देवः सदाशिवः । पूर्वोत्तरपदैर्वाक्यैस्तंत्रं समवतारयत् ॥].

Prose *Prākrit* passages occur on foll. 5*a*, 5*b*, 17*a*, 24*b*, 29*a*, 58*a*, 74*b*, without any indication as to their source.

The etymology of '*triṃśikā*' is discussed at fol. 5*a*: अभिनवानां त्रीशिकेति । तिसृणां शक्तीनामिच्छा-

DR.RUPNATHJI( DR.RUPAK NATH )

ज्ञानक्रियाणां सूक्ष्माद्युद्योगादिनामांतरनिर्देश्यानामीशिका ईश्वरी ईशाना चेशितव्या व्यतिरेकेणैव भाविनोत्येतच्छक्तिभेदत्रयोत्तीर्णा तच्छक्त्यविभागमयी संविद्भगवतीभट्टारिकापराभिधेयं। तद्योगादेव चेदमभिधानं त्रिंशिकेत्यपि गुरवः पठंति । अक्षरवर्णसाम्याच्च निरुक्तमाहुः । तिस्रः शक्तीः कायतीति त्रिंशिका। न तु त्रिंशच्छ्लोकयोगात्त्रिंशिका । एतावतो ऽपि त्रिंशिकार्थत्वात् ॥ तथा हि श्रीतंत्रसार० (p. 840*a*, l. 28).

The leaves are marked श्री० परा० (fol. 1 परात्रिं०).

Regarding the author (c. 1000 A.D.), see Bühler, Detailed Rep. on Kaśmīr MSS., p. 80. [H. T. Colebrooke.]

## 2527.

**2235.** Foll. 61; size 7 in. by 5½ in.; in European manner; fairly good, modern Devanāgarī writing; twenty-two lines in a page.

*Paramārthasārasaṃgraha*, a summary of the *Śaiva* doctrine, by *Abhinavagupta*; with a commentary (*vivṛiti*) by *Rājānaka Yogarāja*, of Vitastāpurī.

The commentary begins:

चिद्वनो ऽपि जगन्मूर्त्या भ्यानो यः स जयत्यजः ।
स्वात्मप्रच्छादने क्रीडाविदग्धः परमेश्वरः ॥

यो ऽयं व्यधायि गुरुणा युक्त्या परमार्थसारसंक्षेपः ।
विवृतिं करोमि लघ्वीमस्मिन्विद्वज्जनार्थितो योगः ॥

इह शिवाद्वयशासने देहादिप्रमातृप्राधान्यैकस्यसमुत्कांकांतंकालस्यसंशयादिरूपविघ्नौघप्रसरप्रध्वंसकारिकां शास्त्रनिष्पत्तिं मन्यमानः परिमितप्रमातृताधम्यदीकारेण चिदानंदैकघनस्वात्मदेवतासमावेशशालिनीं समस्तशास्त्रार्थसंक्षेपगर्भां प्रथमतस्तावत्परमेश्वरप्रवणतां परामृशति ।

परं परस्थं गहनादनादिमेकं निविष्टं बहुधा गुहासु ।
सर्वालयं सर्वचराचरस्थं त्वामेव शंभुं शरणं प्रपद्ये ॥ १ ॥

The last *śloka* of the text runs thus:

आर्याशतेन तदिदं संक्षिप्तं शास्त्रसारमतिगूढम् ।
अभिनवगुप्तेन मया शिवचरणस्मरणदीप्तेन ॥ १०३ ॥

The commentary ends:

श्रीमतः क्षेमराजस्य (योगराजस्य Oxf.) सद्गुर्वीश्वरशासाक्षात्कृतमहेशस्य तस्यांतेवासिना मया ॥ [लिनः ।

श्रीवितस्था(*r.* वितस्ता)पुरीधाम्ना विरक्तेन तपस्विना ।
विवृतिर्योगनाम्नेयं पूर्णाद्वयमयी कृता ॥

इति श्रीपरममाहेश्वरश्रीराजानकयोगराजस्य कृतिः परमार्थसारसंग्रहविवृतिरियं संपूर्णा ॥

The author would seem to have been a pupil of *Abhinavagupta*, as well as of the latter's pupil *Kshemarāja*. For the same works, see Aufrecht, Cat. Bodl., no. 575, where a list of the works quoted by the commentator is given. [R. Johnson.]

## 2528.

**1256c.** Fol. 23; size 8¾ in. by 4 in.; fairly written, in Devanāgarī, towards the end of last century; nine lines in a page.

*Īśvarapratyabhijñāhṛidaya*, a string of twenty aphorisms, embodying the essence of the doctrine of 'recognition'; with a commentary, by (*Rājānaka*) *Kshemarāja* (pupil of *Abhinavagupta*).

It begins:

नमः शिवाय सततं पंचकृत्यविधायिने ।
चिदानंदघनस्वात्मपरमार्थावभासिने ॥
शांकरोपनिषत्सारप्रत्यभिज्ञामहोदधेः ।
उद्धरामि परं सारं संसारविषशांतिदम् ॥

इह ये सुकुमारमतयो ऽकृततीक्ष्णतर्कशास्त्रपरिश्रमाः शक्तिपातवशोन्मिषितपरमेश्वरसमावेशाभिलाषिणः कतिचिद्भक्तिभाजस्तेषामीश्वरप्रत्यभिज्ञोपदेशतत्त्वं मनागुन्मील्यते । तत्र स्वात्मदेवताया एव कारणत्वं सुखोपायप्राप्यत्वं च महाफलमभिव्यंक्तुमाह ।

चितिः स्वतंत्रा विश्वसिद्धिहेतुः ॥ [१] ॥ विश्वस्य सदाशिवादेः भूम्यंतस्य सिद्धौ निष्पत्तौ प्रकाशने स्वेत्यात्मनि परप्रमातृविश्रांत्यात्मनि संहारे। परा शक्तिरूपा चितिरेव । भगवती तुन्नरविमयी शिवभट्टारकाभिन्ना हेतुः कारणं ॥ अस्यां हि प्रसर्पंत्यां जगदुन्मिषति व्यवतिष्ठते च निवृत्तप्रसरायां च निमिषतीति स्वानुभवात्र साक्षी ॥ अन्यस्य तु मायाप्रकृत्यादेश्चित्प्रकाशभिन्नस्याप्रकाशत्वेनासत्त्वादपि न क्वचिद्धेतुत्वं । प्रकाशमानत्वे तु प्रकाशैकात्म्यात् प्रकाशरूपा चिदेव हेतुः। न त्वसौ कश्चित् । अत एव देशकालाकारा एतत्सृष्टा एतदनुप्राणिताश्च नैतत्स्वरूपं

DR.RUPNATHJI(DR.RUPAK NATH)

भेदमलमिति व्यापकनित्योदिता परिपूर्णरूपेयमित्यलभ्यमेवैतत् ॥ ननु जगदपि चितो भिन्नं नैव किंचित् । अभेदे च कथं हेतुहेतुमद्भाव उच्यते । चिदेव भगवती स्वच्छस्वरूपा तत्तदनंतजगदात्मना विश्वरूपेण स्फुरतीत्येतावत्परमार्थो ऽयं कार्यकारणभावः । यच्चैयमेव प्रमातृप्रमाणप्रमेयमयस्य विश्वस्य सिद्धौ प्रकाशने हेतुस्ततो ऽस्याः । स्वतंत्राविच्छिन्नस्वप्रकाशरूपायाः सिद्धौ प्रकाशने । अभिनवार्थप्रकाशरूपं न प्रमाणं वराकमुपयुक्तमुपपन्नं वा ।०

ननु यदि विश्वस्य चितिर्हेतुस्तदास्या उपादिनाद्यपेक्षायां भेदवादापरित्यागः स्यादित्याशंक्याह ।

स्वेच्छया स्वभित्तौ विश्वमुन्मीलयति ॥ [२] ॥ स्वेच्छया न तु ब्रह्मादिवदन्येच्छा तथैव चारूरूपादानाद्यपेक्षाया एवं हि प्रागुक्तस्वातंत्र्यहान्याचित्वमेव न घटेत स्वभित्तौ न त्वन्यत्र । ह्यपि प्राक् निर्णीतं विश्वं दर्पणनगरवदभिन्नमपि भिन्नमिवोन्मीलयति । उन्मीलनं चावस्थितस्यैव प्रकटीकरणमित्यनेन जगतः प्रकाशैकात्म्येनावस्थानमुक्तं । अथ विश्वस्य स्वरूपं विभागेन प्रतिपादयितुमाह ।

तन्नानानुरूपग्राह्यग्राहकभेदात् ॥ [३] ॥ तद्विश्वं नानानेकप्रकारं०

The last two aphorisms run thus:

समाधिसंस्कारवति व्युत्थाने भूयो भूयश्चिदैक्यामर्शान्नित्योदितसमाधिलाभः ॥ १९ ॥ [इदानीमस्य समाधिलाभस्य फलमाह ।] तदा प्रकाशानंदसारमहामंत्रवीर्यात्मकपूर्णाहंतात्मदा सर्वसर्गसंहारकारिनिजसंविद्देवताचक्रेश्वरताप्राप्तिर्भवतीति शिवं ॥ [२०]॥

The following authorities are quoted: *Utpaladeva*, fol. 14*b*; *Kakshyastotram*, fol. 17*b*; *Bhaṭṭa Kallaṭa*, fol. 17*b*; *Jñānagarbha*, fol. 18*a*; *Trikasāra*, fol. 2*b*; *Pratyabhijñā*, foll. 13*b*, 17*a*; *Pratyabhijñāṭīkā*, fol. 8*b*; *Vijñānabhaṭṭārakam*, foll. 2*b*, 18*a*; *Vijñānabhairavam*, fol. 18*b*; *Sarvavīrabhaṭṭārakam*, fol. 11*b*; *Spandaśāstram*, fol. 5*a*. It ends:

देहप्राणसुखादिभिः प्रतिकलं संरुध्यमानो जनः
पूर्णानंदघनामिमां न चिनुते माहेश्वरीं स्वां चितिं ।
मध्ये बोधसुधाब्धिविश्वमखिलं तत्त्वेन पिंडोपमं
यः पश्यत्युपदेशतस्तु कथितात्साक्षात्स एकः शिवः ॥
येषां वृत्तः शांकरः शक्तिपातो
येनाभ्यासात्तीक्ष्णयुक्तिष्वयोग्याः ।
शक्ता ज्ञातुं नेश्वरप्रत्यभिज्ञाम्
उक्तस्तेषामेष तत्त्वोपदेशः ॥

समाप्तमिदमीश्वरप्रत्यभिज्ञाहृदयम् ॥ कृतिः श्रीमत्क्षेमराजस्येति शिवम् ॥

Cf. Rāj. Mitra, Notices, viii., p. 43.

[H. T. Colebrooke.]

## 2529.

**196.** Foll. 367 (numbered 1–366, two leaves marked 27); size 10¾ in. by 5 in.; legibly written, in Devanāgarī, about the middle of last century; thirteen lines in a page.

*Svacchandoddyota*, a commentary, by *Kshemarāja*, on the *Svacchandanaya*, a treatise on *Śaiva* faith and conduct, by the commentator's teacher *Abhinavabodhāditya* (? i.e. *Abhinavaguptācārya*).

The treatise, the text of which is likewise given, is divided into fifteen chapters.

It begins (with the numbers supplied):

विश्वैकरूपविश्वात्मविश्वसर्गादिकारणम् ।
परप्रकाशवपुषं स्तुमः स्वच्छंदभैरवम् ॥ १ ॥
प्रसरच्छक्तिकल्लोल – – हरिकेलये ।
सर्वसंपन्निधानाय भैरवांभोधये नमः ॥ २ ॥
एकैव बोधजलधेः शक्तिमुक्तिर्जयत्यसौ ।
यदन्तर्निखिलं भाति मुक्तामयमिदं जगत् ॥ ३ ॥
स्मृतिमात्रविनिर्वृत्तनिःशेषाज्ञानकिल्बिषः ।
गुरुमूर्तावरस्फारा(?) विजयते जगत्त्रये ॥ ४ ॥
तत्सेवाविमलव्यक्तमहामाहेशदर्शनः ।
क्षेमराजो विवृणुते श्रीस्वच्छंदनयं मनाक् ॥ ५ ॥
अभिनवबोधादित्यद्युतिविकसितहृत्सरोजार्भ(?) ।
रमयत सरसाः परिमलमसारसंसारवासनाशत्यै ॥६॥०९॥

इहानुजिघृक्षारससरसहृदयपरमसंवित्संमुखीकृतयुक्तमवतारयितुं कश्चिद्देवीशिशु(!) आह ।

कैलासशिखरासीनं भैरवं विगतामयम् ।
चंडनंदिमहाकालगणेशवृषभृङ्गिभिः ॥ १* ॥
कुमारेंद्रयमादित्यब्रह्मविष्णुपुरःसरैः ।
स्तूयमानं महेशानं गणमातृनिषेवितम् ॥ २ ॥

* The MS. only gives the numbers from I. v. 10 to II. v. 53.

DR.RUPNATHJI( DR.RUPAK NATH )

सृष्टिसंहारकर्तारं विलयस्थितिकारकम् ।
अनुग्रहकरं देवं प्रणतार्तिविनाशनम् ॥ ३ ॥
सुदितं(? *r*. मु°) भैरवं दृष्ट्वा देवी वचनमब्रवीत् ।

इह परमेश्वरस्य चिदानं[द]घनस्य ब्रह्मदर्शनोक्तत्त्वातिशायनीस्वच्छंदभैरवस्फुरत्तात्मापरमार्थे इति भगवतः शास्त्रस्य तदेवाभिधानं सा च स्वात्मैकरूपपंचकृत्यकारित्वमित्याशयेन सृष्ट्यादिपंचकृत्यकरं देवं भैरवं सुदिदं(!) दृष्ट्वा देवी वचनमब्रवीदित्युक्तं । तत्र देवः शिवादिक्षित्यंताशेषसृष्ट्यादिक्रीडापरस्तावदशेषोत्कर्षितया विजिगीषुस्तदभिन्नत्वाद्विश्वस्य जगद्व्यवहाररूपतयापि द्योतमानः शिवमंत्रमहेश्वरादिभिः स्तूयमानः सर्वेषामगतीनां गतिः प्राप्यो भिन्नबोधसारश्च यथोक्तं दिवुक्रीडाविति(!) भैरवो विश्वभरणरवणवमनरूपो भीरूणामभयमिति व्युत्पत्त्या संसारिणामभयदः । भयं भीः संसारत्रासः । तया जनितो रवः सुक्रंदः भीरवः। ततो जातः° ॥ तत्कैलासशिखरं तत्रासीनं तदुत्तीर्णं प्रकाशैकघनं तदशेषव्याप्त्या च विश्वरूपं तत एव विगतामयं प्रणतानां साधकानां यथाभिलषितसंपादनेनार्तिविनाशनं । एवंभूतं देवं भैरवं सुदितं(*r*. मु°) यथोक्तदेवरूपैव देवी स्वातंत्र्यशक्तिर्दृष्ट्वा साक्षात्कृत्य वचनमब्रवीत् । °

श्रीदेव्युवाच ॥

यत्त्वया कथितं मह्यं स्वच्छंदं परमेश्वर ॥ ४ ॥

शतकोटिप्रविस्तीर्णं भेदानंत्यविसर्पितम् ।
चतुष्पीठं महातंत्रं चतुष्टयफलोदयम् ॥ ५ ॥

न शक्नुवंति मनुजाः स्वल्पवीर्यपराक्रमाः ।
अल्पायुषो ऽल्पविज्ञाश्च अल्पसत्त्वाश्च शंकर ॥ ६ ॥

तदर्थं संग्रहं तस्य स्वल्पशास्त्रार्थविस्तरम् ।
भुक्तिमुक्तिप्रदातारं कथयस्व प्रसादतः ॥ ७ ॥

हे शंकर अनुग्रहपरतया श्रेयस्कर आत्मरूपपरमेश्वर यत्त्वया मह्यं स्व एव छंद इच्छा यस्य तादृगनर्गलभैरवरूपाभिधायित्वात्स्वच्छंदं ° ॥

कीदृशं च गुरुं विद्यात्साधकं च महेश्वर ।
भयाभयप्रदातारं शिष्यं भूमिं(!) च कीदृशम् ॥ ८ ॥

मंत्रांश्चैव समासेन कालं चैव समासतः ।
यजनं हवनं चैव अधिवासं रजांसि च ॥ ९ ॥

पंचगव्यं च दं(?) चैव दन्तकाष्ठं च मंडलम् ।
दीक्षां चाध्वाभिषेकौ च समया मां धनानि च ॥ १० ॥

कलिमासाद्य सिध्यंति तथा ब्रूहि महेश्वर ।
गुर्वादिभूम्यंतं कीदृशं विद्यात् °

I. (*śl.* 86) इति श्रीमहामाहेश्वरक्षेमराजविरचिते स्वच्छंदोद्योते *mantroddhāraḥ* प्रथमः पटलः ॥ fol. 18*a*; II. *arcanādhikāra*, fol. 46*b*; III. *adhivāsapaṭala*, fol. 65*a*; IV. *dīkshābhishekaprakāśanam*, fol. 125*b*; V. *tattvādidīkshāprakāśanam*, fol. 147*a*; VI. *praṇavādhikāra*, fol. 160*a*; VII. *Kālādhikāra*, fol. 197*a*; VIII. fol. 202*b*; IX. fol. 213*b*; X. *bhuvanādhvadīkshāvidhi*, fol. 306*b*; XI. fol. 329*b*; XII. fol. 355*a*; XIII. fol. 357*a*; XIV. fol. 362*b*.

XV. The text ends:

एवं संक्षेपतः प्रोक्तं सकलं तु वरानने ।
यस्य संप्राशनादेव वीरेशसदृशो भवेत् ॥
तस्माज्ज्ञानार्चिनो(?° ने) होमं जपं च वरवर्णिनि ।
कुर्वंति भावितात्मानस्तत्सिध्यंति समंत्रिणः ॥
संपूर्णसिद्धीर्विदधत्स्वच्छंदो जयति प्रभुः ॥

यत्रैव स्फुरति सततं सर्वसर्वात्ममूर्तिर्
योऽसौ स्वच्छच्छलितचलितोर्मिर्धिसिद्धः समंतात् ।
स्वच्छंदोऽयं जयति भगवान्सर्वसंपन्निधान(:)
स्फीतस्फुर्जन्निहरूसंचंधास्फारसारस्वशक्ति(?) ॥

इति श्रीस्वच्छंदोद्योते (!) पंचदशः पटलः ॥ १५ ॥

Then follow some more explanatory remarks, after which the commentary ends:

श्रीमतेति(? *r*. श्रीमतो ऽभि)नवाच्छास्त्रमागमय्य गुरोरि-
[दम ।
व्यावृणोत्क्षेत्रराजस्तत्पादधूलिपवित्रित (?° पु चरितः) ॥

ग्रस्तो [ऽ]यं सकलो भवो हि गलितः कर्माणुमायामलः
प्राप्तानन्दघना स्थितिः किमपरं लब्धः प्रकाशः परः ।
श्रीमच्चेतनभैरवस्तुतिरसास्वादेन लब्धोदयैर् (?)
अस्माभिर्विमलो हृदम्बरतले (!) निर्यंत्रणं स्थीयते ॥

स्वतंत्रस्वच्छात्मा स्फुरति सततं चेतसि शिवः
परा शक्तिश्चेयं करणसरणिप्रांतमुदिता ।
तदाभोगैकात्मस्मर . . . . पसोपजीवि . . . . पद्मोपजीविकृतः क्षेमराजकृतः श्रीमत्स्वच्छंदोद्योतः संपूर्णः । ° संवत् २१ फाल्गुनितृतीयस्यां बुधवासरायां संपूर्णं समाप्तं ॥

[H. T. Colebrooke.]



DR.RUPNATHJI( DR.RUPAK NATH )

## VIII. Mysticism (Tantra).

### 2530.

**147.** Foll. 741 (numbered 753; nos. 389–398, 439, 534 and 733 having been passed over, and 731 being double); size 13½ in. by 4¼ in.; fair Devanāgarī writing of 1740 A.D.; seven lines in a page.

*Paramāgamacūḍāmaṇi*, of the *Nāradapañcarātra*; in 95 *paṭalas*.

It begins: ओं नमो महनीयगुणांभोधये विघ्नवल्लीविध्वंसनकुपराय गणानां पतये श्रीवरदाय ॥

चातुर्विध्यहिरण्यगर्भरसनासिंहासनाध्यासिनी
  सेयं वागधिदेवता वितरतु श्रेयांसि भूयांसि नः ।
यत्पादामलकोमलांगुलिनखज्योत्स्नाभिरुद्भेदितः
  शब्दब्रह्मसुधांबुधिर्बुधमनस्युच्छृंखलं खेलति ॥ १ ॥

श्रीप्रह्लादपुरातनादिगणनापुण्यप्रभावोद्भव-
  स्मृणेनाद्भुतहेतुना समजनि स्वर्णाद्रिवत्तर्कितः ।
दाघोत्तीर्णसुवर्णवर्णतनुवान् संपूर्णसौभाग्यवान्
  विस्तीर्णां श्रियमाददातु स विभुर्लक्ष्मीनृसिंहो मम ॥ २ ॥

ब्रह्माद्वैतरसाश्रयस्य जगतो वीजस्य संसाधने
  सर्वांगस्त(? स्व)विधिर्विशिष्टवदनात् सुस्पष्टवेदाक्षरः ।
क्षीरोदाद्भुतसुप्रसंगसरणिश्यामत्तरंगावली-
  विस्फूर्तीकृतसत्प्रबोधमुदिरः श्रीविट्ठलः पातु नः ॥ ३ ॥

अद्वैतामृत[वा]हिनीपरिलसत्कल्लोलपूरोर्मिषु
  स्फारं स्फारविलासवर्त्मकुशलः श्रीराजहंसोपमः ।
यो ऽसौ विट्ठलभक्तिरस्य कमला विष्वक्प्रवृत्तौ मुदा
  स्वादं स्वादमनंतयुक्तिगुणवद् भुंक्ते रसं नारदः ॥ ४ ॥

वेदाद्यस्य विधेर्विधेयविधिमानंगोद्भवः केवलं
  विष्णोर्भक्तिरतः प्रशस्तपुरुषः प्रेम्णः प्रसंगोत्सवे ।
पृष्टो वेदतरुर्विभागरचनाकर्त्रेपतास्तेन स
  श्रीमत्कृष्णरतिप्रसंगजननं प्रोवाच शास्त्रं मुनिः ॥ ५ ॥

पंचानां प्रचुरप्रमेयगुणिनां गौणप्रसंगेन वा
  ब्रह्मैकध्यतया निवृत्तिवचनै रात्रिर्निरुक्ता यतः ।
सानंदानुभवेन वास्तवविधौ त्रिध्यानिकान्वेषणात्
  ज्ञानानंदशशांकराजसदनात् श्रीपांचरात्रं ततः ॥ ६ ॥

नारं जीवसमूह एप विविधो नारं च तत्त्वग्रहो
  नारं नित्यसनातनानुभविनां स्थैर्यादिवुद्धिक्रमः ।
त्रीनेतान् प्रददाति सत्यकरुणापूरेण शिष्याय यः
  सो ऽव्यात् श्रीगुरुमूर्तिरात्मयशसा श्रीनारदो नारदः
[॥ ७ ॥

ह्रस्वाद् ह्रस्वतरं महच्च महतस्तिग्मं च स्निग्धं च यत्
  सर्वत्रास्ति समं गजे च मशके रंकेषु भूपेष्वपि ।
तादात्म्येन तदेतदेव तदिदं तेजोमयं तन्मयं
  सर्वव्यापि हृदंतरंगनिलयं नित्यं वयं धीमहि ॥ ८ ॥

सारात्सारतरं विचार्य विशदं कर्तव्यमालोक्य च
  कृत्वा भारतभावनाभिरभितः सिद्धांतसारावली: ।
सृष्ट्वा वैदिककृत्तिभागभजनाविश्वाधिकारान् क्रमान्
  व्यासे स्वसुमना मनागनुदिनं दध्यौ विधातुं सुखं ॥ ९ ॥

प्राचीनप्रचुरप्रवाहविशदामानंदकंदोज्ज्वलां
  संप्राप्याथ सरस्वतीं सुसरितं तत्रावगाह्यापि च ।
तीरे संतमनेकसन्मुनियुतं श्रीनारदं नारदं
  नारानंदमये परोपकृतये संपृष्टवान् वस्तुतः ॥ १० ॥

स्वामिन् विश्वविदां वरेण्यगुरवे तुभ्यं नमः सांप्रतं
  संतुष्टिर्मनसो ममास्ति न किल प्रोद्दामतृप्तिं विना ।
तत्त्वं विष्णुगुणानुवादनिवहादुत्साहसंपर्किणां
  संपर्काद्विधुरस्य तद्वद विभो विश्वैकनाथ प्रिय ॥ ११ ॥

श्रुत्वा शुद्धविरक्तिभक्तिरुचिमत्प्रेमप्रभाभासुरं
  वाक्यं व्यासनिवेदितं मुनिवरः श्रीनारदो ऽचिंतयत् ।
स्नेहार्द्रीकृतचेतनो निरवधिप्रेमानुसंगेन तं
  प्रोवाचानुजगर्ज्जनश्रयणतो मेघातिगंभीरवाक् ॥ १२ ॥

पाराशर्य तवाभिमानरहितं श्रुत्वा वचः संप्रति
  प्रेमक्षीरपयः पयोदनिवहैः सिक्तं ममांगं मुहुः ।
संतुष्टिर्मनसो ममापि समभूद् वाक्सौधमास्वाद्य मे
  चक्षुर्वाक्पुलका भवंति भगवन् वीक्षा अमी साक्षिणः
[॥ १३ ॥

नैसर्ग्यं भवतो भवत्यभिनवां सेवां मुहुः कुर्वतः
  कृष्णे कृष्णकथानुवादरसिकतृप्तिं विनानुक्षणं ।
लक्ष्मीकांतगुणामृतं प्रपिबतो ऽप्यानंदकंदादिव
  तृष्णावान् परिवर्तसे विमलधीर्वैश्यानुवादान् विटः ॥
[१४ ॥

एवं त्वभिमानवर्जिततनुर्विश्वोपकारक्षमः
  पुंसामुद्धरणाय नौरिव भवान् संसारसिंधोर्मुहुः ।
भूभारं क्षपयिष्णुविष्णुयशसामुद्गीरणे सत्वर
  साधो साधु जनातु वर्तिरतये(!) मामेप संपृच्छसि ॥ १५ ॥

DR.RUPNATHJI( DR.RUPAK NATH )

विद्वान् विश्वविदः पुराणपुरुषस्यानंदसंदर्भिणः
श्रीकांतस्य कलावतारतनुवान् संप्राप्तजन्मा यथा ।
त्रात्रैायुद्धरणाय[त्रात्र्यो उ०] पापहतये नारायणैकांतिनः
श्रीमान् यत्सममूर्तिरस्ति नितरां जानंति सभ्या अमी॥१६॥
उद्यद्दिनकररूचिमान् श्रीमान् विश्वाभिरामतां धत्ते ।
हरिपदतिग्मगभस्तिश्रुतशब्दगुणागणे विचरेः ॥ १७ ॥ ०
[from v. 37 in *anushṭubh śloka*.

Some idea of the contents of the work will be obtained from the following list of chapters:

1–10. Philosophical.—1. (*śl.* 126) *paramabrahmaprasaṅgavarṇanam*; 2. (125 *śārdūlav.*) *sṛishṭyādivicitravarṇanam*; 3. (133 ditto) *sṛishṭiniropaṇe'ntaḥkaraṇacatushṭayayantranirūpaṇe svātmāvabodha*; 4. (119 *anushṭ. śl.*) *yantranirūpaṇe vyaktivarṇane subuddhivarṇanam*; 5. (*śl.* 127) *advaitaprasaṅge gatimahimāvarṇanam*; 6. (*śl.* 125) *buddhivibhavavarṇane śrutyarthasāranirṇaya*; 7. (*śl.* 147) *rasavarṇanam*; 8. (*śl.* 147) *buddhivibhavavivekavarṇane pravṛittinivṛittinirūpaṇam*; 9. (*śl.* 125) *sevyasevakabhedapraśaṃsāyām bhaktyudbhāsa*; 10. (*śl.* 140) *sevyasevakabhāvavarṇane bhagavadbhaktivarṇanam*;—

11. (*śl.* 126) *nijāyuḥsārthakākaraṇe brāhmamuhūrtaprātaḥsamayāvadhivaishṇavapravṛitti-nirṇaya*; 12. (*śl.* 125) *bhaktivarṇane* [*ś*]*mātrayāpākaraṇaprasaṅge pañcayajñanirūpaṇādivicitravarṇane bhaktiyuktitādātmyanirūpaṇam*; 13. (*śl.* 192) *pañcāyatananirūpaṇe brahmajñānāvāptinirṇaya*; 14. (*śl.* 131) °*mahālayasṛishṭikartṛitvaprasaṅga-*; 15. (*śl.* 158) *karmākarmavikarmaprastāve* °*nijādhikārasthitivarṇanam*; 16. (*śl.* 125) *yogāntarāyanirākaraṇanirūpaṇe karaṇapurushavarṇane nāmamahimā*; 17. (*śl.* 125) *pañcāyatanaprakaraṇe hetupurushasahajapurushasvarūpavarṇanam*; 18. (*śl.* 115) *svādhikāramayabhaktivaicitrībhedābhedavibhavasadāśivarūpasaṃgīta*; 19. (*śl.* 136) °*brahmarudrādinā bhagavadaṃśasāmyavarṇanam*; 20. (*śl.* 131) *gotradevatāpūjanādhikāra-*; 21. (*śl.* 138) *dvādaśaparvanirūpaṇam*; 22. (*śl.* 137) *pūrvacitipraśaṃsā*; 23. (*śl.* 124); 24. (*śl* 135) *tulanāpraśaṃsā*; 25. (*śl.* 152) *gṛihasthapraśaṃsāyām anvahavratabrahmacaryanirūpaṇam*; 26. (*śl.* 135) *gṛihasthāśramavarṇane mantradīkshāpraśaṃsā*; 27. (*śl.* 142); 28. (*śl.* 136) *dīkshāmantragrahaṇamahotsava*; 29. (*śl.* 120) *dīkshāgrahaṇam*; 30. (*śl.* 153) *puraścaraṇavidhiśūdravarṇādhikāravarṇanam*; 31. (*śl.* 141) *bhagavadbhaktivilāsamahotsava*; 32. (*śl.* 127) *damanakamahotsava-kelimahotsavanirūpaṇam*; 33. (*śl.* 189) *śayanyutsava*; 34. (*śl.* 131) *pavitrāropaṇamahotsava*; 35. (*śl.* 146) *kaṭidānamahotsavavijayotsava*; 36. (*śl.* 202) *rathamahotsava-dhvajāropaṇamahotsava*; 37. (*śl.* 167) *dīpālikāmahotsava-kārttikamahotsava-tripurotsava*; 38. (*śl.* 133) *vibhūtipradamahotsava*; 39. (*sl.* 158) *dadhyodanādisītāśanamahotsava*; 40. (*śl.* 147) *hutālīkamahotsava*; 41. (*śl.* 239) *purushottamamahotsava*; 42. (*śl.* 127) *ekādaśīvidhi*; 43. (*śl.* 135); 44. (*śl.* 125); 45. (*śl.* 147); 46. (*śl.* 126); 47. (*śl.* 133); 48. (*śl.* 125) *mahārāsaravarṇanam*; 49. (*śl.* 143) *rāmanavamīmahotsavavratavidhi*; 50 and 51 (some omission, *śl.* 1–119, then 99–131) *kṛishṇajanmāshṭamīvratamahotsavavidhi*; 52. (*śl.* 106) *śivarātrivratanirṇaya*; 53. (*śl.* 111) *śivaliṅgaśuddhāśuddhapūjananirṇaya*; 54. (*śl.* 153) *śāligrāmagallakīmaṇicakravarṇanam*;—

For a *Kalpavallīstotram* assigned to the *Rudrayāmala*, see Burnell, Tanjore MSS., p. 200*a*.

[H. T. Colebrooke.]

## 2549.

**2257.** Foll. 42; size 6½ in. by 4¾ in.; legibly written in Devanāgarī; 13 or 14 lines in a page; modern.

*Śārikābhagavatīpañcāṅga*, and *Jvālāmukhīpañcāṅga*(?), of the *Rudrayāmala Tantra*.

DR.RUPNATHJI( DR.RUPAK NATH )

I. begins: अथ श्रीशारिकाभगवतीपंचांगं लिख्यते । तत्रादौ पटलं लिख्यते । श्रीभैरव उवाच ।

शृणु देवि प्रवक्ष्यामि पटलं देवदुर्लभम् ।
सर्वसिद्धिप्रदं दिव्यं सर्वैश्वर्यप्रदायकम् ॥

या देवदेवी वरदा शारिका भुवनेश्वरी ।
त्रैलोक्यजननी दुर्गा विद्या सप्ताक्षरा परा ॥

सप्तविद्येश्वरी सैव सप्तलोकान्तराश्रया ।
सप्तद्वीपमयी पृथ्वी शून्यरूपा कुलेश्वरी ॥

वक्ष्यामि पटलं देवि मंत्रोद्धारप्रकाशकं ।
यंत्रोद्धारं लयांगाढ्यं यथावद्वर्णयामि ते ॥

मंत्रोद्धारं महद्गोप्यं सर्वसिद्धिप्रदं कलौ ।
लोकानां हितमात्रार्थं तत्रादौ शृणु पार्वति ॥

तारं परामातटसिंधुराणीः
खं शर्म तन्मध्यगतं च नाम ।
अंते स्मरे पार्वति शारिकायास्
त्रयोदशार्णो मनुरस्य गोप्यः ॥

मंत्रस्यास्य महादेवि न विघ्नो नापि दूषणम् ।
न विपर्ययभीर्लोके सिद्धिसाध्यारिसंयमः ॥

साक्षात्सिद्धिप्रदो मंत्रः सर्वविघ्नप्रहारकः ।
ब्रह्महत्यासुरापानमहापातकजं मलम् ॥

प्रक्षालयति मंत्रो ऽयमभक्ष्यभक्षणं ध्रुवम् ।
मंत्रमुत्कीलयेदादौ मृतं संजीवयेत्पुनः ॥

सिद्धं मंत्रं जपेन्मध्ये दद्यादंते च संपुटम् ।
ततः सिद्धिमनुः सिद्धो नासाध्यो भवति ध्रुवम् ॥

अस्य मंत्रस्य देवेशि प्रभावाद्भैरवो ऽस्म्यहम् ।
विष्णुर्नारायणो देवि ब्रह्मा लोकपितामहः ॥

न देयः परशिष्याय भक्तिहीनाय पार्वति ।
अन्यथा सिद्धिहानिः स्यादुभयोः शिवशापतः ॥

मंत्रस्यास्य ऋषिः प्रोक्तो महादेवो महेश्वरि ।
त्रिष्टुप् छंदः समाख्यातं शारिका देवता स्मृता ॥

शर्म बीजं रमा शक्तिः सिंधुरं कीलकं स्मृतम् ।
धर्मार्थकाममोक्षार्थे विनियोग इतीरितः ॥

तारं परा रमा बीजैः षड्दीर्घाचाररूपिभिः ।
न्यासं कुर्या[:] षडंगादि येन देवीमयो भवेत् ॥

ध्यानमस्याः प्रवक्ष्यामि जगच्चैतन्यकारणम् ।
येन ध्यानेन देवेशि परानंदः प्रजायते ॥

बालार्ककोटिद्युतिमिंदुचूडां
वरासिचक्राभयबाहुमाद्याम् ।
सिंहादिरूढां शिववामदेव-
लीनां भजे चेतसि शारिकेशीम् ॥

यंत्रोद्धारं प्रवक्ष्यामि ०

इति श्रीरुद्रयामले तंत्रे श्रीशारिकापटलः समाप्तः fol. 4*a*.

अथ श्रीशारिकाभगवतीपूजापद्धतिर्लिख्यते ओं ।

श्रीशारिकां भवभयोद्धरणैकशीलां
वंदे यथेष्टफलदां कुलदेवतां स्वाम् ।
या ब्रह्मकीटतनुगापि गिरौ प्रद्युम्ने
लोकैर्मिता भवति या परमार्थसंचित् ॥

ओं ब्राह्मे मुहूर्ते शयनतलादुत्थाय करचरणौ प्रक्षाल्य निजासने समुपविश्य स्वनिजशिरसि श्वेतवर्णाधोमुखसहस्रदलकमलकर्णिकांतर्गतचंद्रमंडलसिंहासनोपरिपणं स्वगुरुं शुक्लवर्णं शुक्लालंकारभूषितं ज्ञानानंदमुदितमानसं सच्चिदानंदविग्रहं त्रिनयनं चतुर्भुजं ज्ञानमुद्रापुस्तकवराभयकरं वामांगे वामहस्तधृतकमलया रक्तवसनाभरणया स्वप्रियया दक्षभुजेनालिंगितं सर्वदेवाधिदैवं परमशिवस्वरूपं शांतं सुप्रसन्नं ध्यात्वा तच्चरणकमलयुगलविगलदमृतधारया स्वात्मानं प्लुतं विभाव्य मानसैरुपचारैः समाराध्य ओं ऐं ह्रीं श्रीं हसख फ्रें हसक्षमलवय ऊं सहख फ्रें हसक्षमलवरय ऊं ह्सौः स्हौः श्रीमच्छ्रीअमुकानंदनाथश्रीपादुकां पूजयामि तर्पयामि नम इति दशधा विमृश्य मनसा दंडवत्प्रणामं कुर्यात् ०

इति श्रीशारिकापद्धतिः ॥ fol. 24*b*.

श्रीभैरव उवाच । ओं

अधुना देवि वक्ष्यामि शारिकाकवचं शुभम् ।
त्रैलोक्यमोहनं नाम मूलमंत्रमयं शृणु ॥

यस्य श्रवणमात्रेण सर्वयज्ञफलं लभेत् ।
सर्वोपद्रवहरणं दिव्यं सर्वसिद्धिप्रदं कलौ ॥ ०

इति श्रीरुद्रयामले तंत्रे श्रीशारिकाभगवतीकवचं संपूर्णम् fol. 27*a*.

अथ श्रीशारिकासहस्रनाम लिख्यते ॥ ० श्रीभैरव उवाच ।

कथयामि परां विद्यां सहस्राख्याभिधां शिवे ।
शिवायाः शारिकाख्यायाः परां सर्वस्वरूपिणीम् ॥

विना नित्यक्रियां देवि विना न्यासं विनार्चनम् ।
विना पुरस्क्रियां जप्यहोमार्चनादितर्पणम् ॥ ०

इति ० श्रीशारिकानामसहस्रं संपूर्णम् ॥ fol. 33*b*.

श्रीभैरव उवाच ।



DR.RUPNATHJI(DR.RUPAK NATH)

अस्य श्रीशारिकास्तवराजस्य श्रीमहादेव ऋषिः । त्रिष्टुप् छंदः । श्रीशारिका भगवती देवता । शां बीजं श्रीं शक्तिः क्रं कीलकं सर्वसिद्ध्यर्थे जपे पाठे विनियोगः । ओं

त्र्यक्ष त्र्यक्षे तव मनुशिरोमौलिमाणिक्यभूतं
ध्याये चित्ते शशधरकलाबिंबबिंबावतंसं ।
यो मंत्रेशं जपति मनसा माननीयो महद्भिर्
धन्यैः पुण्यैः स भवति महद्भोज्यमाने महत्वान् ॥ °

इति ° दशविद्यारहस्ये श्रीशारिकास्तवराजः संपूर्णः ॥ ° समाप्तमिदं श्रीशारिकाभगवतीपंचांगम् ॥ fol. 35*a*.

II. अथ ज्वालाभगवतीकवचं लिख्यते ॥ श्रीभैरव उवाच ।

देवि देवि जगन्मातर्ज्वालामुख्यं ब्रवीम्यहम् ।
कवचं मंत्रगर्भं च त्रैलोक्यविजयाभिधम् ॥ °

इति ° ज्वालामुखीकवचं संपूर्णम् ॥ fol. 37*a*.

अथ जपविधिः ॥ आदौ आसनशुद्धिं कृत्वा ततो गायत्रीन्यासं ततः प्राणायामः । ओं अस्य श्रीज्वालामुखीमंत्रस्य श्रीभगवान्भैरव ऋषिः । ° श्रीज्वालामुखीदेवतायै नमः । हृदि ह्रींबीजाय नमो नाभौ श्रींशक्तये नमः ° . . इति ज्वालामुखीजपविधिः fol. 37*b*.

अथ ज्वालामुखीस्तोत्रं लिख्यत । ओं

नानास्तुतिपरास्सर्वे यस्यास्सर्वे दिवौकसः ।
नमो हत्वा शंकरस्य भूत्यै भूयात्सदाशिवः ॥ °

इति ज्वालामुखीस्तोत्रं संपूर्णम् ॥

इति गणपतिजपविधिः fol. 39*a*; इति सूर्यजपविधिः fol. 39*b*; इति लक्ष्मीनारायणजपविधिः fol. 40*b*; इति महादेवजपविधिः fol. 41*b*; after which some lines of formulas, ending:

पद्माधिरूढां सुसितां त्रिनेत्रां
शूलाक्षमाले कमलं च खड्गं ।
करैश्चतुर्भिः सततं वहंतीं
सरस्वतीं सिद्धिकरीं नमामि ॥

इति ध्यानम् । अथ मंत्रः । ओं ह्रीं ऐं ह्रीं ओं सरस्वत्यै नमः । गुह्यातिप्रसादात्परमेश्वरि ॥ इति सरस्वतीजपविधानं समाप्तं ॥ [R. JOHNSON.]

## 2550.

**452a.** Foll. 76; size 9½ in. by 5 in.; clear Devanāgarī writing; ten lines in a page.

*Dhātukalpa*, lessons of alchymy, in form of a dialogue between *Mahādeva* and *Pārvatī*; professing to form part of the *Rudrayāmala*. Rather incorrect.

It begins: श्रीपार्वत्युवाच ॥

अथानंतरं देवेश ब्रूहि धातोश्च संस्कृतिं ।
येन विज्ञानमात्रेण साधये धातुसंमतिं ॥ १ ॥

श्रीमहादेव उवाच ॥

धातुस्तुर्यविधः प्रोक्तस्तुर्येतुर्यैस्त्रयपक्षतः ।
सत्वं रजस्तमश्चैव चतुर्थस्तु निरामयः ॥ २ ॥
राजसे राजसी सिद्धिस्तामसे तामसी तथा ।
सत्वसिद्धिस्तथा सत्वे अतीते सर्वसाधनं ॥ ३ ॥

पार्वत्युवाच ॥

कथ्यतां देव देवेश सत्वराज सतामसं ।
अतीते गुरुता धातोः कार्यलक्षणलक्षिता ॥ ४ ॥
रूपधातुक्रमेणैव तेषां लक्षणसाधनं ।
विट्कीटमृतयुक्तानां तेषां कर्मप्रसाधनं ॥ ५ ॥ ° ७ ॥

महादेव उवाच ॥

तिष्ठंति पृथिवीगर्भे धातवो विविधात्मकाः ।
किमत्काले न विगता धातवो ये मयोदिताः ॥ ८ ॥
गुणलक्षणसंयुक्ताः सांप्रतं न स्मरंति ह ।
कथं ते कथयाम्यद्य वद ब्रह्मांडवासिनि ॥ ९ ॥

पार्वत्युवाच ॥

ये केचित्तु स्मरंतीश व्यक्तं कथय सांप्रतं ।
साधूनामर्थसिद्ध्यर्थप्रभावः श्रीमतां स्मृतः ॥ १० ॥

महादेव उवाच ॥

शृणु देवि प्रवक्ष्यामि धातूनां विविधाः स्थितीन् ।
गुणलक्षणसंयुक्ताः क्रि[या]युक्ता निबोध ताः ॥ ११ ॥ °

इति ताम्रं अथ सीसं fol. 3*b*; अथ लोहनाम fol. 4*a*; इति कांस्यं fol. 4*b*; अथ खखुरनाम fol. 6*b*; इति लोहविधानं fol. 28*a*; इति जासत्वं (thus repeatedly; आनयेत् जसतं शुद्धं विंध्याचलसमुद्भवं । °) fol. 34*a*; इति नागविधिः fol. 36*b*; इति तालं fol. 41*b*; इति ताम्रविधानं fol. 72*a*; इति रजतक्रिया । [अथ हाटकीक्रिया] fol. 74*b*.

There appears little of the mystic element of the *Tantras* in the treatise, but a good deal of experimental knowledge gained by the older pursuits of medicine and cognate arts.

DR.RUPNATHJI( DR.RUPAK NATH )

The MS. marks every 100 *ślokas*, counting altogether 1811 couplets; but the numbering in some parts may not be quite accurate.

It ends:

मारणं भस्मकं चैव धातुसंचारणं तथा ।
कथितं पारदे कल्पे* श्रुतं ते कथितं मया ॥
इत्येका उत्तमा धातोः सर्वसामर्थ्यदायकः(!) ।
कार्यसिद्धिकरा सिद्धा श्रेष्ठकर्मविशारदा ॥
संयोगं पारदं दिव्ये स्वेदनं मर्दनं तथा ।
संजीवनं तु तालेषु मारणं मणशलोदितं(!) ॥
भस्मजं नागजे प्रोक्तं ताम्रे रंजकं सदा(!) ।
वर्णदं औषधीकल्पे संयोगे कथितं मया ॥
जारणं पारदे प्रोक्तं स्वेदनं द(!) सदैव हि ।
सौवर्णं सर्वधातुषु जायते केन केनचित् ॥
अन्यैर्गुणगुणालंवं कीर्तितं शिल्पजे तथा ।
वाणिज्ये वरदानं हि वृद्धैश्चैव कलांतरे ॥ [१]८०० ॥
सुभगराजनीतो हि दानेन जन्म (वि)शुध्यति ।
कर्महं तालके कल्पे अपरेनैव हीनतः(!) ॥
निस्पृहं सत्यगे प्रोक्तं उच्चता कलिमध्यगे ।
कल्पे पंचदशे चैव शोभोमुत्पत्तिवर्णता(!) ॥
गंभीरं कामदं दिव्यं वैश्यं चैव मनोहरं ।
एता निनद्यते चैव कामे चेन्मरुतोत्तमः(!) ॥ ° (6 *sl.*)
प्रातरुत्थापने पुंसां कीर्तयेद्विधिनामकान् ।
प्रोक्ता ये पारदे कल्पे सर्वसिद्धिकराश्च ये ॥
कीर्तिते(?°ने) लभते सौख्यं लक्ष्मीप्राप्यग्रहो(!) सदा ।
प्रतियाति महालक्ष्मीं जायते नात्र संशयः ॥ ८११ ॥

इति श्रीरुद्रयामले उमामहेश्वरसंवादे धातुकल्पे सुवर्णप्रशंसा समाप्ता ॥ संवत् १८६१ समयनामकार्त्तिक सु एकादश्यां तीथउ मंगलवासरे ॥ [H. T. Colebrooke.]

## 2551.

**2793.** Foll. 59; size $9\frac{7}{8}$ in. by $4\frac{1}{4}$ in.; fairly written in Devanāgarī; nine lines in a page.

* Whether these references refer to special treatises (see Aufrecht, Cat. Cat., *s.v.* *Pāradakalpa*, *Aushadhakalpa*) or to certain portions of the present treatise, does not appear.

Three *Tantric* treatises. Rather incorrect.

1. *Bhūtaḍāmara Mahātantrarāja*, in fifteen chapters.

It begins (somewhat corrected):

क्रोधाधिपं नमस्कृत्य व्योमवक्त्रं सुरांतकं ।
अभेद्यभेदकं स्तौमि भूतडामरनायकं ॥
त्रैलोक्याधिपतिं रौद्रं सुरसिद्धनमस्कृतं ।
उन्मत्तभैरवं नत्वा पृच्छत्युन्मत्तभैरवी ॥
उन्मत्तभैरव्युवाच ॥
कथं यक्षाक्षरा(?प्सरा)नागाः किंनराः प्रमथादयः ।
जंबुद्वीपे कलौ सिद्धिं यच्छंत्येषां वरांगनाः ॥
ये स्युः पापरता मिथ्यावादिनः शीलवर्जिताः ।
सालस्या ये नरास्तेभ्यः साहाय्यं कुरु न स्वयं ॥
केनोपायेन नश्यंति कलौ दुष्टाचराशयः(!) ।
लभ्यंते सिद्धयः सर्वा मोक्षयद्भूतयः शुभाः ॥
सिद्धयो ऽप्यणिमाद्याश्च महापातकनाशनाः ।
अनाश्याशनतः पापमन्यस्त्रीगमनादिकं ॥
कथं ति[ष्ठति] देवेश हेलया नारकं तमः ।
चंद्रसूर्यप्रभो भूत्वा स्थितौ(?°प्रभा° स्थितौ) रुद्रपुरे [चिरं ॥
सुरसिद्धनागा[न्] भूतयक्षगुह्यकनायिकान् ।
दूरादागत्य कामार्त्ता रमादालिंग्य मंत्रिणं ॥
ब्रह्मेशशक्रप्रमुखा[:] कथं स्युर्नारिता प्रभो ।
पुनः केन प्रकारेण मृता जीवंति निर्जराः ॥
श्रुत्वेति वल्लभावाक्यमुन्मत्तभैरवो ऽसकृत् ।
संतुष्टो भैरवीं प्राह सर्वनियमपूर्वकं ॥
उन्मत्तभैरव उवाच ॥
क्रोधाधिपं व्योमवक्त्रं वज्रपाणिं सुरांतकं ।
वक्ष्ये नत्वा ततस्तंत्रं भूपतिं भूतडामरं ॥
सर्वपापक्षयकरं दुःखदारिद्र्यघातकं ।
सर्वरोगक्षयकरं सर्वविघ्नविनाशनं ॥
महाप्रभावजननं दमनं दुष्टचेतसां ।
महाचमत्कारकरं स्थित्युद्भूतिलयात्मकं ॥
ज्ञानमात्रेण देवेशि भुक्तिमुक्तिफलप्रदं ।
तव स्नेहान्महादेवि कथ्यते ऽकथ्यमद्भुतं ॥
यत्सुरैर्दुर्लभं स्वर्गे मर्त्ये मर्त्यैर्मुमुक्षुभिः ।
नागलोके तथा नागैस्तच्छृणु घनप्रिये(!) ॥

DR.RUPNATHJI( DR.RUPAK NATH )

यस्य ज्ञानं विना क्वापि नारीणां निग्रहो भवेत् ।
यक्षिण्योपि न यच्छंति कथयामि शृणुष्व तत् ॥

इति श्रीभूतडामरे महातंत्रराजे प्रथमः पटलः ॥

For another MS. of this work, consisting of fifteen chapters, see Rāj. Mitra, Notices of Skr. MSS., iv., p. 165. In the present copy the fifteenth *paṭala* ends fol. 38*b*:

अन्यथा वादिने ज्ञानं यत्सुरैरपि दुर्लभं ।
अन्यथा क्रोधवज्रेण विनाशो भविता तव ॥

उन्मत्तभैरवः प्राह भैरवीं सिद्धिपद्धतिं ।
तंत्रचूडामणौ दिव्ये तंत्रे ऽस्मिन् भूतडामरे ॥

इति पंचदशः पटलः ॥

After this the MS. proceeds:

वह्निं वक्त्रांतमिडे व्योममुखं दुर्निरीक्षमतिदीप्तं ।
विबुधा हि यक्षकिंनरभूतांतकमीश्वरमनादिं ॥

मंत्राशेषविशेषज्ञानं यद्गोपितसुरैर्यत्नात् क्रोधीशभैरवप्रोक्तं तद्वक्ष्ये भूतभैरवं नाम यज्ज्ञानं विना जपहोमाद्यं प्रयोगबलिदानं षट्कर्माख्ययनत्वं मोक्षज्ञानं सदा ध्यानं ° etc.;—ending, five lines farther on:

समाप्तश्चायं ग्रंथः ॥ श्रीगुरवे नमः ॥ श्रीभवानीशंकराभ्यां नमः ॥ श्रीकृष्णाय नमः ॥

II. *Bhūtabhairava*:

अथ वक्ष्ये मनुकोषं यदकथितं भूतयक्षडामरयोः ।
क्रमशो बीजविधानं तत्र श्रोत्रादिविन्यासं ॥

तत्रादि क्षांतानां संज्ञाः ।

विद्युज्जिह्वा कालवज्री गर्भिणी धूम्रभैरवी ।
कालकूटा विदारी [च] महारौद्री भयंकरी ॥ °

संहारिणी करालिनी ऊर्ध्वकेश्युग्रभैरवी ।
भीमाक्षी डाकिनी रुद्रा ताकिनी चंडिकेति च ॥

Then follow names of *Bhairava*, and incantations.

Fol. 48: इति श्रीपरमहंसपरिव्राजकपरमरुद्रावतारगुरुचरणशरणश्रीमत्क्रोधीशभैरवविरचितं भूतभैरवं नाम महातंत्रं प्रकाशितं ॥

III. *Nāyikāsādhana* (?):

वक्ष्ये ऽष्टनायिकानां साधनविधिमागमानुसारेण ।
यासां प्रसादलेशाद्विलसति भुवि भैरवाकारः ॥

प्रथमा सुंदरी प्रोक्ता द्वितीया च मनोहरी ।
कनकवती तृतीया कामेश्वरी ततः स्मृता ॥
रतिकरी पद्मिनी च नटी चाप्यनुरागिणी ।
एताः सर्वाः साधकानां सर्वकामफलावहाः ॥

The exposition of these eight forms of incantation are followed (fol. 51*b*) by formulas, and another series of *śakti-sādhanāni*; viz:—1. *vicitrāsādhanam*; 2. *vibhramāsādhanam*; 3. *viśālāsādhanam*; 4. *sulocanāsādhana*; 5. *madanavidyāsādhanam*; 6. *māninīsādhanam*; 7. *haṃsinīsādhanam*; 8. *śatapatrikāsādhanam*; 9. *mekhalāsādhanam*; 10. *vikalāsādhanam*; 11. *lakshmīsādhanam*; 12. *mahābhayāvidyāsādhanam*; 13. *mahendrikāsādhanam*; 14. *śmaśānīvidyāsādhanam*; 15. *vaṭayakshiṇīsādhanam*; 16. *kapālinīsādhanam*; 17. *candrikāsādhanam*; 18. *ghaṭanānāmavidyāsādhanam*; 19. *bhīshaṇīrañjikāvilāsinīṇāṃ sādhanam.*

It ends:

स्तूयमानां मोदमानैर्लोकपालादिभिः सदा ।
एवं यश्चिंतयेद्देवीं जायते नरपुंगवः ॥
क्षत्रियेषु यथा रामो देवेषु च पुरंदरः ।
भुजंगेषु यथा तार्क्ष्यः क्रूरकार्ये यथाशनिः ॥

ग्रंथसंख्या ११०० ॥ संवत् १८५७ मार्गशीर्षशुक्लः ९ भौमवासरे ॥

The leaves of the volume are throughout marked भू. डा.

[COLL. OF FORT WILLIAM.]

## 2552.

**791a.** Foll. 71 (the first of which has been lost and replaced by two leaves in a more modern hand); size $9\frac{5}{8}$ in. by $3\frac{7}{8}$ in.; well written, in Devanāgarī, about A.D. 1750; 9–11 lines in a page.

*Jñānārṇava*, a *tantra* in 23 *paṭalas* [A].

It begins: श्रीदेव्युवाच ॥

गणेशनंदिचंद्रेशसुरेंद्र(सुरेश B)परिवारित ।
जगद्वंद्य कलाधीश किं त्वया जप्यते सदा ॥ १ ॥

DR.RUPNATHJI( DR.RUPAK NATH )

अक्षमालेति किं नाम संशयो मे हृदि स्थितः ।
शब्दातीतं परं ब्रह्म त्वमेव परमात्मवित् ॥ २ ॥

कथयानंदनिस्यंद सांद्रमानसनिश्चयात् ।
ईश्वर उवाच ।
कथयामि वरारोहे यन्मया जप्यते सदा ॥ ३ ॥

अकारादि क्षकारांता मातृका वर्णरूपिणी ।
चतुर्दशस्वरोपेता विंदुत्रयविभूषिता ॥ ४ ॥°

*P.* i. ends fol. 3*a*; ii. *bālānyāsavidhi*, fol. 7*a*; iii. *bālādhyānakathana*, fol. 8*b*; iv. *bālāpūjāvidhi*, fol. 12*b*; v. *śrītripurābālāyajanavidhi*, fol. 15*a*; vi. *pūrvasiṃhāsanavidhi*, fol. 16*b*; vii. *dvitīya-siṃhāsane rudrabhairavīvidhi*, fol. 17*b*; viii. *pañcasiṃhāsanavidhi*, fol. 18*a*; ix. *pañcasiṃhā-sanavidhi*, fol. 21*a*; x. *tripurasundarīdvādaśavi-varaṇa*, fol. 27*a*; xi. *shoḍaśīvivaraṇa*, fol. 29*b*; xii. *śrīvidyānyāsamudrāvivaraṇa*, fol. 38*a*; xiii. *śrīvidyāyajanavidhi*, fol. 45*b*; xiv. *prayogavidhi*, fol. 50*b*; xv. *ratnapushpavidhi*, fol. 51*b*; xvi. *bījasādhanavidhi*, fol. 53*b*; xvii. *tripurājapa-homavidhi*, fol. 59*b*; xviii. *jñānahomavivaraṇa*, fol. 61*a*; xix. *dūtiyāgavidhi*, fol. 63*b*; xx. *jñāna-dūtiyajana*, fol. 65*a*; xxi. *dīkshāvidhi*, fol. 68*b*; xxii. *damanaropaṇa*, fol. 70*a*; xxiii. ends:

योगिनीर्योगिनश्चैव ब्राह्मणान्विविधान् सदान ।
पूज्यानि परमेशानि यदोच्छेत्सिद्धिमात्मनः ॥

इति श्रीज्ञानार्णवे नित्यातंत्रे सार्द्धत्रिसहस्रतंत्रे पवित्रारोपणं नाम त्रयोविंशतिः पटलः ॥ २३ ॥

[H. T. Colebrooke.]

## 2553.

**425.** Foll. 54; size 12 in. by 6 in.; well written, in Devanāgarī, about A.D. 1700; twelve lines in a page.

The same work. [B.]

The colophon runs: इति श्रीज्ञानार्णवे नित्यातंत्रे पवित्रारोपणविधिर्नाम त्रयोविंशः पटलः संपूर्णः ॥

[H. T. Colebrooke.]

## 2554.

**973.** Foll. 135 (wrongly numbered 126, in consequence of several blunders); size 11 in. by 2¼ in.; well written, in the Bengali character; five lines in a page. Fol. 1 has been supplied by a different, less readable, hand.

*Gautamīya-tantra*, a systematic, and highly popular, manual of *Vishṇu* (*Krishṇa*) worship, based on the ritual forms of *Śākta* mysticism.

It begins: ओं नमः श्रीगुरवे ॥ ओं नमः परमदेवतायै ॥

सिद्धाश्रमे वसन् श्रीमान् कदाचिद्गौतमो मुनिः ।
तपःस्वाध्यायनिरतो भक्तिमान्पुरुषोत्तमे ॥

नमस्यन शिरसा विष्णुं स्तुवन रागजनार्दनं ।
जपन् कराभ्यां पद्मेशं(?) हृदा ध्यायन सदा हरिं ॥

समस्तश्रुतितत्त्वज्ञ इतिहासपुराणवित् ।
सर्वोपधिक्रियावश्ययोगसिद्धान्ततत्त्ववित् ॥

धर्मार्थकाममोक्षार्थी नारदं प्रणिपत्य च ।
विनयावनतो भूत्वा पर्यपृच्छद् द्विजोत्तमः ॥

भगवन् कामदा मन्त्राः शत्रुदामोनवान्यथाः ।
विभिन्नफलदास्ते तु नैकत्र फलदा मताः ॥°

According to this MS., the work consists of 33 *adhyāyas*, the last three of which were, however, numbered 30–32 in the colophons, the numbers being afterwards corrected (apparently by the same hand) in the margin. See also Rāj. Mitra, Notices, iii., p. 99, where the work is stated to consist of 31 chapters, the contents of which are given.

The MS. ends (fol. 134*b*):

यद्गेहे विद्यते ग्रन्थं लिखितं तस्य वेश्मनि ।
कमलापि स्थिरा भूत्वा कृष्णेन सह तिष्ठति ॥

इत्येवं कथितं ग्रन्थं मया ते मुनिसत्तम ।
अस्यालोकनमात्रेण कृष्णात्मा संप्रसीदति ॥

इति श्रीगौतमीये महातन्त्रे सर्वतन्त्रोत्तमोत्तमे त्रयस्त्रिंशो ऽध्यायः ॥° शकाब्दाः १६९८

Then follows another full page, apparently a *śuddhipattra*. [H. T. Colebrooke.]

DR.RUPNATHJI( DR.RUPAK NATH )

## 2555.

**2405.** Foll. 137; size 16 in. by 4 in., the leaves being folded to half their length; good modern Bengalī handwriting; 7 or 8 lines in a page.

*Yoginī-tantra.* Two sections, viz.:—

I. Foll. 1–47. Apparently the first part of the *Tantra*, in 19 *paṭalas*:

कैलाशशिखरारूढं शंकरं परमेश्वरं ।
पप्रच्छ गिरिजाकान्तं गौरी तं वृषभध्वजं ॥

श्रीदेव्युवाच ॥

भगवन् सर्वधर्मज्ञ सर्वज्ञानमय प्रभो ।
सूचितं योगिनीतन्त्रं तन्मे वद जगद्गुरो ॥

माहात्म्यं कीर्तितं तस्य पुरा श्रीशैलमन्दिरे ।
वाराणस्यां कामरूपे नेपाले मन्दराचले ॥

श्रीईश्वर उवाच ॥

शृणु देवि प्रवक्ष्यामि योगिनीतन्त्रमुत्तमं ।
पावनं परमं धन्यं मोक्षैकफलदायकं ॥०

It ends:

इति ते योगिनीतन्त्रं सर्वाङ्गं कथितं मया ।
गोपनीयं सदा भद्रे योनिः परनरे यथा ॥

इति श्रीयोगिनीतन्त्रे देवीश्वरसंवादे द्वाविंशतिसाहस्रे (चतुर्विंशतिसाहस्रे MS. 955) ऊनविंशतिः पटलः ॥

The 16th chapter of this part is identical with that noticed in Aufrecht's Cat. Bodl., p. 100*b*; see also Rājendralāla Mitra, Notices, vi., p. 278.

II. Foll. 48–137, marked 34–123. *Kāmarūpādhikāra*, or *Kāmarūpanirṇaya*.

It begins:

प्रधानमाधारविकल्पसत्ता-
स्वभावभावा भुवनत्रयस्य ।
सा विद्यया व्यक्तमपीह माया
ज्योतिः परं पातु जगति नित्यं ॥

श्रीदेव्युवाच ।

उड्डीयानादिकं पीठं श्रुतो हन्तारपीहकं(?)।
इदानीं श्रोतुमिच्छामि कामरूपस्य निर्णयम् ॥

यदुक्तं तत्त्वया नाथ घोरपापविनाशकं ।
कामाख्यासंज्ञकं पीठं प्रकाशं तु कलौ गतं ॥

कलिमर्त्यप्रदष्टानां विचिन्तानां चिकित्सकं ।
भेषजं परमं देव किंरूपं कथ्यतां विभो ॥

श्रीभगवानुवाच ।

उड्डीयानस्य देवेशि प्रादुर्भावः कृते युगे ।
पूर्णशैलस्य संभूतिस्त्रेतायुगमुखे ऽभवत् ॥०

Incomplete. The MS. ends abruptly in the middle of a couplet.

There are 14 complete chapters; fol. 135*b*: इति श्रीयोगिनीतन्त्रे सर्वतन्त्रोत्तमे द्वाविंशतिसाहस्रे प्रथमतमे द्वितीयभागे कामरूपाधिकारे चतुर्दशः पटलः ॥

[F. Buchanan.]

## 2556.

**955.** Foll. 80; size $10\frac{3}{4}$ in. by $4\frac{1}{4}$ in.; fairly good Devanāgarī writing of 1794 A.D.; nine lines in a page.

The first part of the *Yoginītantra*, in 19 *paṭalas*. [H. T. Colebrooke.]

## 2557, 2558.

**185, 186.** Foll. 221 and 159; size $12\frac{1}{2}$ in. by $4\frac{1}{2}$ in.; legibly written in Devanāgarī; 10 (at first 11) lines in a page.

*Dāśarathīya-tantra*, so called as professing to have been proclaimed by *Rāma*, the son of *Daśaratha*, who, as the personification of *Nārāyaṇa* and *Brahman*, is also the chief object of adoration in the work.

The MS., whilst fairly correct in the early part, is very far from being so later on.

I. The *pūrvārdha*, consisting of 59 *adhyāyas*, begins:

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननं ॥ १ ॥

श्रीज्ञानकोशपादाब्जदृढभक्तं जितेंद्रियं ।
विभांडकसुतं शांताभर्तारं तपसां निधिं ॥ २ ॥

DR.RUPNATHJI( DR.RUPAK NATH )

सिद्धाश्रमे समासीनमृष्यशृंगमकल्मषं ।
उद्दालक उदंकश्च मौद्गल्यो गालवस्तथा ॥ ३ ॥

गौतमस्य सुतः साक्षाच्छतानंदो महातपाः ।
तीर्थयात्राप्रसंगेन सिद्धाश्रममुपागताः ॥ ४ ॥

तत्र सिद्धाश्रमे पुण्यतीर्थे स्नात्वा तपस्विनः ।
ऋष्यशृंगं तपोराशिमपश्यन्वीतकल्मषाः ॥ ५ ॥

योगारूढं महात्मानं ज्वलंतं तपसा मुनिं ।
दृष्ट्वा प्रणेमुः साष्टांगं कृतांजलिपुटा द्विजाः ॥ ६ ॥

तान्दृष्ट्वा योगिवर्यो ऽसौ शांतात्मा महातपाः ।
पृष्ट्वा कुशलमव्यग्रमासनेपूपवेशयत् (?०पुन्यवेशयत्) ॥ ७ ॥

मौद्गल्योद्दालकोदंकशतानंदादयो द्विजाः ।
आसीना आसनेष्वेते विभांडकसुतं विभुं ॥ ८ ॥

धर्मजिज्ञासया वाक्यमिदं प्रोचुस्तपोधनाः ।
ऋषय ऊचुः ।
विभांडकसुत स्वामिन्सर्वज्ञ तपसां निधे ॥ ९ ॥

अस्माभिर्यत्तपस्तप्तं सर्वमफलमद्य मे ।
ब्रह्मलोकं गता अद्य पितरो नः पितामहाः ॥ १० ॥

अद्यास्माभिर्महद्भाग्यं लब्धं त्वत्पाददर्शनात् ।
अद्य धन्याः कृतार्थाः स्म(?स्मो) व्रतानि सफलानि नः ॥ ११ ॥

त्वत्पादांभोरुहद्वंद्वदर्शनं पुण्यराशिभिः ।
बहुजन्यार्जितैर्लभ्यं नान्यथा तपसां निधे ॥ १२ ॥

इत्युक्त्वा मुनयस्तूष्णीमासीनाः संशितव्रताः ।
तानाह भगवान्योगी विभांडकसुतो मुनिः ॥ १३ ॥
ऋष्यशृंग उवाच ॥
कच्चिद्वः सफला वेदाः कच्चिद्वः सफलं धनं ।
कच्चिद्वः सफला नार्यः कच्चिद्वः सफलं श्रुतं ॥ १४ ॥

अग्निहोत्रफला वेदा दत्तभुक्तफलं धनं ।
रतिपुत्रफला नारी शीलवृत्तफलं श्रुतं ॥ १५ ॥

कच्चिद्वो गुरुशुश्रूषा सफला मुनिपुंगवाः ।
कच्चिद्वः सफलं तप्तं तपश्चांद्रायणादिकं ॥ १६ ॥

भवद्भिरपि सर्वज्ञैः किं प्रष्टव्यो ऽस्म्यहं द्विजाः ।
यथामति प्रवक्ष्यामि वदंतु मुनिपुंगवाः ॥ १७ ॥

शतानंदादयो विप्रा इत्युक्तास्तपोधनाः ।
कृतांजलिपुटा ऊचुर्नत्वा साष्टांगमादरात् ॥ १८ ॥
ऋषय ऊचुः ॥
भगवन्योगिनां श्रेष्ठ सर्वशास्त्रविशारद ।
कथं ब्रह्म विजिज्ञास्यं कीदृशैर्नियतव्रतैः ॥ १९ ॥

कथं स्यात् ब्रह्मतादात्म्यं कालमृत्योश्च वंचनं ।
कथं कालस्वरूपं स्यात्त्वरेण ज्ञातमप्यथ ॥ २० ॥

संसारतारणोपायः कथमेकेन जन्मना ।
ऋष्यशृंग महाभाग सत्यमेतद्वदस्व नः ॥ २१ ॥ ०

In the second chapter the following occurs:

ओंकारवाच्यं विश्वस्य कारणं परमेश्वरं ।
तन्मात्रादात्मकः साक्षादकारात्मा सनातनः ॥ १० ॥

अभूद्यं वासुदेवाख्यनाहुर्ब्रह्मर्षयो ऽमलाः ।
बिंदुः समभवत्तस्माज्जीवात्मान्तः सनातनः ॥ ११ ॥

स ईश्वर इति प्रोक्तः शुद्धज्ञानमयः पुमान् ।
तयोर्मध्ये समुद्भूता कला चिद्रूपिणी परा ॥ १२ ॥

यामाहुर्भगवच्छक्तिं त्रयीरूपां सनातनीं ।
तत आविर्भूत्साक्षात्पंचाशद्वर्णमातृका ॥ १३ ॥

सैव श्रीः परमा शक्तिश्चित्कला परमेश्वरी ।
साक्षान्नारायणमयी ब्रह्माभिन्ना चिदात्मका ॥ १४ ॥
[(the letters) ० १८ ॥

लक्ष्मीनारायणी साक्षान्मातृका समुदीरिता ।
मातृका परमा शक्तिरभिन्ना ब्रह्मणो द्विजाः ॥ १९ ॥

नारायणाज्ञया विश्वं सृजत्यवति हंति च ।
अनयैव समुद्भूता वेदाः सांगाः सनातनाः ॥ २० ॥

धर्मशास्त्रपुराणानि सर्वोपनिषदो ऽपि च ।
चतुःषष्टिकला विद्या विद्या अष्टादशापि च ॥ २१ ॥

सर्वं मातृकयोत्पन्नं जगदेतच्चराचरं ।
यदा सिसृक्षा भगवद्ब्रह्मणः परमात्मनः ॥ २२ ॥

तदा विराजं पुरुषं विश्वकारणविग्रहं ।
असृजत्ब्रह्मरूपी पुरुषः स महान् द्विजाः ॥ २३ ॥

द्विधा कृत्वात्मनो देहमर्धेन पुरुषो ऽभवत् ।
अर्धेन नारी तस्यां तु विराजमसृजद्विभुः ॥ २४ ॥

यो महापुरुषः प्रोक्तः परब्रह्मात्मको मया ।
श्रीमदष्टाक्षरात्मासावेक एव परो ऽच्युतः ॥ २५ ॥

नारायण इति ख्यातः सर्वलोकैककारणं ।
स एवाद्यः पुमान्नित्यः परमात्मा सनातनः ॥ २६ ॥ ०

*Rāma* is not introduced till the latter part of the third chapter:

त्रेतायुगे दशरथात्कौशल्यागर्भसंभवः ।
श्रीराम इति लोके ऽस्मिन् ख्यातो दाशरथिर्विभुः ॥ ८३ ॥



DR.RUPNATHJI( DR.RUPAK NATH )

हत्वा दुष्टं दुराधर्षं रावणं रजनीचरं ।
गुभ्रं राक्षसकोटीभिर्भिन्नांजनचयोपमं ॥ ८४ ॥
राज्याभिषिक्तः सहितो भ्रातृभिर्लक्ष्मणादिभिः ।
वसिष्ठादिमहर्षीणां संनिधावपि वाक्पतेः ॥ ८५ ॥
वेदार्थसंग्रहं नाम्ना तंत्रं सकलकामदं ।
समस्तविद्यारत्नानां रहस्यप्रतिपादकं ॥ ८६ ॥
अनुत्तरब्रह्मतत्त्वरहस्यं श्रुतिसंमितं ।
कथयामास रुद्राय पृच्छते मुनिपुंगवः ॥ ८७ ॥
हिताय सर्वलोकानां धर्मसंस्थापनाय च ।
सारभूतमिदं वेदवेदांतार्थरहस्यकं ॥ ८८ ॥
मुक्तिरत्नं महच्छास्त्रमुक्तवाञ्जातकीपतिः ।
यत्रैव ब्रह्मणस्तत्त्वरहस्यं श्रुतिसंग्रहं ॥ ८९ ॥
ब्रह्मविद्याष्टवर्णादिविधानं सांगमुत्तमं ।
रहस्यमपि यत्रोक्तं भोगस्वर्गापवर्गदं ॥ ९० ॥
तंत्रं दाशरथीयाख्यमिदं तस्माद् द्विजोत्तमाः ।
भगवद्वदनांभोजादाविर्भूतमिदं शुभं ॥ ९१ ॥
शास्त्रं सकलवेदानां सारभूतार्थसंग्रहं ।
आचार्यवदनांभोजाद्विज्ञेयं नान्यथा द्विजाः ॥ ९२ ॥ °

In the fourth chapter the gods, *Lokapālas* and *Ṛishis*, repair to Ayodhyā, to render homage to *Rāma* :

विधिरुद्रादयो देवा आसीना आसनेषु ते ।
इदमूचुर्वचो ऽत्यंतं रामं राजीवलोचनं ॥ २२ ॥
अहो भाग्यमहो भाग्यमद्यास्माकं जगत्पते ।
यत्तद्ध्येयमव्यक्तं पश्यामस्त्वां जगत्पतिं ॥ २३ ॥
तपः फलितमस्माकं बहुजन्मार्जितं विभो ।
अद्य नः सफला यज्ञा बहुशो दक्षिणान्विताः ॥ २४ ॥
देवं नारायणं साक्षात्पश्यामस्त्वां नराकृतिं ।
वेदा अपि च वेदांतास्त्वामेव ब्रह्मरूपिणं ॥ २५ ॥
संस्तुवंति यथा नित्यं वंदिनः परमेश्वरं ।
यतो वाचो निवर्तंते ऽप्यप्राप्यमनसा सह ॥ २६ ॥ °

Solicited by *Śiva*, he then instructs them in the *brahmavidyā* :

गौरीपते प्रवक्ष्यामि तत्त्वं भगवतो मम ।
रहस्यमपि वेदांतसारभूतार्थसंग्रहं ॥ ४४ ॥
सत्यं विज्ञानमानंदं रूपमक्षरमच्युतं ।
गुहायां निहितं ज्योतिरचलं शाश्वतं ध्रुवं ।
तदेव मे परं ब्रह्म रूपं नारायणाभिधं ॥ ४५ ॥

वेद(*r.* वेदांत)वेद्यो ऽस्मि तथैव वेदैः
स्तुतो ऽस्मि नित्यं परिपूर्णकामः ।
ध्येयो ऽस्मि योगीश्वरसिद्धसंघैः
पूज्यो ऽस्मि नित्यं भुवनेषु सर्वैः ॥ ४६ ॥ ° ५३ ॥
मम शक्तिरभिन्नेयं जानकी श्रीश्चिदात्मिका ।
भिन्ने भामति लोके ऽस्मिन्मम माया दुरत्यया ॥ ५४ ॥
अस्या एवाश(? स्य)संभूता यया विश्वं विमोहितं ।
श्रुतिर्मद्वदनादाविर्भूता सांगा सनातनी ॥ ५५ ॥
अयं मे दक्षिणो बाहुः सृष्टिकर्ता पितामहः ।
वामबाहुर्मदीयस्त्वं विष्णुर्हृदयमेव मे ॥ ५६ ॥ °

In chapter 5, king *Janaka* is introduced as a pious reverer of his *ācārya Gautama*, special reverence being shown by him to the holy man's shoes (*pādukā*). The king's piety eventually gains for him the *pratyakshadarśanam* of *Nārāyaṇa*, who then divulges to him the mystic science as now proclaimed by *Rāma* ; viz.: ch. 6–8. *śrautācāra* ; 9. *dattātreya-māhātmyam* ; 10, 11. *brahmavidyāmāhātmyam*. In this way the exposition of the *Tantric* science is assigned partly to *Rāma* and partly to *Nārāyaṇa*.

The first part ends:

अनुत्तरब्रह्मतत्त्वरहस्ये श्रुतिसंग्रहे ।
तंत्रे दाशरथीयाख्ये पूर्वार्धः समुदीरितः ॥ १९३ ॥
अत्राचार्यमुखांभोजा[च्छ्लो]कमेकं पठन्नपि ।
शृण्वन्वापि विमुक्तो ऽसौ महापातकराशिभिः ।
प्राप्नोति परमं धाम दुर्लभं दैवतैरपि ॥ १९४ ॥

This volume is dated Saṃvat 1857.

II. The *uttarārdha* (also called *Saubhāgya-vidyodaya*), consisting of 45 *adhyāyas*, begins:

ऋषय ऊचुः ।
ऋष्यशृंग महाभाग सर्वज्ञानवतां वर ।
श्रीमदष्टार्णमाहात्म्यं श्रुतं सांगरहस्यकं ॥ १ ॥
श्रीविद्या च तथा लक्ष्मीर्महालक्ष्मीस्त्रिशक्तिका ।
साम्राज्यलक्ष्मीः पंचेति साम्राज्यश्रिय ईरिताः ॥ २ ॥
तत्राद्या साम्राज्यलक्ष्मीः श्रीविद्या कथिता त्वया ।
तस्या माहात्म्यमखिलं वद नः करुणानिधे ॥ ३ ॥

DR.RUPNATHJI( DR.RUPAK NATH )

ऋष्यशृंग उवाच ।

इत्युक्तवंतं नृपतिं रामं त्रिजगतीपतिं ।
प्राह सीतापतिं रुद्रो गौर्या सह जगत्पतिः ॥ ४ ॥

श्रीरुद्र उवाच ।

ब्रह्मतादात्म्यसंसिद्धिहेतुभूतं सनातनं ।
ब्रह्मापरोक्षविज्ञानं रहस्यं भुक्तिमुक्तिदं ॥ ५ ॥

श्रुतं तव मुखांभोजात्सद्यःपातकभंजनं ।
श्रीमदष्टाक्षरीमात्रमाहात्म्यमखिलं श्रुतं ॥ ६ ॥

श्रीविद्या जगतां धात्री सूचिता न प्रकाशिता ।
माहात्म्यमखिलं तस्या वद मह्यं जगत्पते ॥ ७ ॥

श्रीभगवानुवाच ।

यत्तन्नारायणेनोक्तं जनकाय महात्मने ।
माहात्म्यमखिलं शंभो श्रीविद्याया वदाम्यहं ॥ ८ ॥

श्रीनारायण उवाच ।

शृणु राजन्महीपाल सौभाग्योदयनामकं ।
तंत्रे नारायणीये ऽस्मिन्माहात्म्यं सर्वसिद्धिदं ॥ ९ ॥

अहं दाशरथिर्भूत्वा पृष्टो रुद्राय धीमते ।
पुनर्दाशरथीयाख्यं तंत्रं वक्ष्यामि सादरं ॥ १० ॥

This chapter subsequently treats of the three kinds of initiation (*pāśupatī*, *vaishṇavī*, and *traipurī dikshā*). Ch. 2–27 deal with the arcana of the science, as revealed by *Dakshiṇā-mūrti* to his consort *Devī*. At the beginning of ch. 2 the usual 64 *Tantras* are enumerated by *Devī*, though not in as correct a form as one might wish.

The section from ch. 28 to the end is also called *Rājarāja* (or *Rājarājeśvarī*)-*vidyāmāhāt-mya*, consisting first (ch. 28–33) of conversations between *Sumati Jaḍa* and his father, on *Vaishṇava* and *Tantric* rites, and subsequently of a further course of instruction on the part of *Nārāyaṇa*.

It ends:

तंत्रं दाशरथीयाख्यं वेदसारार्थसंग्रहं ।
अत्रैकमपि वाध्यायमर्थज्ञानपुरःसरं ॥ ३७ ॥

पठेद्यः शृणुयाद्वापि विमुक्तः पापराशिभिः ।
प्रयाति परमं धाम सनातनमनुत्तमं ॥ ३८ ॥

ऋष्यशृंगमुखांभोजाच्छ्रुत्वैतत्परमर्षयः ।
मत्वात्मानं परं ब्रह्म रामं नारायणं विभुं ॥ ३९ ॥

ऋष्यशृंगं समाभाष्य ज्ञात्वा धर्मरहस्यकं ।
कृतकृत्यास्ततो जग्मुः स्वाश्रमान्मुदिताननाः ॥ ४० ॥

इदं तंत्रं महद्गुह्यं तारकं ब्रह्मरूपिणा ।
जानकीपतिना प्रोक्तं जगदानंदहेतुकं ॥ ४१ ॥

इति श्रीमदनुत्तरब्रह्मतत्त्वरहस्ये दाशरथीये तंत्रे वेदसारार्थसंग्रहे उत्तरभागे सौभाग्यविद्योदये राजराजविद्यामाहात्म्ये शास्त्ररहस्यकथनं नाम पंचचत्वारिंशो ऽध्यायः ॥

The copyist has added (?from the original MS.) five partly corrupt *ślokas*, the first and last of which run thus:

श्रीविद्वद्वरमंडलीमुकुटरीराजत्पदाम्भोरुहो(?)
यस्यासीद्विबुधः पितामह(रि)निधिः श्रीरत्नसुंदर्यपि ।
माता कूर्मगिरिश्च जन्मधरणी नामापि वंशीधरो
भारद्वाजकुलोयं(? r. कुले) सदारयुपतिः श्रीसुंदरी-
[वल्लभः ॥ १ ॥

शकेंगाश्वभूपोन्मिते (1676 = A.D. 1754) श्रावणे मा-
सि कृष्णे च पक्षे तिथौ षष्ठिकायां
गुरौ वेदसारं . . . . . तंत्रं
लिलेखेह वंशीधरः श्रीशतुष्ट्यै ॥ ५ ॥

[H. T. Colebrooke.]

## 2559, 2560.

**1204, 1004.** Foll. 271 and 174; size 12½ in. by 4¼ in.; fairly written in Devanāgarī, by two different hands (one of which wrote vol. i., foll. 1–151); 8–10 lines in a page; modern.

*Dāśarathīya-tantra*, complete; each volume containing one part. [H. T. Colebrooke.]

## 2561.

**1442a.** Foll. 134 (numbered 133; no. 108 being double); size 12¼ in. by 4¼ in.; indifferent, careless, modern writing; ten lines in a page.

*Prapañcasāra*, a work on the arcana of *Tantric* science and worship, in 36 *paṭalas*; by a writer who signs himself *Ācārya*.



DR.RUPNATHJI( DR.RUPAK NATH )

Rather incorrect.

It begins (somewhat corrected):

अकचटतपयाद्यैः स[ा]मभिर्वर्णवर्गैर्
विरचितमुखबाहा पादमध्यास्यहृत्का(?)।
सकलजगदधीशा शाश्वता विश्वयोनिर्
वितरतु परिशुद्धिं चेतसः शारदा वः ॥ १ ॥

अथाभवन्ब्रह्महरीश्वराख्याः
पुरा प्रधानात्प्रलयावसाने ।
गुणप्रभिन्ना जगतो ऽस्य सृष्टि-
स्थितिक्षयम्पष्टनिविष्टचेष्टाः ॥ २ ॥

स्वनिष्पत्तिं च कृत्यं च ते विचिंत्य यमाविदन् ।
वक्तारमजमव्यक्तमरूपं मायिनं विभुं ॥ ३ ॥

मूर्त्या भासेन दुग्धाब्धौ झषशंखसमाकुले ।
मरुत्संघट्टनोत्कीर्णलहरीकणशीतले ॥ ४ ॥

उद्यदादित्यकिरणप्रशांतशिशिरोदये ।
पूर्णचंद्रकरामर्शप्रतिक्षुभ्रजनाशये ॥ ५ ॥० ७ ॥

नीलोत्पलदलप्रख्यां नीलकुंचितमूर्धजां ।
अष्टमीचंद्रबिंबाभललाटामायतभ्रुवं ॥ ८ ॥

रक्तारविंदनयनामुन्नसामरुणाधरां ।
मंदस्मिताधरमुखीं लसन्मकरकुंडलां ॥ ९ ॥

It ends:

प्रतिमंत्र्य च तां वहतो गुलिकाम्
अमरैरपि दर्शनमस्य भवत् ।
इह सिद्धिरथास्य भवत्यखिला
वडवामुखपुष्करपानमुखा ॥ १० ॥

इति सिद्धमुनींद्रयक्षविद्या-
धरगंधर्वासुराप्सरोभिः ।
प्रतिभावितमुत्तमं विधानं
गदितं पुरुषोत्तमस्य विष्णोः ॥ ११ ॥

इति जपहुतपूजाध्यानकैः श्रीधरं यो
भजति स तु समग्रां संपदैश्वर्यलक्ष्मीं ।
अधरकृतविपक्षों प्राप्य लोकैकवंद्यो
व्रजति पदमनंतं लोकवंद्यस्य विष्णोः ॥ १२ ॥

इत्याचार्यविरचिते प्रपंचसारे पुरुषोत्तममंत्रकथनं नाम षट्त्रिंशः पटलः ॥

Only in a few colophons the contents of the respective chapters are indicated.

[H. T. Colebrooke.]

## 2562.

**2783a.** Foll. 77; size 11 in. by 4½ in.; fairly good Devanāgarī writing; twelve lines in a page.

*Prapañcasāravivaraṇa*, a commentary on the foregoing work, by *Jñānasvarūpa*.

*Paṭalas* 1–16.

The first leaf, written in a different hand, contains a page (not the first) of a commentary on some other work.

Fol. 2 commences in the comment on *śloka* 8: नीलपद्मदलतुल्यां । नीला वक्रा केशा यस्यास्तां । अर्ध-चंद्रतुल्यभालां । दीर्घभ्रुवं ॥ ८ ॥

Colophon: इति ज्ञानस्वरूपविरचिते प्रपंचसारविवरणे षोडशः पटलः ॥ संवत् १७८५ आश्विनमासे शुक्लपक्षे चतुर्थीबुधवासरे ली० काश्यां मध्ये ॥

[Coll. of Fort William.]

## 2563.

**1442c.** Foll. 11; size 12¼ in. by 4 in.; careless, modern Devanāgarī writing; eleven lines in a page.

*Mahācīnakramācāra*, or *Cīnācārasāratantra*—also called *Ācārasāratantra*, or simply *Ācāra-tantra*—a treatise, in 7 *paṭalas*, on a form of (*kaula*) *Śakti* worship, represented as being derived from *Vishṇu-Buddha*, and from China; the illusion of the Chinese origin being kept up by the worshipper being invested during his devotions with twigs of the *mahācīnadruma*.

Rather incorrect.

It begins (somewhat corrected): देव्युवाच ।

महाचीनक्रमाचारः सूचितो न प्रकाशितः ।
इदानीं कथयेशान यदि स्नेहो ऽस्ति मां प्रति ॥ १ ॥

इति पृष्टः पुरा देव्या कैलासशिखरे हरः ।
चिंतयामास मनसा किंचिदाकुलितेक्षणः ॥ २ ॥

इयमस्कं(? कुं)ठिता भूयो यन्मां प्रेरयति प्रिया ।
चीनाचारक्रमं वक्तुं तत्प्रकाश्यं कथं मया ॥ ३ ॥

DR.RUPNATHJI( DR.RUPAK NATH )

इति गुह्यतरः सो ऽयमाचारः सिद्धिदायकः ।
स्त्रीणां चंचलया बुद्ध्या कथं गोप्तुं हि शक्यते ॥ ४ ॥

इति संचिंत्य मनसा पुनराह महेश्वरी ।
महाचीनक्रमाचारं ब्रूहि मे परमेश्वर ॥ ५ ॥

शिव उवाच ।

अलं यत्नैरलं यत्नैरले(!) म[हे]श्वरि ।
चीनाचारक्रमं श्रोतुं विरक्ता भव पार्वति ॥ ६ ॥

स एव पर[मा]चारो न प्रकाश्यः कदाचन ।
गुह्याद्गुह्यतरः साक्षात्तत्त्वज्ञानमयः शिवे ॥ ७ ॥

स्त्रीस्वभावेन भवति शश्वन्मां परिपृच्छसि ।
लक्षवारं रिचासि(!) तथापि श्रोतु[मि]च्छसि ॥ ८ ॥

श्रीपार्वत्युवाच ।

यदि चीनक्रमाचारं न मे कथयसि प्रभो ।
प्राणत्यागं करिष्यामि पुरतस्ते न संशयः ॥ ९ ॥

इत्युक्तः स तदा यो ऽसौ रुद्रः कारुणिको महान् ।
महाचीनक्रमाचारं गदितुं संप्रचक्रमे ॥ १० ॥

सर्वदा गोप्य एवायमाचारः सिद्धिदायकः ।
तवानुरोधादेवाहं कथयामि समासतः ॥ ११ ॥

ब्रह्मणो मानसः पुत्रो वशिष्ठो ऽतीव संयमी ।
तारामाराधयामास पुरा नीलाचले मुनिः ॥ १२ ॥

तपस्स तारिणीं विद्यां कामाख्यायोनिमंडले ।
रामयामास वर्षाणामयुतं ध्यानतत्परः ॥ १३ ॥

वर्षे ध्यानेन तत्रैव चिरमाराधये(?°ने)ऽपि ।
नानुग्रहं चकारासौ तारा संसारतारिणी ॥ १४ ॥

अथासौ पितरं गत्वा ब्रह्माणं प्रोषितवान् । °

*Brahman* then eulogizes the power of *Tārā* which alone enabled him and his divine coadjutors to create, rule and destroy the world. *Vasishṭha* subsequently tries to conciliate her, and not being successful, he becomes enraged :

अचाल वसुधा सर्वा सशैलवनकानना ।
हाहाकारो महानासीद् देवदेवेषु सर्वतः ॥ ३९ ॥

ततो बभूव पुरतस्तारा संसारतारिणी ।
वशिष्ठस्तां समालोक्य शशापातीव दारुणः ॥ ४० ॥

तदा देवी वशिष्ठेन शप्ता न फलदा क्वचित् ।
चीनाचारं विना नैव प्रसीदति कदाचन ॥ ४१ ॥

मदीयाराधनाचारं बौद्धरूपी जनार्दनः ।
एक एवं विजानाति नान्यः कश्चन तत्त्ववित् ॥ ४२ ॥

उवाच साधकं श्रेष्ठं वशिष्ठं मुनिनायका(? कं or यिका) ।
रोषेण दारुणमनाः कथं मामशपद्भवान ॥ ४३ ॥ ° ४४ ॥

तद्बुद्धरूपिणो विष्णोः सन्निधिं याहि संप्रति ।
तेनोपदिष्टाचारेण समाराधय सुव्रत ॥ ४५ ॥

तदैव सुप्रसन्ना स्यां त्वयि वत्स न संशयः ॥

इत्याचारतंत्रे (thus also in *paṭ.* 4.) प्रथमपटलः ॥

*Paṭala* II.

ततः प्रणम्य तां देवीं वशिष्ठो ऽसौ महामुनिः ।
जगामाचारविज्ञानवांछया बुद्धरूपिणं ॥ १ ॥

ततो गत्वा महादेशे चीने स मुनिपुंगवः ।
ददर्श हिमवत्पार्श्वे साधकेश्वरसेवितं ॥ २ ॥

सल्लज्जनभारेण रूपयौवनशालिना ।
मदिरामत्तनेत्रेण विलासोल्लासितेन च ॥ ३ ॥

शृंगाररसवेषेण जनमोहनकारिणा ।
भयालज्जाविहीनेन देवीध्यानपरेण च ॥ ४ ॥

कामिनीनां सहस्रेण परिचारितमीश्वरि ।
मदिरापानसंजातरक्तमंथरलोचनं ॥ ५ ॥

दूरादेव विलोक्यैनं वशिष्ठो बुद्धरूपिणं ।
विस्मयेन समाविष्टः स्मरन्संसारतारिणीं ॥ ६ ॥

किमिदं क्रियते कर्म विष्णुना बुद्धरूपिणा ।
वेदवादविरुद्धो ऽयमाचारः संमतो मया ॥ ७ ॥

इति चिंतयतस्तस्य वशिष्ठस्य महात्मनः ।
आकाशवा[णी] प्राहाशु मैवं चिंतय सुव्रत ॥ ८ ॥

आचारपरमो यो ऽयं तारिणीसाधने मुने ।
एतद्विरुद्धाचारस्य मतेनासौ प्रसीद[ति] ॥ ९ ॥

यदि तस्याः प्रसादं त्वमचिरेणाभिवांछसि ।
एतेन चीनाचारेण तदा मां भज सुव्रत ॥ १० ॥

आकाशवाणीमाकर्ण्य रोमांचितकलेवरः ।
वशिष्ठो दंडवद्भूमौ पपातातीव हर्षितः ॥ ११ ॥

अथोत्थाय[ा]चिरेणासौ कृतांजलिपुटो मुनिः ।
जगाम विष्णोः सन्निधिं बुद्धरूपस्य पार्वति ॥ १२ ॥

अथासौ तं समालोक्य मदिरामदविह्वलः ।
प्राह बुद्धः प्रसन्नात्मा किमर्थं त्वमिहागतः ॥ १३ ॥

अथ बुद्धं प्रणम्याह भक्तिनम्रो मुनीश्वरः ।
जगुः स(?) तारिणीदेव्या निजाराधनहेतवे ॥ १४ ॥

DR.RUPNATHJI( DR.RUPAK NATH)

तच्छ्रुत्वा भगवान्बुद्धस्तत्त्वज्ञानमयो हरिः ।
वशिष्ठं प्राह तज्ज्ञाने चीनाचाराधिकारवान् ॥ १५ ॥

अप्रकाश्यो हिमाचारस्तारिण्याः(!) सर्वदा भवेत् ।
तव भक्तिवशादस्मिन्स(!) प्रकाश्य[ः] कदाचन ॥ १६ ॥

अथाचारविधिं वक्ष्ये देव्याः सर्वसमृद्धिदं ।
यस्यानुष्ठानमात्रेण भवाब्धौ न निमज्जसि ॥ १७ ॥ ० १८ ॥

स्नानादि मानसं शौचं मानसः प्रवरो जपः ।
पूजनं मानसं दिव्यं मानसं चार्पणादिकं ॥ १९ ॥

सर्व एव शुभः कालो नाशुभो विद्यते क्वचित् ।
न विशेषो दिवा रात्रौ न संध्यायां दिवा निशि ॥ २० ॥

वस्त्रासनस्थानगेहे देहस्पर्शादिवारिणः ।
शुद्धिं न चाचरेदत्र निर्विकल्पं मनश्चरेत् ॥ २१ ॥

नात्र शुद्ध्याद्यपेक्षास्ति नापि मित्रादिदूषणं ।
सर्वदा पूजयेद्देवीमस्नातशवभोजनः ॥ २२ ॥

महानिशि शुचौ देशे वलिं मंत्रेण दापयेत् ।
स्त्रीद्वेषो नैव कर्तव्यो विशेषात्पूजयेत्स्त्रियः ॥ २३ ॥

तासां प्रहारो निंदा च कौटिल्यमप्रियं तथा ।
सर्वदा नैव कर्तव्यमन्यथा सिद्धिरोधकृत् ॥ २४ ॥

स्त्रियो देवाः स्त्रियः प्राणाः स्त्रिय एव विभूषणं ।
स्त्रीकुलेषु सदा भाव्यं मनसा स्वस्त्रियामपि ॥ २५ ॥

तद्धस्ताद्रचितं पुष्पं तद्धस्ताद्रचितं जलं ।
तद्धस्ताद्रचितं द्रव्यं महादेव्यै निवेदयेत् ॥ २६ ॥

महाचीनद्रुमलतावेषितः साधकोत्तमः ।
रात्रौ यदि जपेन्मंत्रं दुर्लभं तस्य किं भवेत् ॥ ॥ २७ ॥

महाचीनद्रुमलतावेष्टनेन च यत्फलं ।
तस्यापि षोडशांशस्य कलां नार्हंति [ते] शवाः ॥ २८ ॥

शवाशनादिकफलं लतागेहप्रवेशनं ।
श्मशानालयमागत्य मुक्तकेशो दिगंबरः ॥ २९ ॥ ० ४० ॥

स तीर्थसेवी पीठेषु स निवासी च सर्वदा ।
व्रती स सोमपायी स सयज्ञः सर्वमन्युषु ॥ ४१ ॥

स वैष्णवः स शैवश्च स सौरः स च गाय[न]ः ।
महाचीनक्रमाचारे तारिणीं यः सदा भवेत्(*r.* भजेत्)॥
[४२ ॥

इत्याचारसारतंत्रे द्वितीयः पटलः ॥

*P.* III. शिव उवाच ।
इति तस्य वचः श्रुत्वा हरेर्बुद्धस्वरूपिणः ।
वशिष्ठस्तं पुनः प्राह कृतांजलिपुटो मुनिः ॥ १ ॥

वशिष्ठ उवाच ।
भगवन्देव देवेश तत्त्वज्ञानमय प्रभो ।
महाचीनक्रमाचारः सूचितो भवता मम ॥ २ ॥

प्रधानद्वयमेवास्मिन् मदिरा यो[षि]देव च ।
अनयोः किं प्रधानं तद्ब्रूहि मे परमेश्वर ॥ ३ ॥

बुद्ध उवाच ।
एतस्मिन्परमाचारे तुल्यमेव द्वयं मुने ।
प्रधानं योषितः किंतु देवानां च न संशयः ॥ ४ ॥

यतो हि योषितां देहे सदैवाधिष्ठिता शिवा ।
तस्मात्तं(० त्तु) विधिवत्पूज्या(० जा) तासां प्राधान्य[म्]
[उच्यते ॥ ५ ॥

वशिष्ठ उवाच ।
ब्रूहि देव विधानं च सर्वदेवमयप्रभो ।
यथा योषित्सु तत्पूजा कृता साधकसत्तमैः ॥ ६ ॥

सर्वेषामेव पीठानां प्रधानं योनिपीठकं ।
तत्र संपूज्यतां देवी कठिते(? ० नी) च प्रसीदति ॥ ७ ॥ ० ९ ॥

नटिका पालिनी वेश्या रजकी नापितांगणा ।
ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका ॥ १० ॥

मालाकारस्य कन्या च नव कन्याः प्रकीर्तिताः ।
अथवा सर्वजातीनां विदग्धां लक्षणान्वितां ॥ ११ ॥

आनीयचतमां(? ० यान्यतमां) बुध्यामेतासामेव नायिकां ।
सुंदरीं यौवनोन्मत्तां निर्लज्जां चारुहासिनीं ॥ १२ ॥

कृत्वा दिगंबरीं तां च गंधकुंकुमचंदनैः ।
अनुलिप्तां मुक्तकेशीं ततस्तद्योनिमंडले ॥ १३ ॥

गुरुशक्तिं समारभ्य पूजयित्वा षडंगकं ।
पीठपूजां विधायाथ तन्मध्ये पूजयेच्छिवां ॥ १४ ॥

तत्र चावाहनं नैव जीवन्यासो न वा मुने ।
उपचारैः पूजयित्वा अर्घ्यं दत्त्वा ततः पुनः ॥ १५ ॥

जललिंगे भैरवं च पूजयित्वा महेश्वरं ।
गंधासवाक्षतैः पुष्पैः होमं कुर्यात्ततः परं ॥ १६ ॥ ० १९ ॥

पूजाकालं विना नैव सुरा पेया च साधकैः ।
आयुष्याद्धीयते दृष्ट्वा पीत्वा च पशुतां व्रजेत् ॥ २० ॥

सौत्रामण्यां कुलाचारे ब्राह्मणः प्रपिबेत्सुरां ।
अन्यत्र कामतः पीत्वा प्रायश्चित्ती भवेन्नरः ॥ २१ ॥

Then a story is told of *Śukra Bhārgava* having once uttered a curse against *Devī Vāruṇī*, the removal of which could only be effected by the *Sautrāmaṇī* and the *kulācāra*.

DR.RUPNATHJI( DR.RUPAK NATH )

सौत्रामण्यां कुलाचारे सुरां पीत्वा स्खलेन्मुहुः ॥ ३२ ॥
पतितस्य तु तस्यांगे लगंति यदि रेणवः ।
तावत्या रेणुसंख्यया देवीलोके महीयते ॥ ३३ ॥
पीत्वा पीत्वा पुनः पीत्वा यावत्पतति भूतले ।
उत्थाय च पुनः पीत्वा पुनर्जन्मो(!) न विद्यते ॥ ३४ ॥
पीत्वालिंग्य कुलाचारे प्रमदां यौवनोन्मतां(?°दां) ।
कोटिजन्मार्जितं पापं तत्क्षणादेव नाशयेत् ॥ ३५ ॥
पीत्वा पीत्वा जपित्वा च मुक्तः कोटिकुलैः सह ।
ब्रह्मलोके वसेद् देवि सत्यं सत्यं न संशयः ॥ ३६ ॥
तत्रैव व्याप्तमाप्नोति न पुनर्जायते भुवि ।
पीत्वा च पूजयित्वेशीमीशत्वं लभते ध्रुवं ॥ ३७ ॥ ° ३८ ॥
जायते साधकः श्रेष्ठो महाभोगी महासुखी ।
पीत्वा भोगान्भोजयित्वा सोऽहंहंसस्ततः परं ॥ ३९ ॥
स एव जायते वीरो जीवन्मुक्तो जगत्त्रये ।
चिरंजीवो जरामुक्तो विमुक्तः सर्वपातकैः ॥ ४० ॥ ° ४१ ॥
इति ते कथितं दिव्यं शुक्रशापविमोचनं ।
इति ते कथितं दिव्यं यथा पूज्या दिगंबरा ॥ ४२ ॥
पूजयित्वा महादेवि मुच्यते सर्वपातकैः ।
एवं देवीमर्चयित्वा किमसाध्यं जगत्त्रये ॥ ४३ ॥ ° ४५ ॥
आरभ्य शुक्लप्रतिपद्यावत्पंचदशी भवेत् ।
प्रत्यहं पूजयेद्यस्तु तिथिसंख्या दिगंबरीः ॥ ४६ ॥
मंत्रसिद्धिर्भवेत्तस्य सत्यं सत्यं न संशयः ।
वीरसाधनकर्माणि दुःखसाध्यानि केवलं ॥ ४७ ॥
सत्तमं साधनं ह्येतत्तव स्नेहात्प्रकाशितं ।
गोपनीयं प्रयत्नेन पुत्रेभ्योऽपि न दर्शयेत् ॥ ४८ ॥
इत्येवं कथितस्तुभ्यं पूजाविधिरनुत्तमः ।
साधनं सर्वथा चैव गोपयेन्मातृजारवत् ॥ ४९ ॥
इत्याचारसारतंत्रे तृतीयः पटलः ॥

*P.* IV. *Buddha*, having given directions to *Vasishṭha* regarding vessels and appliances required for worship, eulogizes the occult science, *e.g.*

सर्वेभ्यश्चोत्तमा वेदा वेदेभ्यो वैष्णवं परं ।
वैष्णवात्परमं शैवं शैवाद्दक्षिणमुत्तमं ॥ ३२ ॥
दक्षिणात्परमं वामं वामात्सिद्धांतमुत्तमं ।
सिद्धांतात्परमं कौलं कौलात्परतरं न हि ॥ ३३ ॥

*P.* V. sets forth the eightfold rule of conduct (*samayāshṭaka*); and relates how *Brahman*, being puzzled at seeing the *Munis*, in the *Dāruvana*, practising the enormities of the *kulācāra*, betakes himself to *Vaikuṇṭha* to consult *Vishṇu*, who then commends the sages' doings as conducive to eternal bliss.

*P.* VI. teaches the *rahasyam*, consisting in the *pañcatattva*, viz.: मद्यं मांसं तथा मत्स्यं मुद्रा मैथुनमेव च; the last of which is then further enlarged upon.

*P.* VII. The *Asura Vala* defeats the gods, and the *Munis* with *Indra* appeal for help to *Vishṇu*, who refers them to *Śiva*. The latter then teaches *Śakra* how to prepare the *Trailokyavijayā*, the elixir of victory. He first enumerates its 21 names, or rather descriptive epithets such as *siddhimūlikā*, *jñānasaṃvid*, *yogadā*, *yogamārgapradarśinī*, *brahmasambhūtā*, *vijayapradā*. Then the recipe:

श्वेतरक्तपीतकृष्णपुष्पभेदाश्चतुर्विधाः ।
श्वेतपुष्पा ब्राह्मणी च क्षत्रिया रक्तपुष्पिका ॥ ३४ ॥
पीतपुष्पा तु वैश्या स्याच्छूद्रा तु कृष्णपुष्पिका ।
आहृत्य पत्राण्येतासां विजानीयात्प्रयत्नतः ॥ ३५ ॥
मार्जितानि घृतैरेव चूर्णितानि शिलातले ।
त्रिकटु त्रिफला शृंगी कुष्ठ धान्याकसंभवा ॥ ३६ ॥
शटी ताली सपत्रं च षट्फलं नागकेसरं ।
यवानीद्वयमेषीरकद्वयमेव च(!) ॥ ३७ ॥
एतानि समभागानि पुष्करौद्राणि(!) चूर्णयेत ।
गृहीत्वा चूर्णमेतत्तु संविच्चूर्णं तु तत्समं ॥ ३८ ॥
उभयोस्तु समं दत्त्वा सिता(?) तन्मिश्रयेद्दृढं ।
मिश्रयित्वा चतुर्थांशसमं मधु घृतं तथा ॥ ३९ ॥
पुनः शिलातले पिष्टा त्रिसगंधौ(!) प्रवर्तयेत् ।
स्वर्णपात्रे [तु] पुरतः स्थापयित्वा ततः क्रमात् ॥ ४० ॥
चतुर्भिर्मनुभिस्तस्याः शोधनं समुपाचरेत् ।
निवेश्य तत्र पाण्यग्रं यथामंत्रं विशोधयेत् ॥ ४१ ॥
संविदे ब्रह्मसंभूते ब्रह्मपुत्रि सदानघे ।
भैरवाणां च दत्त्वा त्वं पवित्रा भव सर्वदा ॥ ४२ ॥

DR.RUPNATHJI( DR.RUPAK NATH )

It ends:

एतत्ते कथितं सर्वं विजयाकल्पमुत्तमं ।
प्रसादादचिरादन्यं(!) वांछितं ते भविष्यति ॥ ७७ ॥

इत्युक्तः स मया शक्रो निभवानंदमार्दवैः(?वि° or निर्भरा°)।
भक्त्या परमया युक्तस्तत्कर्तुमुपचक्रमे ॥ ७८ ॥

संवत्सरं प्रतिदिनं प्रयतस्त्रिकालं
  शक्रो निषेव्य समया विधिना वशिष्ठं ।
जित्वा वलासुरमभू[द्] दशदेवराजः
  संप्राप्य विघ्नशमनस्य सलब्धकामः(!) ॥ ७९ ॥

एतद्रहस्यगदितं परमं निगूढं
  कुत्रापि नैव कमनीयमिदं कदाचित् ।
उत्कंठया तव मया ननु पूर्ववृत्तं
  दवे(!) त्वयापि विधिना प्रविधीयतां तत् ॥ ८० ॥

इति चीनाचारसारतंत्रे ह[र]गौरीसंविदासंमतिर्नाम सप्तमः पटलः पूर्णमस्तु ॥

See Rāj. Mitra, Notices, i., p. 268, where an *Ācārasāratantra* in 7 *paṭalas* is described, the MS. being, however, defective at the beginning, and concluding with a *mandākrāntā* verse (वामे वामा रमणकुशला दक्षिणे चारुपात्रं °) not contained in the present MS.

[H. T. COLEBROOKE.]

## 2564.

**323.** Foll. 79; size 12 in. by 4 in.; modern Bengalī writing, by three different hands; seven lines in a page.

*Durgābhaktitaraṅgiṇī*, or *Durgotsavapaddhati*, a manual of the worship of *Durgā*, composed, by *Vidyāpati*, under the auspices of *Bhairavasiṃha*, brother(?) of *Vīrasiṃha*, king of Mithilā.

It begins (with the numbers supplied):

अभिवाञ्छितसिद्ध्यर्थं वन्दितो यः सुरैरपि ।
सर्वविघ्नभिदे तस्मै गणाधिपतये नमः ॥ १ ॥

भक्त्या नम्रसुरेन्द्रमौलिमुकुटप्राग्भारतारस्फुरन्-
  माणिक्यद्युतिपुञ्जरञ्जितपदद्वन्द्वारविन्दश्रियः ।
देव्यास्तत्क्षणदैत्यदर्पदलना सम्वित(?सञ्चित्-)प्रकृष्टामर-
  स्वाराज्यप्रतिभूतधिष्णुकरणा(?r. विष्णुकरुणा)गम्भी-
  [रदृक् पातु नः ॥ २ ॥

स्वस्ति श्रीनरसिंहदेवमिथिलाभूमण्डलाखण्डलो
  भूभृन्मौलिकिरीटरत्ननिकरप्रत्यर्चिताङ्घ्रिद्वयः
आपूर्वापरदक्षिणोत्तरगिरिप्राप्तार्थिवाञ्छाधिक-
  स्वर्णक्षौणिमणिप्रदानविजितश्रीकर्णकल्पद्रुमः ॥ ३ ॥

विश्वख्याततनयस्तदीयतनयः प्रौढप्रतापोदयः
  संग्रामाङ्गनलब्ध[वैरि]विजयः कीर्त्याप्तलोकत्रयः ।
मर्यादानिलयः [प्र]कामविनयः प्रज्ञा[प्र]कर्षाश्रयः
  श्रीमद्भूपतिधीरसिंहविजयी राजत्यनोपक्रियः ॥ ४ ॥

शौर्यावर्जितपञ्चगौडधरणीनाथोपनम्रीकृता-
  [ऽने]कोत्तुङ्गतरङ्गसङ्गभ(?त)सितच्छत्राभिरामोदयः ।
श्रीमद्भैरवसिंहदेवनृपतिर्यस्यात्म(?r. नु)जन्मा जय-
  त्याचन्द्रार्कमखण्डकीर्तिसहितः श्रीरूपनारायणः ॥ ५ ॥

[देवीभक्तिपरायणः श्रुतिमुखप्रारब्धपारायणः
  संग्रामे रिपुराजकंसदलनप्रत्यक्षनारायणः* ।]
विद्वद्भ्यो हितकाम्यया नृपवरो ऽनुज्ञाप्य विद्यापतिं
  श्रीदुर्गोत्सवपद्धतिं स तनुते दृष्ट्वा निवन्धस्थितिं ॥ ६ ॥

तत्रादौ देवीगृहनिर्माणं। रत्नाकरादिनिवन्धेषु देवीपुराणे।°

The work consists of two chapters (*taraṅga*), the first of which (ending fol. 32*a*) treats of the worship of the goddess generally, and the rites prescribed on different days, whilst the second treats of the *Durgotsava*.

It is largely compiled from *Purāṇas* (esp. the *Devī*, *Kālikā* and *Bhavishya*). Of other authorities may be mentioned: *Gauḍanibandha* (ज्येष्ठानक्षत्रयुक्तायां षष्ठ्यां विल्वाभिमन्त्रणं। सप्तम्यां मूलपूजायां पत्रिकायां प्रवेशनं ॥ °), foll. 12*a*, 16*b*; *Durgotsavādhikāre Bhojarājaḥ* (उमाया नवमी प्रोक्ता हरिस्यतितिथिस्मेष्टमीद्वयोरैक्ये(!) महापुण्या उमा माहेश्वरी तिथिः ॥) fol. 13*a*; *Laghuvyāsa* (वेदाभ्यासादवाप्नोति पुरुषार्थचतुष्टयं। °), fol. 14*b*; *Śāradātilaka*, fol. 36*a*; *Śilpaśāstra* (नवपद्मात्मके स्थाने पूज्या दुर्गा सुमूर्तितः। °) fol. 18*b*; *Śivarahasya*, fol. 38*a*, *b*, etc.

---

* This hemistich, omitted by the MS., is supplied from the text given by Mr. G. A. Grierson, Ind. Ant. xiv., p. 192; and from Rāj. Mitra, Notices, v., p. 192, where, however, our *ślokas* 4 and 5 are omitted.

DR.RUPNATHJI( DR.RUPAK NATH )

It ends:

सरितः सागराः शैलास्तीर्थानि जलदा नदाः ।
एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ॥

इति श्रीदुर्गाभक्तितरङ्गिण्यां द्वितीयप्रयोगतरङ्गः ॥

कारुण्यैकवशंवदा प्रणमतो वाला निरश्रायते
भीतिभ्यो घनपङ्कलिप्तवपुषः प्रक्षालयत्यस्तिका
संसारे स्खलतः समुद्धरति या मोहान्धकारश्चेत(?० राच्च
[तान्)
साव्याद्वः शरणागतार्थिशमनी देवी जगत्पाविनी ॥

भूपश्रीभवसिंहवंश[? तिलकः] श्रीदर्पनारायण[:]
स्नात्वा(?) नन्द[न]नन्दनक्षितिपतिश्रीवीर(*r.* धीर)-
[सिंहः कृती ।
शक्रश्री(:)सहभूरूपेन्द्रमहिमश्रीभैरवक्ष्माभुजो
दुर्गाभक्तितरङ्गिणी कृतिरियं तस्यास्तु सत्प्रीतये ॥

मर्यादाम्बुनिधिः ◡ – ◡◡◡ – प्रौढप्रतापावधिः
सद्यः सङ्गरसङ्गरङ्गविजयश्रीलब्धदोःसन्निधिः ।
यस्य क्षीरसमुद्रमुद्रयशसो रामस्य सौमित्रिवत्
क्षौणीमण्डलमण्डनो विजयते श्रीचन्द्रसिंहो ऽनुजः ॥०

According to the genealogical indications given by the author himself, in several of his works, as well as to the records of the *Maithila* genealogists — cf. J. Beames, Ind. Ant., iv., p. 299 seq.; G. A. Grierson, Maithili Chrestomathy (extra number to Journ. As. Soc. Beng. 1882); and in Ind. Ant., xiv., p. 182 seq.— *Vidyāpati*, the popular poet of Mithilā or Northern Behar, flourished in the 15th century. The whole line of Mithilā kings and queens (during the reigns of several of whom the poet composed his works), is given by the native records as follows:

[I. *Rājā Paṇḍita Kāmeśvara Thākur*,–his son

II. *Bhogeśvara Thākur*,–his brother]

III. *Bhava Siṃha* (*Bhaveśvara*) succeeded in 1348 A.D.;–his son

IV. *Deva Siṃha*, succ. 1385;–his son

V. *Śiva Siṃha* (*Rūpa Nārāyaṇa*), succ. 1446; –his queen

VI. *Lakhimā Devī*, succ. 1449;–

VII. *Viśvāsa Devī*, succ. 1458;–

VIII. *Nara Siṃha* (*Darpa Nārāyaṇa*), succ. 1470;–his son

IX. *Dhīra Siṃha* (*Hṛidaya Nārāyaṇa*), succ. 1471;–his brother(?)

X. *Bhairava Siṃha* (*Hari Nārāyaṇa*), succ. 1506;–his son

XI. *Rāma Bhadra* (*Rūpa Nārāyaṇa*), succ. 1520;–his son

XII. *Kaṃsa Nārāyaṇa* (*Lakshmīnātha*), succ. 1532.

Under *Śiva Siṃha* (V.) the author wrote his *Purushaparīkshā*, in the final verses of which (Raj. Mitra, v., p. 245) he states that the king's father, *Deva Siṃha*, had a lake made at *Sankurī*, and that his grandfather, *Bhava Siṃha*, was burnt on the *Vāgvatī* along with two wives. Under *Viśvāsa Devī* the author composed his *Gaṅgāvākyāvalī* (Oxf., no. 708; R. M., iii., p. 235), and his *Śaivasarvasvasāra* (R. M., vi., p. 2). From the introduction to the latter work it clearly appears that *Viśvāsa Devī* was the wife of *Padma Siṃha*, younger brother of *Śiva Siṃha*, whilst the Maithila records (if rightly read) would seem to make her the first of the six wives of *Śiva Siṃha*. We may then assume that *Śiva Siṃha*, having died without issue, was succeeded by his queen *Lakhimā Devī*, and the latter by *Viśvāsa Devī*, the wife of the king's (deceased) brother. This branch of the line having become extinct with *Śiva Siṃha* (and *Padma Siṃha*), the throne now fell to their cousin (VIII.) *Nara Siṃha* (*Darpa Nārāyaṇa*), eldest son of *Hari Siṃha* (or *Hara Siṃha*), younger brother of (IV.) *Deva Siṃha*. Under *Nara Siṃha* (or *Darpa Nārāyaṇa*, as he is only called in the introductory verses), *Vidyāpati* wrote his *Vibhāgasāra* (R. M., vi.,



DR.RUPNATHJI( DR.RUPAK NATH )

p. 67), whilst for his queen, *Dhīramati* (also called *Dhīrā* or *Hīrā*, Oxf. Cat., no. 718), he composed the *Dānavākyāvalī* (R. M., v., p. 137; Bhandarkar, Rep., p. 352). This king was succeeded by his eldest son (IX.) *Dhīra Siṃha* (*Hṛidaya Nārāyaṇa*), and he by his brother (X.) *Bhairava Siṃha* (*Hari Nārāyaṇa*), for whom (possibly still in the reign of the elder brother) *Vidyāpati* composed the work now under notice. In the last of the final verses the author also mentions a younger brother of the two kings, called *Candra Siṃha*, whom, together with a fourth brother, the genealogical chart published by Mr. Grierson (Ind. Ant., xiv., p. 196) makes the son of *Nara Siṃha* by a second wife. This *Candra Siṃha* would seem to be the Maithila prince under the auspices of whose wife, *Lakhimā Devī*, *Miśarūmiśra's Vivādacandra* (Oxf. Cat., no. 718) was composed. This king's grandfather *Harasiṃha*, accordingly was entirely different from the *Harasiṃha* (or *Hari Siṃha*) *Deva* who, residing at Simrāon (Samaragrāma), was conquered, in 1322, by *Tughlak Shāh*, and, in 1324, founded a new dynasty in Nepal (S. Cat., no. 1390).

The jurist *Vācaspatimiśra* wrote his *Cintāmaṇi* under the patronage of *Harinārāyaṇa* of Mithilā, and his *Dvaitanirṇaya* under the auspices of *Jayā*,* queen of *Bhairava* (cp. Prof. Jolly, Zeitsch. d. D. M. G., xlvi., p. 274), and his *Śrāddhakalpa* (Cat. no. 1700) under *Rāmabhadra Rūpanārāyaṇa*. As *Bhairavasiṃha Harinārāyaṇa* did not come to the throne till 1506 A.D., *Vācaspatimiśra's* date has to be put more than a hundred years later than has hitherto been assumed.

Whether the author of the present work and those mentioned above is really identical with the popular poet *Vidyāpati* (or *Bidyāpati*) seems to me far from certain. Mr. Grierson (I. A., xiv., p. 190) has published the text and translation of a copper-plate grant, dated Saṃv. 1455, Śaka 1321, Lakshm.-Saṃv. 283 (A.D. 1399), said to be in the possession of the poet's descendants, by which "the great *Paṇḍit Śrī-Vidyāpati Thakkura*, glorious as a new *Jayadeva*," is presented by king *Śiva Siṃha* with the village of Bisapī (the modern Bishpī). But, even supposing that *Śiva Siṃha* might have been appointed *yuvarāja* by his father more than 46 years before his father's death, it seems strange that there should be no Sanskrit works of the poet prior to the *Purushaparīkshā*; and Mr. Beames's suggestion, that there were probably two different writers of the name, seems to me to deserve serious attention. It is also desirable that the grant referred to should be carefully examined.

सुधासारेण सिंचन्तीं कंठनीलं सदाशिवम् ।
नवीनजलदश्यामां विघ्नेशजननीं नुमः ॥ १ ॥
नमामि ज्वालपां देवीं कालपाशनिकृंतनीं ।
ब्रह्मेशविष्णुनमितां क्षिप्रसिद्धिप्रदायिनीं ॥ २ ॥
गुरुं च हृदयानन्दं सर्वशास्त्रविशारदं ।
शिवरूपं नतो नित्यं मंत्राज्ञां विदधातु नः ॥ ३ ॥
जयचंद्रनरेंद्रस्य त्रिगर्तेशस्य चाज्ञया ।
विदुषां साधकानां च प्रीतये वनमालिना ॥ ४ ॥
सिद्धिप्रदः सदा तेषां पशूनां च विषप्रदः(!) ।
श्रीरहस्यार्णवो ग्रंथस्तन्यते सरसो मया ॥ ५ ॥
सप्रमाणं सतर्कं च विदुषां वचनादपि ।
भावचूडामणिं ज्ञात्वा तंत्रचूडामणिं तथा ॥ ६ ॥
कुलचूडामणिं चैव ज्ञानार्णवं च भैरवीं ।
कुलार्णवं वीरतंत्रं समयाचारमुत्तमं ॥ ७ ॥
गांधर्वमत्स्यसूक्तं च नीलतंत्रं ततः परं ।
एकवीरां समालोक्य तत्त्वार्णवं च भैरवं ॥ ८ ॥
अन्येषां च मतं ज्ञात्वा साधकानां हिताय च ।
गुरुक्रमविधानं च भावश्च त्रिविधस्तथा ॥ ९ ॥
कुमारीपूजनं चैव कुलाचारस्ततः परं ।
पीठपूजाविधिश्चैव निशीथसाधनं ततः ॥ १० ॥
पाण्डवैः पूजनं चैव द्रौपदीसंस्कृतिस्ततः ।
पुरश्चर्याक्रमश्चैव वलिदानविधिस्ततः ॥ ११ ॥
रहस्यातिरहस्यं च साधनं सर्वसिद्धिदं ।
विभूतिधारणं चैव अंतर्यागविधिस्तथा ॥ १२ ॥
योगश्चैव यथान्यायं ग्रंथे ऽस्मिंतन्यते मया ।
एनं विज्ञाय यो मर्त्यः कुरुते साधनं सदा ॥ १३ ॥

DR.RUPNATHJI(DR.RUPAK NATH)

शंकरस्य प्रतिज्ञैषा तस्य सिद्धिः करे स्थिता ।
ततो गुरुक्रमं वक्ष्ये यथावदनुपूर्वशः ॥ १४ ॥

तदुक्तं भावचूडामणौ । ०

1. *Gurunirṇaya*, fol. 4*b*; 2. *bhāvanirṇaya*, fol. 8*a*; 3. *kumārikākalpa*, fol. 9*b*; 4. *samayācāra*, fol. 10*a*; 5. *pīṭhapūjā*, fol. 10*b*; 6. *niśīthapūjāpaddhati*, fol. 11*a*; 7. *pāṇḍavamahāpūjāpaddhati*, fol. 22*a*; 8. *draupadīsaṃskṛiti*, fol. 23*b*; 9. *chinnādipaṭala*, fol. 28*b*; 10. *puraścaryākrama*, fol. 35*a*; 11. *balidānavidhi*, fol. 36*b*; 12. *vibhūtidhāraṇavidhi*, fol. 37*b*; 13. *antaryāgavidhi*, fol. 39*a*; 14. *yogavaraṇam*, fol. 39*b*; 15. *rahasyoktadravyaśodhanavidhānam*; ends:

अनंतरं श्रीपात्रं गृहीत्वा शांतिपठनं । तर्पणं च तत्त्वेन ईशस्वरूपमात्मानं स्वकुर्यात् (!) ॥ हरिमीडे ॥ ०

इति श्रीवनमाल्याचार्यश्रीरहस्योक्तद्रव्यशोधनविधानं पंचदशः पटलः ॥ This colophon has caused the alternative title of *Dravyaśodhana* being wrongly ascribed to the whole work.

The colophons usually run thus: इति श्रीवनमाल्याचार्यसंगृहीते रहस्यार्णवे ०

[H. T. Colebrooke.]

## 2592.

**581d.** Foll. 50; size 12¼ in. by 4½ in.; fairly written in Devanāgarī, by several hands, in 1800 A.D.; eleven lines in a page.

The same work. Both MSS. seem to have been transcribed from the same original.

[H. T. Colebrooke.]

## 2593, 2594.

**705, 706.** Foll. 1–150, 151–293; size 16¼ in. by 4¼ in.; clear Bengalī handwriting of about 1700 A.D.; nine lines in a page.

*Śivarahasya*, an extensive work on *Śiva*-worship. The complete work consists of 12 parts (*aṃśa*), only one of which, the seventh, is contained in these volumes.

It begins: ऋषय ऊचुः ।

सूत वेदार्थतत्त्वज्ञ शिवध्यानपरायण ।
मुक्त्युपायं वदास्मभ्यं कृपालो मुनिसत्तम ॥

कः सेव्यः सर्वदेवेषु को वा जप्यो मनुः सदा ।
स्यातव्यं कुत्र वा नित्यं किं वा सर्वार्थसाधकं ॥

सूत उवाच ।

धन्यान्मन्यामहे नूनमनन्यशरणान्मुनीन् ।
वनाशिनो वनावासाव्यस्तमन्यूनकल्मषान् ॥

भवद्भिः सर्ववेदार्थतत्त्वज्ञानमकल्मषैः ।
परात्परतरः शर्वः सर्वदा पूज्यते धिया ॥

भवद्भिः सर्ववेदार्थो ज्ञात एवास्ति यद्यपि ।
तथापि किंचिद्वक्ष्यामि यथा ज्ञातं मया तथा ॥

पुरा कैलासशिखरे सुखासीनं जगत्प्रभुं ।
वेदान्तवेद्यमीशानं शङ्करं लोकशङ्करं ॥

विश्वतश्चक्षुषं देवं विश्वतोमुखमव्ययं ।
विश्वतोबाहुमाराध्यं विश्वतःपादमीश्वरं ॥

निष्कलं निर्गुणं शान्तं निरवद्यमनामयं ।
निष्प्रपञ्चं निराकारं निर्मलं निरुपाधिकं ॥

शर्वं प्रसन्नवदनं सर्वाभरणभूषितं ।
गौरीभूषितवामाङ्गं ब्रह्मविष्ण्वादिसेवितं ॥

अप्रमेयजगज्जन्मस्थितिसंहारकारणं ।
सोमसूर्याग्निनयनं सोमार्धकृतशेखरं ॥

बिल्वचन्दनलिप्ताङ्गं नरबिल्वदलार्चितं ।
व्याघ्रचर्मपरीधानमनन्तेन्दुरविप्रभं ॥

नानामणिगणाकीर्णं किरीटकटकावृतं ।
दयासुधार्द्रनयनं वरदा(*r.* दो)भयपाणिनं ॥

निजमंतोपपूर्णाङ्गमुमालिङ्गितविग्रहं ।
विलोक्यातीव संतुष्टः षण्मुखः साम्बमीश्वरं ॥

मत्वा कृतार्थमात्मानं प्रणिपत्य सदाशिवं ।
पप्रच्छ सर्वलोकानां मुक्त्युपायं कृताञ्जलिः ॥

विश्वेश्वर महादेव विष्णुब्रह्मादिवन्दित ।
देवानां मानवानां च किं मोक्षस्यास्ति साधनं ॥

तव नामान्यनन्तानि सन्ति यद्यपि शङ्कर ।
तथापि तानि भव्यानि न ज्ञायन्ते मयाधुना ॥

प्रियाणि शिवनामानि सर्वाणि शिव यद्यपि ।
तथापि कानि रम्याणि तेषु प्रियतमानि ते ॥



DR.RUPNATHJI( DR.RUPAK NATH )

तानि सर्वार्थदान्यद्य कृपया वक्तुमर्हसि ।
यन्नामस्मरणादेव सद्यो मुच्यते पातकैः ॥

रसनारससारज्ञा त्वन्नामामृतपायिनी ।
यस्यास्ति स पुमान्धन्यो मान्यो ह्यमनुजैरपि ॥

जन्मान्तरसहस्रेषु तप्तं यदि तपस्तदा ।
त्वन्नामस्मरणायत्तं चित्तं जन्तोः प्रजायते ॥

महेशनामामृतदिव्यधारापरिप्लुताङ्गोदरमध्यगोऽपि ।
न शोकमाप्नोति नरो यतो हंसरक्षितो वह्निगतः शिवेन ॥

यतो विभूतिकवचाः शिवनामास्त्रपाणयः ।
चत्वारो ह्यसुरानीकैश्चक्रुर्युद्धं पुरा मुदा ॥

ब्रह्महत्यासहस्राणि सम्यक्कृत्वापि पुक्कसः ।
शिवेति नाम विमलं श्रुत्वा मोक्षं गतः पुरा ॥

ये ते ऽपि प्रमथाः शुद्धाः शिवनामामृताशनाः ।
इन्द्राद्यर्चितपादाब्जा वसन्ति शिवसन्निधौ ॥

शिवनामैव संसारमहारोगौघशामकं ।
नान्यत्संसाररोगस्य शामकं दृश्यते मया ॥

शिव शङ्कर विश्वेश महादेवेति यन्मया ।
पूर्वमुच्चरितं युद्धे जयस्तेनाभवन्मया ॥

शङ्करेश महेशेति नाम दिव्यं महावने ।
पुरा श्रुतं पिशाचेन ततस्तस्मात्स मोचितः ॥

समस्तवेदवेदान्तसारभूतं शिवप्रदं ।
शिवनामामृतं दिव्यं पेयं सर्वार्थसाधकं ॥

ये संततं शङ्करमादरेण मनःसरोजासनसंनिविष्टाः ।
ध्यायन्ति शम्भुं स्मरणानुषक्तास्त एव धन्याः शिवसंमताश्च ॥

शिवनामामृतापुष्टरसनाः शिवपूजकाः ।
शिवध्यानरता नित्यं सन्ति धन्याः क्वचित्क्वचित् ॥

इत्युक्त्वा वेपमानाङ्गः प्रणिपत्य पुनः शिवं ।
कुमारः पार्श्वतस्तस्थौ नतमूर्धा कृताञ्जलिः ॥

सूत उवाच ।

कुमारेणोदितां वाचं सर्वलोकहितावहां ।
श्रुत्वा प्रसन्नवदनस्तमुवाच सदाशिवः ॥

शिव उवाच ।

साधु साधु कुमाराद्य सम्यक् पृष्टं त्वयाधुना ।
यदिदानीं त्वया पृष्टं तद्वक्ष्ये शृणु सादरं ॥

एवमेव पुरा गौर्या पृष्टः काश्यामहं सदा ।
समाख्यातं मया सम्यक् सर्वेषां मोक्षसाधनं ॥

दिव्यान्यनन्तनामानि सन्ति तन्मध्यगं परं ।
अष्टोत्तरसहस्रं तु नाम्नां प्रियतरं मम ॥

एकैकमेव तन्मध्ये नाम सर्वार्थसाधकं ।
मयापि नाम्नां सर्वेषां फलं वक्तुं न शक्यते ॥

तिलाक्षतैर्बिल्वपत्रैः कमलैः कोमलैर्नवैः ।
पूजयिष्यति मां भक्त्या यस्त्वेतन्नामसंख्यया ॥

स पापेभ्यः संसृतेश्च मुच्यते नात्र संशयः ।
ततो ममान्तिकं याति पुनरावृत्तिदुर्लभं ॥ °

The *saptamāṃśa*, according to a MS. in Rāj. Mitra's Notices, i., p. 123, consists of 29 *adhyāyas*. The present MS., however, terminates abruptly in the 25th *adhyāya*; and the colophon of some of the others also is wanting.

I. इति श्रीशिवरहस्ये सप्तमांशे स्कन्दसदाशिवसंवादे मुख्यशिवसहस्रनामकथनं नाम प्रथमोऽध्यायः ॥ fol. 10*b*.

II. beg.: ऋषय ऊचुः ।

त्वत्प्रसादाद्वयं सूत निष्पापाः स्मो न संशयः ।
धन्याः कृतास्त्वया नूनं सत्कथाश्रवणाद्वयं ॥

Col.: इति° शिवगौरीसंवादे काशीमाहात्म्ये काशीप्रशंसा नाम द्वितीयो ऽध्यायः ॥ fol. 14*a*.

III. beg.: पार्वत्युवाच ।

देवोत्तमाखिलाराध्य विश्वेश शिव विश्वग ।
श्रुता पुण्यकथा रम्या त्वत्प्रसादान्मनोहरा ॥

त्वन्मुखाम्भोजविलसत्कथापुष्परसं पुनः ।
मच्चेतश्चञ्चरीको ऽयं पातुमिच्छति शङ्कर ॥

Col.: इति° शिवगौरीसंवादे काशीमाहात्म्ये तृतीयो ऽध्यायः ॥ fol. 18*b*.

IV. beg.: श्रीशिव उवाच ।

कथामन्यां प्रवक्ष्ये ऽहं शृणु सादरमम्बिके ।
यत्कथाश्रवणादेव सद्यो मुच्येत पातकैः ॥

शिवस्थानान्यनेकानि सन्ति काश्यां वरानने ।
तेषां संख्या मया सम्यक्कर्तुमेव न शक्यते ॥

Col.: इति° शिवगौरीसंवादे काशीमाहात्म्ये चतुर्थो ऽध्यायः ॥ fol. 23*a*.

V. beg.: श्रीपार्वत्युवाच ।

महेशाखिलदेवेश काशीवासरतैर्नरैः ।
प्रत्यहं नियतं काश्यां किं कर्तव्यं वद प्रभो ॥

Col.: इति° काशीमाहात्म्ये काशीवासनियमविधिकथनं° fol. 29*a*.

DR.RUPNATHJI( DR.RUPAK NATH )

VI. beg.: पार्वत्युवाच ।

शिव कल्याणद श्रीमन्सर्वज्ञामितविक्रम ।

ज्ञानवापीति संज्ञेयमस्याः कथमभूद्वद ॥

Col.: इति ° शिवगौरीसंवादे काशीज्ञानवापीप्रशंसा ° fol. 33*b*.

VII. beg.: पार्वत्युवाच ।

विश्वेश्वराखिलाराध्य सर्वज्ञ करुणानिधे ।

श्रु मुक्तिमण्डपस्यानं तत्प्रमाणं कियन्मतं ॥

Col.: इति ° काशीमाहात्म्ये मुक्तिमण्डपाख्यानं ° fol. 37*a*.

VIII. beg.: पार्वत्युवाच ।

शिवानन्दमयानन्त ज्ञानवापीतटे शुभे ।

केन पुण्यप्रभावेन दण्डपाणिः स्थिरं स्थितः ॥

Col.: इति ° काशीमाहात्म्ये दण्डपाणीतिहासकथनं ° fol. 40*a*.

IX. beg.: शिव उवाच ।

कथामन्यां प्रवक्ष्ये ऽहं श्रोत्रानन्दकरीं परां ।

शृणु यत्नेन विमलामम्बिके पापहारिणीं ॥

पुरा कश्चिद् द्विजाधीशः पूर्वजन्मतपोबलात् ।

काशीं संप्राप्य मामर्च्यमभ्यर्च्य विधिपूर्वकं ॥

उपित्वैकदिनं दीनः क्षुधार्त्तो ऽस्तङ्गते रवौ ।

वीरेश्वरालये रम्ये निद्रां कर्तुं समाययौ ॥

Col.: इति ° वीरेश्वरेतिहासकथनं ° fol. 43*b*.

X. beg.: शिव उवाच ।

अन्यामपूर्वामनघां कथां वक्ष्ये शुभप्रदां ।

यत्कथाश्रवणात्सद्यो मुच्यते सर्वबन्धनात् ॥

काश्यां पशुपतीशस्य स्थानमस्त्युत्तमं शुभे ।

नित्यं संनिहितस्तत्र निवसाम्यहमादरात् ॥

महापाशुपतैरत्र वसतिः क्रियते सदा ।

शैवशास्त्रप्रणेतारः सन्ति तत्रैव कोटिशः ॥

Col.: इति ° काशीमाहात्म्ये पशुपतीश्वरेतिहासकथनं ° fol. 63*b*.

XI. beg.: शिव उवाच ।

ओंकारं नाम विमलं क्षेत्रं काश्यां वरानने ।

सर्वपापक्षयकरं तिष्ठत्येकं शुभप्रदं ॥

(?ends fol. 69*b*).

XII. col.: इति ° काशीमाहात्म्ये शिवगौरीसंवादे द्वादशो ऽध्यायः fol. 99*a*. (At fol. 81*a* *Vishṇu* is introduced worshipping *Śiva*).

XIII. beg.: ऋषय ऊचुः ।

सूत वेदार्थतत्त्वज्ञ काशीतत्त्वं यथार्थतः ।

यथा ज्ञातं तथैवोक्तं त्वयाम्मभ्यं प्रयत्नतः ॥

वयं प्रणीताः सर्वे ऽपि त्वत्प्रसादान्मुनीश्वराः ।

तत्त्वावबोधाद्यः कृतस्त्वयाम्मासु कृपानिधे ॥

Colophon of XIII. and XIV. wanting; XV. ends fol. 109*a*.

XVI. beg.: पार्वत्युवाच ।

वैष्णवं धाम संप्राप्य किमुक्तं ब्रह्मणा विभो ।

तदा जनार्दनेनापि किमुक्तं तद्वदस्व मे ॥

श्रीमहादेव उवाच ।

शिवे विष्णुः समालोक्य ब्रह्मादीनमरांस्तदा ।

पप्रच्छ स्वागतं तेषां वर्धयन्मुदमादरात् ॥

XVII. (beg.?) ends fol. 131*b*.

XVIII. beg.: शिव उवाच ।

शृणु देवि कथामन्यामतिसंतोषदायिनं ।

यत्कथाश्रवणादेव हृष्टचित्ता भविष्यसि ॥

पुरासर्गे शचीनाथं दृष्ट्वा गुरुरतिप्रियं ।

उवाच वचनं वाग्मी सस्मितं प्रीतिपूर्वकं ॥

भूलोकतीर्थसेवार्थं मया गतमनेकधा ।

दृष्टानि शिवतीर्थानि वेदोक्तान्येव सादरं ॥

XIX. beg. fol. 154*a*: श्रीमहाशिव उवाच ।

शिवे दक्षिणकैलासो विलासस्याश्रयो मम ।

स यथोत्तरकैलासस्तथैव सुखदः सदा ॥

Col.: इति ° शिवगौरीसंवादे दक्षिणकैलासवर्णनं ° fol. 169*a*.

XX. beg.: श्रीमहाशिव उवाच ।

देवि काञ्ची पुरी काचिद्यत्र वेगवती नदी ।

तत्र वासमपेक्षन्ते नित्यं ब्रह्मादयः सुराः ॥

XXI. beg. fol. 185*a*: श्रीशिव उवाच ।

शिवे सुक्षेत्रमस्त्येकमरुणाचलनामकं ।

अरुणाचलनाथस्य स्मरणं मङ्गलावहं ॥

XXII. beg. fol. 197*b*: पार्वत्युवाच ।

किं चकार स भूपालः करुणाकर शङ्कर ।

तत्सर्वं वद सर्वज्ञ विस्तरेण विशेषतः ॥

सदाशिव ।

शिवपूजारतं दृष्ट्वा स भूपालो सदर्चकः ।

अभ्युत्थायातियत्नेन कुर्वन्नेव स्थितो ऽर्चनं ॥

DR.RUPNATHJI( DR.RUPAK NATH )

XXIII. beg. fol. 216*b*: शिव उवाच ।

शिवे वृद्धाचलं नाम क्षेत्रमस्ति महात्मकं ।
तस्य स्मरणमात्रेण मुच्यते पापकोटिभिः ॥

Col.: इति ° वृद्धाचलमहिमानुवर्णनं °

XXIV. beg. fol. 248*b*: शिव उवाच ।

चिदम्बराभिधं क्षेत्रं शिवक्षेत्रमनुत्तमं ।
तदप्येकं मम स्थानं मम प्रियकरं शिवे ॥

Col.: इति श्रीशिवरहस्ये सप्तमांशे शिवगौरीसंवादो नाम चतुर्विंशो ऽध्यायः ॥

XXV. beg. fol. 189*a*: श्रीशिव उवाच ।

पश्य तां नृत्यमानंदं(!) सुराणां शोभने ततः ।
क्षणमात्रमभूद्रात्रिरहणो ऽप्युदितस्ततः ॥

The MS. ends (in the middle of the page): ब्रह्मोवाच ।

इत्युक्तं तद्वचः श्रुत्वा केशवः सत्वरं तदा ।
शङ्करं पूजयामास भ –

On the different sections of the complete work see Burnell, Tanjore MSS., p. 206.

[H. T. COLEBROOKE.]

## 2595.

**2798b.** Foll. 26; size 10¼ in. by 6¾ in. (European fashion); careless, modern Devanāgarī writing; 26–28 lines in a page.

*Prayogaratnākara*, or *Bhaktavrātasantoshaka* (?), a treatise on *Tantric* worship, by *Premanidhi*, son of *Umāpati*. Apparently incomplete. Very incorrect.

It begins (somewhat corrected): श्रीकांतवीर्यार्जुनाय नमः ॥

ईदृशमानुषमानसमपि मतियुक्तं विधातुमीष्टे यः ।
वंदे वंदे वंदे चरणावमुष्य तु कस्यापि ॥ १ ॥

अहो तंत्ररत्नाकरात्संप्रसूते (*r.* ° ता)
तरंगिण्यसावङ्कितीया [◡ – ◡ ? मदीया] ।
प्रयोगात्मरत्नाकरं नात्र चित्रं
हरेः सत्कृपाया असाध्यं किमस्ति ॥ २ ॥

श्रीकांतवीर्यसदुपासनया यदा ते
लब्धिः स्पृहाखिलमनोरथसंचयानां ।
रत्नाकरं भज तदामुमनर्घ्यं बुद्धे[:]
सिद्ध्यंतरं मम वदिष्यसि सत्यवाक च ॥ ३ ॥

कवचोपयोगि सर्वं नित्यं नैमित्तिकं काम्यं ।
अस्मात् प्रयोगरत्नाकरतो ज्ञानं तु सुस्पष्टं ॥ ४॥ ° ६ ॥

तत्वात्तत्वा[त्] राजराजेशभक्तान्
भूयो भूयः प्रांजलिः प्रार्थयामि ।
अत्रास्ते यत्प्राच्यवाचो विरुद्धं
तत्क्षंतव्यं युक्तितुष्टा हि संतः ॥ ७ ॥

यामिन्याश्चरमप्रहरस्योत्तरार्धे नारायणं श्रीराजराजेश्वरवीजदसक(?दशकं) च स्मृत्वा दक्षांगेन शयनांडस्यापवामपादस्य पूर्वं विन्यासं कृत्वा °

The MS. contains the following 9 chapters (*ratna*):—I. *Nityaprātaḥkrityaratna*, fol. 4*b*; II. *nityatantrasnānaratna*, fol. 5*b*; III. *nityasandhyāratna*, fol. 7*a*; IV. *nityapūrṇatarpaṇa*, fol. 8*a*; V. *saṃsthāvediratna*, fol. 11*a*; VI. *nityapūrṇabhūtaśuddhyādiratna*, fol. 13*a*; VII. *nityapūrṇamātṛikānyāsaratna*, fol. 19*b*; VIII. *nityapūrṇamantravinyāsaratna*, fol. 21*b*; IX. *nityāntaryāgaratna*.

It ends:

स्वागतं देव देवेश सन्निधौ भव केशव ।
गृहाण मानसीं पूजां यथावत्परिभाविताम् ॥

इति श्लोकमंत्रेण मानसीं पूजां प्रभवेति वेदयेदिति संक्षेपः ॥

श्रीमद्दीव्यत्कार्तवीर्यप्रसादात्प्रादुर्भूते प्रेमनिध्याख्यविप्रात् ग्रंथे भक्तव्रातसंतोषके ऽस्मिन्नित्यंतर्यागरत्नं(!) संपूर्णं ॥

Then follow four more lines, apparently the beginning of a new chapter: ततश्च शंखादिपात्रस्थापनमनुसर्तव्यं ° and terminating abruptly: ऊर्ध्वाग्रं त्रिकोणं कृत्वा तद्बहिः षट्कोणं त ॥

The same colophon, *mutatis mutandis*, occurs at the end of each chapter.

Without other copies, this MS. is of little use.

See Aufrecht, Cat. Cat., s.v. *Premanidhi* (son of *Umāpati*), where, however, most of the titles of separate treatises given seem to be merely chapters of the present work.

[COLL. OF FORT WILLIAM.]

DR.RUPINATHJI( DR.RUPAK NATH)

## 2596.

**1248a.** Foll. 121; size $9\frac{1}{2}$ in. by $3\frac{3}{4}$ in.; fairly good Devanāgarī writing of 1790 A.D.; nine lines in a page.

*Tārābhaktisudhārṇava*, a digest of directions for the worship of the goddess *Tārā*, or *Tāriṇī*, compiled by *Narasiṃha* (or *Nṛisiṃha*) *Ṭhakkura Mahopādhyāya*. *Taraṅgas* V.–VIII.; each paged separately.

V. *Tārānityārcanavidhi*, foll. 74, treating of purificatory rites and formulas in constant use in devotional practices, begins: अथ नित्यविधिः ॥ कुलचूडामणौ ॥

साधकः प्रातरुत्थाय कुलवृक्षं प्रणम्य च ।
मूलादि ब्रह्मरंध्रांतं कुलं ध्यात्वा गुरुं स्मरेत् ॥

कुलवृक्षाः ॥ रुद्रयामले । ०

Foll. 66*b*–71*a* contains formulas of invocation to *Tārā* under 1000 different names or epithets.

The copyist's date is: श्रीवणकृष्ण १० गुरौ संवत् १८४१ ॥

VI. (?) foll. 11, deals chiefly with the rites of initiation for novices. It is only in this chapter, when describing the selection of a young girl to be enthroned and worshipped as the substitute of the goddess, that the author verges slightly on the objectionable practices of *Tantric* worship.

It begins: अथ ब्राह्मणातिरिक्तवीरश्चेत् तदा विसर्जनानंतरं तादृशदिव्यश्चेत् तदा ब्रह्मार्पणात्प्राक् प्रथमं गुरवे गुरुपात्रं समभ्यर्चयित्वा देयं । ०

VII. *Naimittikavidhi*, foll. 21, treating of the festivals recurring with the seasons, begins: अथ नैमित्तिकं स्वतंत्रतंत्रे ।

नित्यं नैमित्तिकं काम्यं साधेशं पूर्वपूर्वतः ।
अन्यथा चिंतयेदित्थं कुर्यादाराधपरंपरां ॥

VIII. *Puraścaraṇavidhi*, foll. 15, treating of preliminary rites to be observed, begins: अथ पुरश्चरणं । वायवीयसंहितायां । साधनं मूलमंत्रस्य पुरश्चरणमुच्यते ॥ ०

Colophon: इति श्रीमहामहोपाध्यायठक्कुरश्रीनृसिंहविरचिते ताराभक्तिसुधार्णवे ऽष्टमस्तरंगः ॥

The following authorities are cited: *Agastyasaṃhitā*, foll. 9*b*, 111*b*, 114*b*; *Uḍḍīśa*, foll. 22*a*, 49*a*; *Uttaratantra*, foll. 11*b*, 12*b*, 17*a*, etc.; *Umāmaheśvarasaṃvāda*, fol. 62*a*; *Ekavīrātantra*, foll. 19*a*, 107*b*; *Kalaśa* (some formulas), fol. 37*b*; *Kālikāśāva* (?*stava*), fol. 7*a*; *Kālikodbhāva*, fol. 110*b*; *Kālīkalpa*, foll. 50*b*, 51*a*; *Kālītantra*, foll. 13*a*, 36*b*, 119*a*; *Kubjikātantra*, fol. 64*a*; *Kumārīkalpa*, foll. 6*a*, 11*a*, 12*a*, etc.; *Kumārītantra*, foll. 10*b*, 16*b*, 30*b*, etc.; *Kulacūḍāmaṇi*, foll. 1*b*, 3*a*, 5*b*, etc.; *Kulamūlāvatāra*, foll. 50*a*, 107*b*; *Kulāmṛita*, foll. 61*a*, 77*a*, 82*b*; *Kulāmṛitadīpikā*, fol. 81*b*; *Kulārṇava*, foll. 11*a*, 14*a*, 16*b*; *Kulāvatāra*, foll. 24*b*, 25*a*; *Kuloḍḍīśa*, foll. 50*b*, 51*a*, 52*a*; *Kaulālavīya*, fol. 36*b*; *Kriyāsāra*, fol. 36*b*; *Gandharvatantra*, foll. 4*a*, 47*a*; *Gotamīya*, foll. 7*a*,*b*, 8*a*, etc. (*Gautamīya*, fol. 24*b*, cf. *Vaishṇavag*.); *Gorakshasaṃhitā*, fol. 14*a*; *Gaurīyāmala*, fol. 31*a*; *Candrapīṭha*, foll. 119*b*, 120*b*; *Candrikā*, fol. 54*a*; *Jñānārṇava*, foll. 14*b*, 44*b*, 51*b*, etc.; *Jñānonnayana*, fol. 20*b*; *Ḍāmara*, fol. 50*b*; *Tattvacintāmaṇi*, fol. 2*b*; *Tattvasārasaṃhitā*, foll. 9*a*, 10*a*; *Tantracūḍāmaṇi*, fol. 19*a*, *b*; *Tantramālā*, fol. 63*b*; *Tantrarāja*, fol. 7*b*; *Tantrarājottara*, fol. 8*b*; *Tantralīlāvatī*, fol. 52*a*; *Tantraśekhara*, fol. 118*b*; *Tārākaraṇīya*, fol. 26*a*; *Tārārahasyavṛitti*, fol. 11*a*; *Tārārṇava*, foll. 38*a*, *b*, 51*b*, 107*b*; *Tāropanishad*, fol. 47*b*; *Tūrṇāyāga* (*ślokas*), foll. 57*b*, 58*a*; *Tripurārṇava*, fol. 4*a*; *Triśaktitantra*, fol. 4*a*; *Triśaktiratna*, foll. 10*a*, 25*a*, 35*b*, etc.; *Dakshiṇāmūrtisaṃhitā*, foll. 31*b*, 90*a*, 91*b*; *Dīpikā*, fol. 54*a*, *b*; *Devīyāmala*, foll. 77*b*, 82*b*, 110*b*; *Navaratneśvara*, fol. 44*a*;

DR.RUPNATHJI( DR.RUPAK NATH )

*Nāradapañcarātra*, foll. 3*a*, 5*a*, etc.; *Nāradīya*, fol. 61*b*; *Nīlatantra*, foll. 3*a*, 4*a*, 8*a*, etc.; *Nṛisiṃhakalpa*, fol. 50*b*; *Padyavāhinīya* [अंगुष्ठानामिकाभ्यां तु न्यासः सर्वत्र संमतः।], fol. 24*a*; *Puraścaraṇacandrikā*, foll. 51*a*, 52*b*, 65*b*, etc.; *Pushpamālā*, fol. 36*a*; *Pushpādhyāya*, fol. 36*a*; *Prapañcasāra*, foll. 50*b*, 52*a*; *Prathamatantra*, fol. 109*a*; *Phetkāriṇī*, foll. 11*a*, 14*a*, 19*a*, etc. (*-tantra*, foll. 9*a*, 23*b*, etc.); *Phetkārīya*, fol. 10*a*; *Pheravīya*, foll. 11*a*, 12*b*, 21*a*, etc.; *Brahmayāmala*, foll. 13*b*, 103*b*; *Brahmasaṃhitā*, foll. 18*b*, 48*b*; *Bhāvacūḍāmaṇi*, foll. 14*a*, 34*b*, 36*b*, etc.; *Bhāvanirṇaya*, fol. 45*a*; *Bhairavatantra*, foll. 6*a*, 11*a*, 12*a*; *Matsyasūkta*, foll. 36*a*, 87*b*; *Mantracūḍāmaṇi*, foll. 12*b*, 47*a*; *Mantratantraprakāśa*, foll. 23*b*, 24*a*, 51*a*, etc.; *Mantradevaprakāśikā*, fol. 120*b*; *Mantramuktāvalī*, foll. 50*b*, 90*b*; *Mahākapilapañcarātra*, fol. 113*b*; *Mahākālasaṃhitā*, foll. 14*b*, 89*b*, 90*a*, etc. (often *Māhā-*); *Mahārṇavatantra*, fol. 41*a*; *Mānasollāsa*, fol. 56*a*; *Mālinītantra*, foll. 3*b*, 7*b*, 8*a*, etc.; *Muṇḍamālā*, foll. 34*a*, 35*a*, 36*b*, etc.; *Yāmala*, fol. 3*a*, etc.; *Yoginītantra*, foll. 29*b*, 32*a*, 61*b*, etc.; *Ratnasāgara*, fol. 11*a*; *Rāghavabhaṭṭa*, fol. 57*a*; *Rudrayāmala*, fol. 1*b*, etc. (*Tārābhūtaśuddhiprakaraṇa* of *R.*), fol. 21*a*; *Laghustava*, fol. 14*b*; *Vakratuṇḍakalpa*, fol. 118*b*; *Vasishṭhasaṃhitā*, foll. 4*a*, 9*a*, etc.; *Vāyavīyasaṃhitā*, foll. 107*b*, 113*b*; *Vārāhītantra*, foll. 13*b*, 20*b*; *Vijayākalpa*, fol. 15*b*; *Vimalātantra*, fol. 55*b*; *Viśuddheśvara*, foll. 2*b*, 16*b*; *Vīrakalpa*, fol. 44*a*; *Vīracūḍāmaṇi*, foll. 1*b*, 2*a*, 3*a*, etc.; *Vīratantra*, fol. 21*a*; *Vaiśampāyanasaṃhitā*, fol. 108*a*, *b*; *Vaishṇava-Gotamīya*, fol. 24*a*; *Lakshaṇasaṃgraha*, fol. 49*a*; *Śāradā*, foll. 22*b*, 23*a*, *b*, etc.; *Śāradātilaka*, foll. 56*b*, 61*a*; *Śaivāgama*, foll. 5*b*, 6*a*, 7*a*, etc.; *Śrīkrama*, foll. 13*a*, 85*b*; *Śrīkramasaṃhitā*, fol. 3*b*; *Sanatkumārīya*, fol. 114*b*; *Samayācāra*, foll. 14*b*, 17*a*, 34*a*, etc.; *Samayātantra*, fol. 6*a*; *Sārasaṃgraha*, foll. 29*b*, 30*b*, 32*b*, etc.; *Siddhasārasvata*, foll. 30*a*, 32*b*; *Siddhināthasaṃhitā*, fol. 84*a*; *Siddheśvaratantra*, fol. 118*a*; *Siddheśvarītantra*, fol. 32*a*; *Suta(? Sūta)gītaratnākara*, fol. 48*a*; *Surendrasaṃhitā*, foll. 2*a*, 107*b*; *Somabhujagāvalī*, fol. 55*a*; *Sautrāmaṇitantra*, fol. 31*a*; *Svatantra*, foll. 8*b*, 20*b*; *Svatantratantra*, foll. 6*a*, 12*b*; *Haṃsapārameśvaratantra*, fol. 73*b*; *Haragaurīsaṃvāda*, foll. 10*b*, 19*a*, 35*b* (*Kulasarvasvasahasranāmastotra* of *H.*), fol. 73*a*; *Homāṅganirūpaṇa*, fol. 115*a*.

[H. T. Colebrooke.]

## 2597.

231 Foll. 102, five of which (47–51) are wanting; size 14½ in. by 4⅛ in.; good, modern Nepalese handwriting; nine lines in a page.

*Śyāmārahasya*, a compendium of *Tantric* worship, in 22 chapters (*pariccheda*), compiled from various sources, by *Pūrṇānanda-paramahaṃsa*. [A.]

It begins:

देवीं दानवदैत्यदर्पनिवहानुन्मूलयंतीं शिवां
ब्रह्मानन्दमहेशमौलिमणिभिः संशोभितांघ्रिद्वयां ।
नत्वा श्रीगुरुपादपद्मपरमामोदामृताप्लावितः
पूर्णानन्दसुधीस्तनोति विमलां श्यामारहस्याभिधां ॥

स्वतंत्रं वीरतंत्रं च तंत्रं फेत्कारिणीं तथा* ।
कालिकाकुलसर्वस्वं कालीतंत्रं च यामलं ॥

कुलचूडामणिं चैव कुमारीतंत्रमेव† च ।
कुलार्णवं तथा कालीकल्पं भैरवतंत्रकं ॥

कालिकाकुलसद्भावं तथा चोत्तरतंत्रकं ।
गुरूणां च मतं ज्ञात्वा साधकानां तथा मतं ।

शुद्धबुद्धस्वभावार्थं वक्ष्यामि मोक्षकारिणीं ।
तदुक्तं स्वतंत्रे । °

* फेत्कारीतंत्रमेव च B.

† कौमारीतंत्र ° B.

DR.RUPNATHJI( DR.RUPAK NATH )

I. *Nyāsānuvivaraṇa*, fol. 16*a*; II. *antaryajanavivaraṇa*, fol. 18*a*; III. *sādhakakulaveśanirṇaya*, fol. 36*b*; IV. *rahasyamālā* (consisting of *Kālīkalpe kālikākavacam*, B, fol. 49*a*; *Rudrayāmale uttaratantre kālīprasthāpe kālabhairavasaṃvāde śrī-dakshiṇā-kālikākavacam*, fol. 53*a*; *Śrī-virūpākshaviracitaṃ śrīkālikākavacam*, fol. 55*b*; *Bhairavatantre kālīkalpe śrīkālīkavacam*, fol. 57*a*; *Kālipurāṇe trailokyamohanaṃ nāma kālīkavacam*, fol. 57*b*; *Kālīkulasarvasve mahākālī-śrī-dakshiṇākālī nāma sahasrastavarājam*, fol. 68*a*; *Rudrayāmalatantre śrīśyāmāstotram*, fol. 69*a*; *śrīmahākālakṛitaṃ śrīkālīstotram*, fol. 71*a*; *śrīkālikācatuḥślokīstotram*, fol. 72*a*); V. *mantrasiddhārthavivaraṇa* (B., fol. 72*a*); VI. *mantrabhedavivaraṇa* A., fol. 53*a*; VII. *Kālītattvakathana*, fol. 54*a*; VIII. *purushārthasādhanavivaraṇa*, fol. 58*a*; IX. *vīryamocana*, fol. 62*a*; X. *sāmānyasādhana*, fol. 64*a*; XI. *puraścaraṇavyatirekamantrasiddhyupāya*, fol. 65*b*; XII. *pīṭhajapanirṇaya*, fol. 67*b*; XIII. *kulācāranirṇaya*, fol. 70*b*; XIV. *mahānīlakramavarṇana*, fol. 78*b*; XV. *puraścaraṇapraḍhāntaranirṇaya*, fol. 81*b*; XVI. *homakuṇḍamānanirṇaya*, fol. 85*a*; XVII. *vetālādisiddhinirṇaya*, fol. 84*a*; XVIII. *paripākaphalavivaraṇa*, fol. 90*a*; XIX. *tāriṇībhedavivaraṇa*, fol. 97*a*; XX. *śarīradṛiḍhīkaraṇa*, fol. 100*a*; XXI. *rahasyamālāsaṃskāravarṇana*, fol. 100*b*; XXII. ends:

नीलांशुकां मणिमयीं च करेषु वीणां
मुद्रां च पात्रमथ पूर्णसुधां दधानां ।
उद्यच्चतुर्मुखवहत्कविताप्रवाहां
नीलां भजामि हृदयेन सरस्वतीं तां ॥
लक्षमेकं जपेद्विद्यां दशांशमसितोत्पलैः ।
नियतं च महाविद्यां* वीजाद्यां परिकल्पयेत् ।
ध्यानपूजापुरश्चर्या सर्वनीलसमं भवेत् ॥ ०

See Rāj. Mitra, Notices, ii., p. 43.

[B. H. HODGSON.]

* तंत्रपंचमहाविद्यां B.

## 2598.

**67.** Foll. 133; size $10\frac{3}{4}$ in. by $4\frac{1}{4}$ in.; well written, in Devanāgarī; nine lines in a page.

*Śyāmārahasya*. In this (not very correct) copy [B] the introductory couplets are preceded by a *stotra* of eight stanzas, commencing:

ज्योतीरूपां क्रूरमुरूपां स्मितवक्त्रां
देवेन्द्रैर्यां ध्येयपदाब्जां दनुजेन्द्रैः ।
तीक्ष्णांतःसंस्मितरुद्रासनं निविष्टां (!)
कालीं कालोत्संगनिलीनां कलयामः ॥ १ ॥ ०

With the following additional couplet and colophon:

एतत्प्रातर्यो ऽष्टकमेतत्पद्मक्त्रो
सद्यो मर्त्यो गायति मूर्त्यामलदेहः ।
काली सद्यः कालयुतानुग्रहदृष्टिं
तस्मै दातुं तिष्ठति लभ्यां तपसाग्रे ॥ ९ ॥

इति श्रीमामाहेशगणेशभट्टारकानंदनाथविरचितं श्रीकालीसमयूराष्टकस्तोत्रं समाप्तं ॥

Then follow the introductory *ślokas* as above.

The MS. is dated: संवत् १८६१ मार्गशीर्षमासे कृष्णपक्षे ४ बुधवासरे लिखितं शिवप्रसादो ब्राह्मणेन ॥

[H. T. COLEBROOKE.]

## 2599.

**1534.** Foll. 56; size 11 in. by $3\frac{3}{4}$ in.; fairly good, small Devanāgarī writing of about 1750 A.D.; 10–18 (mostly 17) lines in a page.

*Sundarīmahodaya* (also called *Tripurasundarīmahodaya*), a compendium of *Tantric* worship by *Śaṅkarānanda Nātha*, disciple of *Rāmānanda Nātha*, or *Rāmānanda Sarasvatī*.

It begins: श्रीमहात्रिपुरसुन्दर्यै नमः ॥

वालातपोल्लासितशोणसिंधु-
नीरोच्छलत्कोकनदोत्तमश्रीः ।
मनोनिकुंजे करुणारसार्द्रा
काचिल्लता मे ललिताविरास्तां ॥ १ ॥
यो वै दीक्षामेकमात्रेण दिव्यं
ज्ञानं दत्त्वा मोहपाशं निकृत्य ।



DR.RUPNATHJI( DR.RUPAK NATH )

दीनं सद्यो मामरक्षीद्भवाब्धेस्
तं श्रीरामानंदनाथं नमामि ॥ २ ॥

यदीयवाचामृतमादृताः सकृज्
जडा निपीयाशु भजंति जीवतां ।
तं तंत्रमार्गाध्ययने गुरुं नतो
विमर्शनाथं भगवंतमीश्वरं ॥ ३ ॥

ज्ञानार्णवं तंत्रमुपाश्रिता ये
न्यासादिविस्तारकृतावसक्ताः ।
तेषामिहावश्यककर्मरीतिं
तदुक्तमात्रां कथये विभाव्य ॥ ४ ॥

शंकरानदनाथाख्यः शंभुदीक्षाविधिं तथा ।
नित्यं नैमित्तिकं काम्यं वक्ष्ये श्रीत्रिपुरार्चनं ॥ ५ ॥

शृणु देवि प्रवक्ष्यामि बीजं कामेश्वरीमतं ।
सकलभुवनेशानी (*r.* °नि) कामेशी (*r.* °शि) बीजमुत्तमं ।
अनेन सकला विद्याः कथयामि विशेषतः ॥

शक्त्यंतस्तुर्यवर्णोऽयं कलमध्ये सुलोचने ।
वाग्भवं पंचवर्णात्मं कामबीजमथोच्यते ॥

मादनं शिवचंद्राद्यं शिवांतं मीनलोचने ।
कामबीजमिदं भद्रे षड्वर्णं सर्वमोहनं ॥

शक्तिबीजं वरारोहे चंद्राद्यं सर्वसिद्धिदं ।
चतुरक्षररूपं तु त्र्यक्षरा त्रिपुरा परेति ॥

अस्यार्थः ॥ ककारलकारसहिता भुवनेश्वरी क्लह्रीमिति मुख्यं बीजमिति यावत् । ककारलकारयोर्मध्ये सानेकारस्तस्यांते तुर्यवर्णो दीर्घ ईकारः । ए ई इति अक्षरद्वययोगे कएलह्रीमिति पंचवर्णात्मकमेकमक्षरं वाग्भवकूटं ॥ तथा मादनं कः । शिवो हः । चंद्रः सः । शिवो हः । तथा च हकारसकाराद्यः ककारः हकारांतः कार्यः हसकलह्रीमिति षड्वर्णात्मकमेकमक्षरं कामराजकूटं ॥ तथा चंद्रः सः पूर्वोक्तं कामेशीबीजं । चंद्राद्यं सकलह्रीमिति चतुरक्षररूपं एकमक्षरं शक्तिकूटं ॥ भैरव्यपेक्षया परा ह्विता या त्रिपुरा । त्रिपुरायास्तृतीयो भेद इति यावत् । सेयं कामराजोपासिता विद्या । अस्या एव विद्याया एकारेकारौ हित्वा ककारात्पूर्वं हकारसकारयोगे लोपामुद्रा विद्या । तदुक्तं ।

कामराजाख्यविद्यायाः शक्तितुर्ये च सुंदरि ।
हित्वा मुखे शिवेंद्राद्या लोपामुद्रा प्रकाशितेति ॥ °

The work is divided into five chapters (*ullāsa*):—I. *dīkshāvidhi* (initiation), fol. 8*a*; II. *upodghāta* (introduction), fol. 11*b*; III. *nyāsādikhaṇḍa* (marking the body with mystic signs), fol. 30*a*; IV. *nityapūjāvidhi* (ordinary rites), fol. 48*b*; V. Miscellaneous rites, fol. 56*a*.

Of casual quotations from other sources the following may be noted: *Kramottama*, by *Nijātmānanda Nātha* (fol. 38*a**); *Dakshiṇāmūrtisaṃhitā* (fol. 38*a*, 2 infra); *Mantramahodadhi* (fol. 39*b*, 2 infra); *Lalitārcanacandrikā* (fol. 33*b*, 1, 38*b*, 5).

It ends:

यदत्र किंचिल्लिखितं मया तन्न नव्यमस्तीत्यवहेलनीयं ।
यतो हि मूलार्थनिबद्धमार्गं विमृश्य सद्भिः परिभाव्यमेव ॥ १ ॥

रामानंदगुरुप्रसादगलिताज्ञानन्धकार स्फुटं
पूज्यपद्धतिसंगतार्थविषमज्ञानार्णवोत्कीरहं ।
आख्यानं तु यथामति प्रभजतां श्रीसुंदरीपादुकां
तोषं तज्जनयेदपार्थकमपि प्रेमार्द्रभक्त्यापरं ॥ २ ॥

रहस्यभूतमत्प्रमेयभासकः समासतो
निबंध एष सुंदरीमहोदयः कृतो मया ।
विरंचिविष्णुपूज्ययोर्मदीयनाथभूतयोर
महेशसुंदरीपदारविंदयोः समर्पितः ॥ ३ ॥

शंकरानंदनाथेन कविमंडनशंभुना ।
कृतं ग्रंथं गुरुप्रीत्ये भजंतु सदुपासकाः ॥ ४ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामानंदसरस्वतीपूज्यपादशिष्यशंकरानंदनाथकृते श्रीसुंदरीमहोदये पंचम उल्लासः ॥ समाप्तश्चायं सुंदरीमहोदयः ॥ [H. T. COLEBROOKE.]

## 2600.

**1150.** Foll. 56 (four of which are wanting); size 9 in. by 4¼ in.; good, clear Devanāgarī writing of about 1750 A.D.; 11 or 12 lines in a page.

*Mahātripurasundarīpādukārcanakramottama*, a description of *Tantric* rites in connection with the worship of *Tripurasundarī*; by *Nijātmaprakāśānanda*.

* The passage quoted occurs in MS. 1150, fol. 52*b*, 4.

DR.RUPNATHJI( DR.RUPAK NATH )

Foll. 1–6 of the original MS. are wanting, and have been replaced (by a different hand) by the same number of leaves containing a description of some other *Tantric* rites, apparently not belonging to the treatise; and beginning:

अथ रत्नामृताब्धिमध्यस्थरत्नद्वीपे । मदनोन्मादनं नाम पुष्पलताकुलं । कूजत्कोकिलशुकवाचालविटपिगहनं जातीचंपकपुन्नागपाटलोत्पलाद्याशेषसुमनोभिरलंकृतं ह्रींकारमुखरभ्रमद्भ्रमरकलकलाकुलमलयपवनप्रवर्तितलताजालं ॥ नंदनोद्यानं ध्यात्वा ।°

Fol. 19 has likewise been supplied by the same more recent hand; the first page containing a repetition of fol. 15*a*, ll. 1–7, whilst the second contains matter unconnected with what follows.

Foll. 41–44 are missing; and between foll. 45 and 46 two leaves, marked 45 and 46, and written by a third hand, have been inserted, though evidently belonging to some other *Tantric* work (*navacakranyāsa*, *cakreśvarīnyāsa*, etc.).

अथ परापूजाक्रमः fol. 8*b*; इति परापूजाक्रमः fol. 10*b*; इति त्रिपुरसुंदर्या उपस्थानसहस्राक्षरी समाप्ता fol. 14*b*; इति प्रस्तारसहस्राक्षरी fol. 17*a*; इत्यावरणसहस्राक्षरी fol. 18*b*; इति ध्यानं । अथ गुरुपादुकास्तुतिः fol. 21*b*; इति गुरुपादुकास्तुतिः fol. 22*b*; इति ज्ञानार्णवक्रमः fol. 25*b*; इति सौभाग्यहृदयस्तोत्रं fol. 36*a*; इति क्रमस्तुतिः fol. 36*b*; इति प्रार्थनास्तुतिः fol. 37*b*; इति शांतिसूक्तं fol. 39*a*; अथातः संप्रवक्ष्यामि शक्तिन्यासं सुरेश्वर ।° fol. 48; इति योगिनीमते महाशक्तिन्यासः fol. 52*a*; इति पंचरत्नानि fol. 53*b*.

It ends:

बालसूर्यप्रभां देवीं जपाकुसुमसन्निभां ।
ुंडमालावलीरम्यां बालसूर्यसमांशुकां ॥

सुवर्णकलशाकारपीनोन्नतघनस्तनीं ।
पाशांकुशौ पुस्तकं च तथैव जपमालिकां ॥

पश्चिमसिंहासनाय नमः ॥ इति श्रीनिजात्मप्रकाशानंदविरचितः श्रीमहात्रिपुरसुंदरीपादुकार्चनक्रमोत्तमः संपूर्णः ॥

## 2601.

**1893.** Foll. 5; size $11\frac{3}{4}$ in. by 4 in.; fair Devanāgarī writing, of the latter part of last century; twelve lines in a page.

*Tripurasundarīstotra*, a treatise on the worship of *Śakti* under 1000 different forms of her name implying so many epithets.

It begins:

कैलासशिखरे रम्ये नानारत्नोपशोभिते ।
कल्पपादपमध्यस्थे मुख्यनिर्जरसेविते ॥ १ ॥

मणिमंडपमध्यस्थे रत्नपर्यंकसंस्थितं ।
तं कदाचित्सुखासीनं भगवंतं जगद्गुरुं ॥ २ ॥

जटाजूटधरं देवं वासुकीकंठभूषणं ।
विभूतिभूषणं देवं नीलकंठं त्रिलोचनं ॥ ३ ॥

कपालखट्वांगधरं चंद्रार्धकृतशेखरं ।
त्रिशूलडमरुधरं महावृषभवाहनं ॥ ४ ॥

द्विपचर्मपरिधानं शुद्धस्फटिकसन्निभं ।
सहस्रादित्यसंकाशं गिरिजार्धांगभूषणं ॥ ५ ॥

प्रणम्य शिरसा नाथं कारणं विश्वरूपिणं ।
कृतांजलिपुटो भूत्वा प्राह तं शिखिवाहनः ॥ ६ ॥

कार्त्तिकेय उवाच ।

देवदेव महादेव सृष्टिस्थित्यंतकारक ।
त्वं गतिः सर्वदेवानां त्वं गतिः सर्वदेहिनां ॥ ७ ॥

त्वं गतिः सर्वलोकानां दीनानां च त्वमेव च ।
त्वमेव जगदाधारस्त्वं तथा विश्वकारणं ॥ ८ ॥

त्वमेव सर्वपूज्यो ऽसि त्वदन्यो नास्ति मे गतिः ।
किं गुह्यं परमं लोके किमेकं सर्वदैवतं ॥ ९ ॥

किमेकं परमं श्रेष्ठं किं लोकस्वर्गमोक्षदं ।
विना दानेन तपसा विना तीर्थैर्विना मखैः ॥ १० ॥

विना लयेन ध्यानेन केन सिद्धिमवाप्नुयात् ।
कस्मादुत्पद्यते सृष्टिः कस्मिंश्च प्रलयो भवेत् ॥ ११ ॥

कस्मादुत्तीर्यते देव संसारार्णवसंकटात् ।
तदहं श्रोतुमिच्छामि कथय त्वं महेश्वर ॥ १२ ॥

महादेव उवाच ।

साधु साधु त्वया पृष्टं गुह्यं पार्वतिनंदन ।
अस्ति गुह्यं परं पुत्र कथयिष्याम्यसंशयं ॥ १३ ॥



DR.RUPNATHJI( DR.RUPAK NATH )

सत्त्वं रजस्तमश्चैव ब्रह्मविष्णुशिवादयः ।
ये चान्ये बहवो भूताः सर्वे प्रकृतिसंभवाः ॥ १४ ॥
सैव देवी परा शक्तिर्महात्रिपुरसुंदरी ।
सैव प्रसूयते विश्वं सैव विश्वं प्रपालयेत् ॥ १५ ॥
सैव संहरते विश्वं जगदेतच्चराचरं ।
आधारः सर्वभूतानां सैव रोगार्तिहारिणी ॥ १६ ॥
इछाव्यया तथा ज्ञाना (?) ब्रह्मविष्णुशिवात्मिका ।
त्रिधाशक्तिः स्वरूपेण सृष्टिस्थितिविनाशिनी ॥ १७ ॥
सृज्यते ब्रह्मरूपेण विष्णुरूपेण पाल्यते ।
संहृतं रुद्ररूपेण जगदेतच्चराचरं ॥ १८ ॥
यस्यां योनौ जगत्सर्वमद्यापि वर्तते ऽखिलं ।
यस्यां प्रलीयते चांते यस्यां च जायते पुनः ॥ १९ ॥
यां समाराध्य त्रैलोक्ये संप्राप्ते पदमुत्तमं ।
तस्या नामसहस्रं ते कथयामि शृणुष्व तत् ॥ २० ॥

ओं अस्य श्रीत्रिपुरसुंदरीस्तोत्रमंत्रस्य श्रीभगवान्दक्षिणमूर्तिर्ऋषिर्गायत्री छंदः । ०

कल्याणी कमला काली कराला कामरूपिणी ।
कामाख्या कामदा काम्या कामिनी कामचारिणी ॥ १ ॥
कालरात्रिर्महारात्रिः कालिका कव्यवाहिनी ।
कौमारी करुणाकीर्तिः काली कल्मषनाशिनी ॥ २ ॥
कात्यायनी कलाधारा कौमुदी कमलप्रिया ।
कीर्तिदा बुद्धिदा मेधा नीतिविज्ञातिवत्सला ॥ ३ ॥ ०

The *stotra* ends fol. 5*a*:

त्रिदिवा त्रिदिवेशी च त्रिपुरा पुरनाशिनी ।
त्रिपुरा श्रीत्रिजननी त्रिमूर्तिः पुरसुंदरी ॥ १४४ ॥
इति त्रिपुरसुंदर्या मंत्रनामसहस्रकं ।
गुह्याद्गुह्यतरं पुत्र तव प्रीत्या प्रकीर्तितं ॥ १४५ ॥ ०

It ends:

सर्वधर्मेषु यो धर्मः सर्वदानेषु यत्फलं ।
सर्ववेदेषु प्रोक्तेषु यत्फलं परिकीर्तितं ॥ १६१ ॥
यत्पुण्यं कोटिगुणितं स तद् दृष्ट्वा भवेन्नरः ।
श्रुत्वा महाबलाढ्यः स्यात् पुत्रवान्गुणवान्सुगीः ।
अनुव्रजंति तं लोके शीघ्रं च बहुसंपदः ॥ १६२ ॥

इति त्रिपुरसुंदरीस्तोत्रं सहस्रनाम संपूर्णमगमत् ॥

For different treatises of this title see Aufrecht, Cat. Catalogorum.

[Dr. J. Taylor.]

## 2602.

**1926.** Foll. 19; size 11 in. by $4\frac{3}{4}$ in.; fair, modern Devanāgarī writing; fifteen lines in a page.

*Bālātripurasundarīpaddhati*, a description of the *Tantric* rites and daily oblations enjoined upon the votaries of *Tripurasundarī*.

It begins: ब्राह्मे मुहूर्ते चोत्थाय बद्धपद्मासनशिरसा शुक्लवर्णाधोमुखसहस्रदलकर्णिकांतस्थः चंद्रमंडलांतर्गतहंसपीठे श्रीनिजगुरुं ध्यायेत् ।

शुद्धः स्फटिकसंकाशां शुद्धः क्षौमविराजितां ।
गंधानुलेपनः शोभां वराभयकरांबुजां ॥ १ ॥
मंदस्मितां निजगुरुं कारुणेन विलोकनं (!) ।
वामोरुसंस्थसहितां शुक्लांबरविभूषितां ॥ २ ॥
स्वशक्त्या दक्षहस्तेन धृतचारुकलेवरं ।
वामे धृतोपलायाश्च सुरशक्त्याः सुशोभनं ॥ ३ ॥
परानंदरसोल्लासलोचनद्वयपंकजं ।

एवं श्रीगुरुं ध्यात्वा मानसोपचारैः पूजयेत् । ऐं ह्रीं श्रीं हसक्षफ्रें सहक्षनलवरयूं श्रीअमुकेश्वरानंदनाथ श्रीगुरुवैलं (?) पृथिव्यात्मकं गंधं समर्पयामि ॥ १ ॥

It ends: श्रीगुरुं संप्रार्थ्य प्रणम्य मंत्रलेपं ब्रह्मरंध्रे कृत्वा स्वशिरसि पुष्पं धृत्वा विसर्पयेत् ॥

अंतः शाक्ता बहिः शैवाः सभामध्ये च वैष्णवाः ।
नानारूपधराः कौला विचरंति महीतले ॥

इति श्रीमंत्रमहोदधौ श्रीबालात्रिपूरासुंदरीपद्धतिः समाप्ता ॥

भूदेवा यत्र देवाः सुललितवनिता दिव्यकन्यायमानाः
सानंदा गीतगाना विदधत (? ति) विधिवद्विप्रवत्सर्ववर्णाः ।
द्वारं सायुज्यमुक्तैर्हरिहरविधिभिः सर्वदा सेव्यमानं
श्रीचक्रं संप्रवृत्तं जगति विजयते दैवतं देवतानां ॥ १ ॥
यामे यामे निशायां सकलपशुजनैर्घोरनिद्रामवाप्ते
सिद्धांते शुद्धभूमौ मधुरमधुभराश्चंदनानेकपुष्पैः ।
सामोदे जायमाने सपदि परिणतं शांभवं योगिनीभिः
श्रीचक्रं संप्रवृत्तं जगति विजयते सांप्रतं शांभवानां ॥ २ ॥

इति श्रीबालात्रिपूरासुंदरीपद्धतिः संपूर्णा । लिपितं गुरुजीपदमसीजेवंतजीतेन ॥

Judging from the first colophon, the treatise would seem to be intended as a practical

DR.RUPNATHJI( DR.RUPAK NATH )

manual constructed on the principles of worship laid down in (the 12th *taraṅga* or *Sundarī-pūjanam* of) the *Mantramahodadhi*.

[DR. JOHN TAYLOR.]

## 2603.

**1665B.** Foll. 84; size 9 in. by 3½ in.; well written, in the Devanāgarī character; eight lines in a page.

*Tārārahasya-vṛitti*, a *Tantric* compilation, in fifteen *paṭalas*, of spells and incantations; by *Śaṅkara*, son of *Kamalākara*, and grandson of *Lambodara*. [A.]

It begins:

ऊर्जितानंदगहनां सर्वदेवस्वरूपिणीं ।
परां वाग्रूपिणीं वंदे महानीलसरस्वतीं ॥
सुप्रकाशविमर्शाख्यबीजाद्यंकुररूपिकां ।
पूर्णाहंतामयीं(?) वंदे महानीलसरस्वतीं* ॥
नीलतंत्रं समाम्नाय सिद्धसारस्वतं परं ।
नीलतंत्रं मत्स्यसूक्तं गांधर्वं फेरवीं तथा ॥
गुरूणां च मतं ज्ञात्वा गुरुभिः सिद्धभूमिका ।
कृता श्रीशंकरेणैषा तारारहस्यवृत्तिका ॥

नित्यपूजाप्रमाणं† तु पटले प्रथमे तथा ।
दीक्षाविधिर्द्वितीये स्यात्पुरश्चर्या तृतीयके ॥
नैमित्तिकं चतुर्थे तु पंचमे काम्यनिर्णयः ।
रहस्यनिर्णयः षष्ठे कुमारी सप्तमे तथा ॥
अष्टमे च पुरश्चर्यारहस्याः परिकीर्तिताः ।
नवमे पटले देव्या निर्णयो मंत्रविद्ययोः‡ ॥
दशमे पटले स्तोत्रं माहात्म्यमेकादशे तथा§ ।
द्वादशे पटले सम्यग्भावानां परिनिर्णयः ॥
नित्यपूजाप्रयोगस्तु पटले च त्रयोदशे ।
सम्यग्विधानं होमस्य तारायाश्च चतुर्दशे ॥
पंचदशे तु मंत्राणां वासनातत्त्वनिर्णयः ।
इति तारारहस्ये तु सम्यगध्यायनिर्णयः|| ॥

* This *śloka* is omitted in B.

† ०प्रधानं तु B.

‡ देव्या मंत्राणां परिनिर्णयः B.

§ Thus also B.

|| This half-*śloka* is wanting in A.

अथ नित्यपूजाप्रमाणं यथा । ननु वैष्णवादिमतं विहाय कथं शक्तैर्यत्नः क्रियते । ०

The following works have been found quoted: *Ekavīratantra*, *Ekavīrākalpa*, *Kālītantra*, *Kumārītantra*, *Kulacūḍāmaṇi*, *Kulasaṅgraha*, *Kulārṇava*, *Gāndharva(tantra)*, *Tantracūḍāmaṇi*, *Tārārṇava*, *Tārāshaṭpadī*, *Devīyāmala*, *Nīlatantra*, *Phetkāriṇī*, *Pheravīya*, *Bṛihajjñānārṇava*, *Brahmayāmala*, *Bhāvacūḍāmaṇi*, *Matsyasūkta*, *Mantracūḍāmaṇi*, *Mantralīlāvatī*, *Mahogratārākalpa*, *Mātṛikārṇava*, *Mānasollāsa*, *Māyātantra*, *Rahasyamālā*, *Rudrayāmala*, *Vārāhītantra*, *Vimalātantra*, *Viśuddheśvara(mahā)tantra*, *Vīratantra*, *Śambhavasūtra*, *Śāmbhavīya*, *Śāmbhavīsaṃhitā*, *Saṅketatantra*, *Siddhasārasvata*, *Somabhujagāvalī* (! B fol. 40b), *Svatantratantra*, *Haṃsaparameśvara*.

It ends:

अकृशं कुचयोः कृशं विलग्ने
विपुलं वक्षसि विस्तृतं नितंबे ।
अरुणाधरमाचिरस्य चित्ते
करुणा शालिकपालिभागधेयं ॥
लंबोदरस्य पौत्रेण कमलाकरसूनुना ।
अकारि शंकरेणैषा वासनातत्त्वबोधिनी ॥

इति वासनानिर्णयः पंचदशः पटलः ॥ इति गौडभूमिनिवासि-महामहोपाध्याय-श्रीशंकरागमाचार्यविरचिता तारारहस्यवृत्तिः समाप्ता ॥ ० सं १७२७ आश्विनशुक्लदशम्यां लिखितमिदं पुस्तकं श्रीरामनाख्येन श्रीरामचंद्राख्यगुर्जरेण लिखापितं तस्यैव पुस्तकम् ॥

[H. T. COLEBROOKE.]

## 2604.

**2154.** Foll. 69 + 2; size 11 in. by 4½ in.; fairly written, in Devanāgarī, about A.D. 1650; 9–13 lines in a page.

The same work. [B.] Incomplete. The MS. breaks off before the completion of the twelfth chapter.

At the beginning two leaves (apparently *śuddhapattras*) have been inserted, marked 1 and 2.

[GAIKAWAR.]

DR.RUPNATHJI( DR.RUPAK NATH )

## 2605.

**1230b.** Foll. 118; size 11 in. by $4\frac{1}{2}$ in.; good, clear Devanāgarī writing of 1804 A.D.; eight lines in a page.

*Bhuvaneśvarīrahasya* (or *Bhuvaneśvarīsarvasva* ?), a treatise, in 26 *paṭalas*, claiming in the colophon to form part of the *Rudrayāmalatantra*.

It begins:

चिद्रूपं यद्रूपशून्यं स्वरूपं
रूपे रूपं योगिभिः सर्वसंस्थं ।
जीयाच्छंभोस्त्रैपुराख्यं महस्त-
न्नासन्नो सत्सन्न मच्चित्रचित्रं(?) ॥ १ ॥
श्रीशैलराजशिखरे नानाद्रुमलताकुले ।
वसंतलक्ष्मीनिलये समासीनमुमापतिं ॥ २ ॥
एकदा देवमीशानं शशिशेखरमीश्वरं ।
उमाश्रितार्धवपुषं देवदानवसेवितं ॥ ३ ॥
ध्यानसक्ताक्षिवितयं जटीजूटलतारुणं ।
भस्मांगरागधवलं नारायणनमस्कृतं ॥ ४ ॥
ब्रह्मादिदेवप्रणतं गंधर्वजननंदितं ।
यक्षराक्षसनागेंद्रदैत्येंद्रकुलपूजितं ॥ ५ ॥
भैरवं भैरवाकारं गिरीशं परमेश्वरं ।
उत्थाय विनता भूत्वा पर्यपृच्छत पार्वती ॥ ६ ॥
पार्वत्युवाच ।
भगवन्सर्वलोकेश सर्वलोकनमस्कृत ।
गुणातीत गुणाध्यक्ष भूतेश्वर महेश्वर ॥ ७ ॥
सृजस्यवसि नित्यं त्वं संहरस्यखिलं जगत् ।
चराचरं महेशान श्रुतं सर्वं भवन्मुखात् ॥ ८ ॥
महेश श्रोतमिच्छामि भुवनेशीरहस्यकं ।
वद शीघ्रं दयांभोधे यद्यहं प्रेयसी तव ॥ ९ ॥
शिव उवाच ।
शृणु देवि प्रवक्ष्यामि रहस्यमिदमद्भुतं ।
भुवनेश्याश्च सर्वस्वं साहभूतं मम प्रिये ॥ १० ॥

The book consists largely of mystic charms and formulas of invocation.

It ends: श्रीभैरव उवाच ।
इतीदं भुवनेश्वर्या रहस्यं परमेश्वरि ।
सर्वसिद्धिप्रदं गोप्यं गोपनीयं सुरेश्वरि ॥
अदातव्यमभक्ताय कुचैलाय दुरात्मने ।
धूर्ताय बुद्धिहीनाय दीक्षाहीनाय पार्वति ॥
निंदकायाकुलीनाय हीनाय गुरुश्रद्धया ।
स्वपुत्रायान्यशिष्याय दत्त्वा कुष्ठी भवेत्कलौ ॥
भक्ताय शुद्धियुक्ताय कुलीनाय महेश्वरि ।
स्वशिष्याय च दातव्यं दीक्षायुक्ताय पार्वति ॥
इदं रहस्यं परमं भक्त्या तव मयोदितं ।
सर्वस्वं भुवनेश्वर्या गोपनीयं स्वयोनिवत् ॥
इत्येष पटलो देवि दशम्यर्चनदर्शकः ।
गुह्याद्गुह्यतरो गुह्यो गोपनीयं(*r.* °यो) मुमुक्षुभिः ॥
इति श्रीभुवनेश्वरीरहस्ये रुद्रयामलतंत्रे दशम्यर्चनविधिर्नाम षड्विंशः पटलः ॥ ९ संवत् १८६१ ॥°

[H. T. COLEBROOKE.]

## 2606.

**3013.** Foll. 385; small folio, size $11\frac{1}{4}$ in. by 7 in.; coarse, thin Indian paper; fairly written (on one page of each leaf), in Devanāgarī; sixteen lines in a page; modern.

[*Paushkarāgama*], a system of *Tantric* worship, in connection with the *Śiva* cult (? from the *Śairāgama*). Incomplete. The MS., which has evidently been copied from one in some S. Indian alphabet, is rather incorrect.

It begins (somewhat corrected): ऋषय ऊचुः ॥
भगवं देव देवेश ब्रह्मविष्णवंद्रनायक ।
आपिंगलजटाचूडारोपितार्धेन्दुशेखर ॥
व्याघ्रचर्मपरीधान तद्रुद्धव्यालबंधन ।
नित्यं शत्रुमृगानीकसेव्यमान दयानिधे ॥
ललाटनेत्र सप्तार्चिर्दग्धत्रिपुर मन्मथ ।
अंभोधिमथनोद्भूतविषनीलितकंधर ॥
क्रियाचर्ये प्रसादेन तवास्माभिः श्रुते पुरा ।
अधुना ज्ञानपादं तु श्रोतुमिच्छा गरीयसी ॥
वर्तते तामुपाकर्तुमर्हस्यस्माकमीश्वर ।
अधिकारी वयं देव नियुक्ता भवता यतः ।
ज्ञानसाध्यो ऽधिकारो हि मुक्तिश्च व्यक्तिरीश्वर ॥

DR.RUPNATHJI( DR.RUPAK NATH )

ईश्वरः ॥

ज्ञायंते येन पश्याद्याः पदार्थाश्च द्विजोत्तमाः ।
तद् ज्ञानपादमित्युक्तं साधनं देशिकात्मनां ॥°

A. The *Jñānapāda* consists of 8 chapters (*paṭala*):

1. *pratipadārthanirṇaya*, fol. 21; 2. *bindupaṭala*, fol. 25; 3. *māyāpaṭala*, fol. 29; 4. *paśupadārtha*, fol. 51; 5. *kālādipañcaka*, fol. 63; 6. *puṃstattva*, fol. 109; 7. *pramāṇādhikāra*, fol. 120; 8. *tantrotpatti*, fol. 125: इति पौष्करज्ञानपादं संपूर्णं ॥

B. *Sarvajñānottara.*

I. *Yogapāda*, fol. 129; beg.:

नमश्शिवाय शक्त्यै च भिंदवे(?विन्दवे)शाश्वताय च ।
गुरवे च गणेशाय कार्त्तिकेयाय धीमते ॥

अतः परं प्रवक्ष्यामि योगमेकाकिनस्तु तं ।
शांतस्य ॥ युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ॥
उक्तस्वप्नावबोधस्य तत्वतः शृणु षण्मुख ।°

II. *Kriyāpāda*, beg.:

पशुपाशविधानं हि श्रोतुमिच्छामि तत्वतः ।
संयोगं च तथा तेषां कथयस्व महेश्वर ॥

*svātmasākshātkāraprakaraṇa*, fol. 132; *vimalīkaraṇa*, fol. 141; *sthūlavarṇamantrodghāṭaprakaraṇa*, fol. 156; *prāsādamantroddhāraprakaraṇa*, fol. 159; *paramīkaraṇaprakaraṇa*, fol. 167; *pañcagavyādidīkshāṅgaprakaraṇa*, fol. 230; *antyeshṭiprakaraṇa*, fol. 239; *jīrṇoddhāraprakaraṇa*, fol. 275; *pratimādiprakaraṇa*, fol. 278; *vāruṇasnānaprakaraṇa*, fol. 290; *bhasmasnānaprakaraṇa*, fol. 293; ends fol. 294:

इति सर्वज्ञानोत्तरपादः समाप्तः ॥

Cf. Burnell, Index of Tanjore MSS., p. 111, *Sarvajñānottaravṛitti.*

C. *Mataṅgapārameśvare mahātantre vidyāpāda*, 11 *paṭalas*, and part of a 12th. This is perhaps a separate work from the above.

It begins: अधि(*r.* अथ) मतंगपारमेश्वरं लिख्यते ॥

गजाननायमहसे प्रत्युहमितिरश्छिदे(*r.*प्रत्यूहतिमिरच्छिदे)।
अपारकरुणापुरतरंगितदृशे नमः ॥

हिमवत्यचले रम्ये सिद्धचारणसेविते ।
नानाश्चर्यगुणोपेतं शिखरं चारु निर्मलं ॥
सिधीनामुद्भवो यत्र यत्र नाप्यपमृत्यवः ।
यत्रान्योन्यविरुद्धानां प्रीतिर्भवति लक्षणात् ॥
मूर्खो विमूर्खतां याति भयाद्भीतो विमुच्यते ।
यत्र नास्त्युपमर्षाणां प्रवेशः शिखरोत्तमे ॥
यत्र संनिहितो नित्यं भगवान् परमेश्वरः ।
तत्रास मुनिशार्दूलस्तपसोत्कृष्टमूर्तिमान् ॥
ज्ञानाग्निदग्धकलुषो वृत्तांभः क्षालितात्मवान् ।
शिवध्यानैकचित्तात्मा समाधावास्थितस्सुधीः(!)॥°

ततः स भगवान् नाथः पार्वत्या सहितो हरः ।
स्वं वपुर्दर्शयामास मतंगाय तपस्विने ॥
तस्य तद्वचनं श्रुत्वा मतंगस्य महात्मनः ।
ज्ञानालयवपुष्मत्या वार्ण्यालुस्ववपुर्गुरुः ॥
उवाच तस्मै सुप्रीत्या मतंगाय महात्मने ।
विचारयुक्तं सद्वस्तु स्फुटमात्मीयदर्शनात् ॥
यथाव्यवस्थितन्यायमार्गेणैवानुलोमतः ।
सुकरं सुविभक्तांगं पद्पदार्थमयं शुभं ॥
चतुष्पादमिदं शास्त्रमायात[म]मृतात्मकं ।°

In the second chapter the four *pādas* are enumerated (fol. 299), viz.: *vidyāpāda*, *kriyāpāda*, *yogapāda*, and *caryāpāda*.

1. *dayodghāta*(?), fol. 298; (2–4 wanting, or not marked); 5. *śaktipaṭala*, fol. 311; 6. *pumpradhāneśvarasādhanap.*, fol. 337; 7. *vidyāpaṭala*, fol. 347; 8. *māyātattva*, fol. 362; 9. *kalātattva*, fol. 368; 10. *vidyātattva*, fol. 374; 11. *rāgapaṭala*, fol. 379.

Cf. Burnell, Index of Tanjore MSS., p. 205*a* (no. xiii.). [C. P. Brown.]

## 2607.

**270.** Foll. 105 (numbered by mistake 1–76, 79–108); size $11\frac{1}{2}$ in. by $4\frac{1}{2}$ in.; fairly written in Devanāgarī; eight lines in a page.

*Rāmārcanacandrikā*, a manual for the worship of *Rāma*, in five chapters (*paṭala*), by *Ānandavana*, pupil of *Mukundavana*.

It begins :

तर्तुं संसृतिवारिधिं त्रिजगतां नौर्नाम यस्य प्रभोर्
येनेदं सकलं विभाति सततं जातं स्थितं संहृतं ।
यस्मिन्नो निगमा भवंति न मनो मानं च राधेश्वरे*
तं वंदे सहजं प्रकाशममलं श्रीरामचंद्रं परं ॥ १ ॥

विश्वव्यापितनोः शुभा रघुपतेर्मूर्तौ च मूर्तिस्तु यो
वाक्यार्थप्रतिबोधनैकचतुरः शांत्यादिशीलः शुचिः ।
अज्ञानां धनिचारणैकतरणिर्विज्ञानचिंतामणिर्
नित्यानंदपदैकभूर्विजयते श्रीमान्मुकुंदो मुनिः ॥ २ ॥

वेदांतवाक्यार्थहरिर्विराजते
यस्मिन् गजाः कामसदादयो न हि(?) ।
बुधाः(संतः B.) सदानंदपदं प्रपेदिरे
वंदे मुकुंदाख्यवनं गुरुं परं ॥ ३ ॥

पूर्वं चोत्तरतापनीयमखिलं कल्पं वरं मारुतेर्
ब्रह्मागस्तिवसिष्ठवामवयुजः कल्पास्तथा संहिताः ।
शास्त्रं मंत्रमयं महाकुवलयं† त्वातांत्रसीतादिकं
श्रीरामार्चनचंद्रिका कलिमलप्रध्वंसिका प्रोच्यते ॥ ४ ॥

तत्तद्ग्रंथगतैर्नानावाक्यैरेव न कल्पितैः ।
सौकार्यार्थं क्रमः सम्यक्संक्षेपेण प्रतन्यते ॥ ५ ॥

उच्यते प्रथमं तत्र लक्षणं गुरुशिष्ययोः ।
शांतो दांतः कुलीनश्च विनीतः शुद्धवेषवान् ॥

शुद्धाचारः सुप्रसिद्धः शुचिर्दक्षः सुबुद्धिमान् ।
आश्रमी ध्याननिष्ठश्च मंत्रतंत्रविचक्षणः ।
निग्रहानुग्रहे शक्तो गुरुरित्यभिधीयते ॥
इति गुरुलक्षणं ॥

शांतो विनीतः शुद्धात्मा श्रद्धावान् धारणक्षमः ।
समर्थश्च कुलीनश्च प्राज्ञः सच्चरितो धनी ॥

एवमादिगुणैर्युक्तः शिष्यो भवति नान्यथा ।
गुरुता शिष्यता वापि तयोर्वत्सरवासतः ॥ °

Ch. I., on various matters connected with worship, the chief section being the '*rāmamantroddhāra*'; II. fol. 24*b*, on ordinary duties (*ācamana*, *dantadhāvana*, etc., ending with various kinds of *nyāsa*); III. fol. 43*b*, on rites of worship (*dhyāna*, *homa*, *pātrāsādana*, *antaryāga*, *pīṭhapūjā*, *stotras*, etc.); IV., on restrictions and the eight kinds of *yantra*; V., a calendar of periodical and occasional observances.

Among the authorities quoted may be mentioned: *Agastisaṃhitā*, fol. 80*b*; (*mahatī saṃhitā*, fol. 81*b*); *Atharvanarahasya-śrī-Rāmottaratāpanīya*, fol. 61*a*; *Gautamīyam*, fol. 68*b*; *Devyāgama*, fol. 2*b*; *Nāradatantra*, fol. 18*b*; *Pañcarātre Brahmasaṃhitāyām*, fol. 75*b*; *Prayogasāra*, fol. 83*a*; *Mantrasārasaṃgraha*, fol. 18*b*; (*Rāmavallabhāstotra*, fol. 62*b* whole); *Vasishṭhasaṃhitā*, fol. 46*b*; *Sārasaṃgraha*, fol. 2*b*; *Hanumatā proktam mantrarājātmakam*, fol. 62*a*.

It ends :

संसारदावानलतापशांत्यै
श्रीरामचंद्रार्चनचंद्रिकेयं ।
स्यात्संहितामार्गमुपाश्रया हि
भवादिभिर्निर्णितमोपधं(!) या ॥

पटलैः पंचभिः प्रोक्ता श्रीरामार्चनचंद्रिका ।
आनंदवननाम्ना हि यतिना हरितुष्टये ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमन्मुकुंदवनश्रीचरणशिष्यानंदवनविरचितायां श्रीरामार्चनचंद्रिकायां पंचमः पटलः ॥
° संवत् १७८२ श्रावणकृष्ण ३ सोमे ॥

[H. T. COLEBROOKE.]

## 2608.

**2074.** Foll. 101 (the first three of which have been replaced by two leaves in a more modern handwriting; and foll. 39–43 and 101 have likewise been supplied by the same hand); size 9 in. by 3¾ in.; fairly written in Devanāgarī, about the middle of the 16th century.

The same work. (B.) [GAIKAWAR.]

## 2609.

**1824.** Foll. 109; size 12½ in. by 4¾ in.; well written in Devanāgarī, on European paper, about A.D. 1800; ten lines in a page.

* यश्चैतत्पवनः प्रमाणविधुरो वेदांतवेद्यो विभुस् B.

† तंत्रं गाधिजजापिकं वभुवलयं B.

DR.RUPNATHJI( DR.RUPAK NATH )

*Gaṇeśa-Kalpa*, an exposition of *Tantric* rites in connection with the worship of *Gaṇeśa*. Six chapters (*paṭala*), the last of which is incomplete at the end.

*P.* I. (foll. 17) begins :

अथ वक्ष्ये गणेशस्य मंत्रकल्पं समासतः ।
भुक्तिमुक्तिप्रदः पुंसां भक्तानां ब्रह्मदो यतः ॥ १ ॥
तत्रैकाक्षरमंत्रस्तु मंत्राणामुत्तमोत्तमः ।
सर्वसिद्धिप्रदः साक्षाद्गणेशो मंत्ररूपधृक् ॥ २ ॥
यस्य शक्तिः समाख्याता प्रणवः सर्वधारकः ।
तस्यां स जनयामास पंचधात्मानमात्मना ॥ ३ ॥
बिंदुनादो मकारश्चोकारो ऽकारो विधानतः ।
पंचधा सर्वमाख्यातं विश्वं शब्दात्मकं बुधैः ॥ ४ ॥
अकारो वैखरी वाणी मध्यमोंकारसंज्ञिता ।
पश्यंती सा मकाराख्या परा नादमयी मता ॥ ५ ॥ °

इति बीजकोशः संक्षेपतः प्रोक्तः fol. 5*b* ; इति क्रियावती दीक्षा fol. 16*b* ; वर्णात्मिका दीक्षा ib.; कलावती दीक्षा fol. 17*a* ; इति बोधमयी दीक्षा समाप्ता ॥ एवं चतुर्विधदीक्षायुक्तो नरः साक्षाद्गणेशो भवतीति ॥ इति गणेशकल्पे चतुर्विधदीक्षाकथनं नाम प्रथमं पटलं समाप्तं ॥

*P.* II. (foll. 33, placed by binder at the end of vol.): अथ गणेशमंत्रानाह ॥ दीक्षानंतरं मंत्रजपकार्यप्राधान्यात् ॥ अथ शारदातिलकोक्तगणेशः । तत्रैकाक्षरमंत्रः ॥

पंचातकं शशिधरं(? पंचात्मकं शश °) बीजं गणपतेर्विदुः ।
प्रणवादियुतं प्रोक्तं मंत्र एकाक्षरः परः ॥ १ ॥ °

इत्येकाक्षरविधिः ॥ अथ वरदगणेशषडक्षरमंत्रः fol. 3*b* ; अथ महागणपतिमंत्रः fol. 4*a*, etc.

इति गणेशकल्पे गणपत्येकाक्षरादिसप्तत्रिंशन्मंत्रविधानकथनं नाम द्वितीयपटलं ॥

*P.* III. (foll. 22):

नित्यपूजाविधिं वक्ष्ये विघ्नराजस्य तोषदं ।
ब्राह्मे मुहूर्ते चोत्थाय शुचिर्भूमौ स्थितः स्मरेत् ॥ १ ॥ °

258 *ślokas*, with explanations from fol. 13.

इति ° प्रातस्कृत्यारभ्य मातृकान्यासपर्यंतकथनं नाम तृतीयपटलं समाप्तं ॥

*P.* IV. (foll. 18): ततो द्वितीयपटलोक्तमूलमंत्रन्यासान् कृत्वा स्वहृदये वा स्वेष्टदेवप्रतिमाधःपीठपूजां कुर्यात् । तद्यथा ।

न्यस्यन्मंडूकमाधारे स्वाधिष्ठाने ततः सुधीः ।
कालाग्निरुद्रं नाभौ तु कच्छपं हृदये ततः ॥ १ ॥ °

239 *ślokas*, with explanations from fol. 12*b*.

इति ° पूजाविधिकथनं नाम चतुर्थं पटलं समाप्तं ॥

*P.* V. (foll. 12): अथ पुरश्चरणविधिः ॥

आदौ देवं वशीकर्तुं पुरश्चरणमाचरेत् ।
तीर्थादौ निर्जने स्थाने भूमिग्रहणपूर्वकं ॥ १ ॥ °

163 *ślokas* ; इति पुरश्चरणविधिः । अस्यायमर्थः । ° fol. 7*b*.

इति ° पुरश्चरणविधिकथनं नाम पंचमं पटलं ॥

*P.* VI. (foll. 7, inserted by binder between *P.* I. and III.):

कर्माणि षड्विधो वक्ष्ये सिद्धिदानि प्रयोगतः ।
शांतिर्वश्यं स्तंभनं च द्वेष उच्चाटमारणे ॥ १ ॥
उक्तानीमानि कर्माणि शांती रोगादिनाशनं ।
वश्यं वचनकारित्वं स्तंभो वृत्तिनिरोधनं ॥ २ ॥
द्वेषोऽप्रीतिः प्रीतिमत उच्चाटः स्थानतश्च्युतिः ।
मारणं प्राणहरणमिति षट्कर्मलक्षणं ॥ ३ ॥ °

88 *ślokas*, followed by explanations, p. 4*b* : अस्यायमर्थः । अथ षट् कर्माणि पूर्वर्षिभिः प्रोक्तानि । तद्विधानं कथ्यते । शांतिर्वश्यं °

इति षट्कर्मविधिः । तत्र सम्यक् न्यासजालमात्मरक्षां विधाय ° incomplete.

[Dr. J. Taylor.]

## 2610.

**2630.** Foll. 86 ; size 9½–10 in. by 4¾ in.; fairly good Devanāgarī handwriting ; thirteen lines in a page.

*Nṛisiṃhārādhana-ratnamālā*, or *Śrautapaddhati*(?), a *Vaishṇava* manual of worship in nine chapters (*paṭala*), by *Meṅganātha*, son of *Rāmacandra*.

The right margin, and with it a good deal of the writing, especially of the first two leaves, has been eaten away by insects.

The female energy (*śakti*) of the god comes in for a good deal of attention in the rules and formulas.



DR.RUPNATHJI( DR.RUPAK NATH )

It begins:

श्रीनृसिंहं चिदानंदविग्रहं करुणानिधिं ।
प्रण[? म्य पद्धतिं कु]र्वे शंकरोक्त्यनुसारतः ॥ १ ॥

श्रीतापनाय श्रुतिसारसूत्रसत्संप्रदायामलगंधशोभी ।
नित्यं [? नृसिंहस्य] करोतु सैषा संतोषमाराधनरत्नमाला [॥ २ ॥

उपासनाशेषमतानुसारिणी
सत्क्रीतम– –◡◡ दा विधेया ।
सांगा समुद्रा सुविधानयुक्ता
नृसिंहसेवानिरतैर्विचक्षणैः ॥ ३ ॥

नित्यं . . . . काम्यं त्रिविधोपासनासंग्रहः । तत्र प्रथमत-स्तावन्नित्योपासना विधीयते ॥ ब्राह्मे [मुहूर्ते उ]त्थाय गुरुपरं-परमाराध्य दैवतं भगवंतं श्रीनृसिंहं च हृदि संस्मरेत् ॥ तत्र प्रथमं ता . . . . परा तथा ॥

ब्राह्मणं (*r.* ब्रह्माणं) विधिमादिदेशिकमतः श्रीमंत्रराजेक्षणं
वंदे श्रीतपनं ततः श्रुति ◡– – – ततो हीश्वरं ।
श्रीमच्छंकरपूज्यपादमथ तत्पादाब्जभृंगायितं
वंदे माधवसोमया ◡◡◡– नागाह्वयदीक्षितं ॥

निंबादित्यगुरुं नमामि परमं यस्य प्रसादाज्जगत्
कृत्स्नं मुक्ति ◡–◡– निजधिया संसारविच्छित्तये ॥

श्रीनिंबादित्यस्वामिनः ॥ स्वगुरुपर्यंतं पारंपर्यक्रम . . . रुमुखादेव ज्ञातव्यः । ०

I. इति नृसिंहाराधनरत्नमालायां भूतशुद्धिप्राणप्रतिष्ठा नाम प्रथमपटलः । fol. 7*a*.

II. इति कलामातृकान्यासः 10*b*; इति केशवादिमातृकान्यासः 12*a*; इति कंठादिमातृकान्यासः 13*a*; इति ० अंगमंत्राराधननामद्वितीयः पटलः 19*a*.

III. इति द्विस्वरानुष्टुप्सामविधिः 21*a*; इति ० तृतीयः पटलः 31*b*.

IV. इति शेषभगवत्कृतं ध्यानं । अथ शतश्लोकीध्यानं 33*a*; इति ० श्रीतश्रीमंत्रराजपद्धत्यां ध्यानं नाम चतुर्थः पटलः 37*a*.

V. इति ० अंतर्यागो नाम पंचमः पटलः ॥

VI. अथ बहिर्यागप्रकारः 47*a*; इति ० बहिर्यागो नाम षष्ठः पटलः ॥

VII. अथ पुरश्चरणं 65*b*; इति ० पुरश्चरणं नाम सप्तमः पटलः ॥

